





णमोऽत्थु णं समणस्स भगवओ महावीरस्स।

श्रीआगमोद्धारसङ्ग्रहे भागः ९।

सुविहितधुरन्धरसाहित्यसौधानन्यस्तम्भोपमश्रीहरिभद्रसूरिसूत्रित-प्रदेशव्याख्यासङ्कलितं

॥ श्रीप्रज्ञापनोपाङ्गम् (उत्तरभागः) ॥

प्रकाशिका-सूर्यपुरीया श्रीजैनपुस्तकप्रचारकसंस्था।

इदं पुस्तकं सूर्यपुरे श्रीसरस्वतीमुद्रणालये वालुभाइ हीरालाल लालनद्वारा मुद्रयित्वा प्रकाशितम्।

विक्रमसंवत् २००६,] वीरसंवत् २४७६. [इ. स. १९४९

प्रतयः ५००] [मूल्यम् रु. २-८-०

श्रीहरिभद्रसूरिसमयदीपिका ।

समयं हरिभद्राणां निर्णेतुमिस्तु सद्बुधैः । आदौ निर्णयमेतावत् यतो न स्यान्मतिभ्रमः ॥ १ ॥
चतुर्मास्या अवस्थाने वृद्धिर्या पञ्चपञ्चिका । सा व्युच्छिन्ना कदा यस्मान्न सा तेषां युगेऽभवत् ॥ २ ॥
सांवत्सरिकपर्वान्ते स्ववृत्तौ ज्ञापयन्ति ते । श्रीमत्पर्युषणाकल्पकथनस्य समापनाम् ॥ ३ ॥
एवं च पर्षदीष्टा या श्रीसंघस्याधुना समैः । साधुभिर्वाचना कल्पे तेषां काले न साऽप्यभूत ॥ ४ ॥
भानां च भोगसमयः साम्प्रतं यस्तदा न सः । यतः पञ्चदशाद्यंशा मता भोग्यास्तु सूरिभिः ॥ ५ ॥
सायं या प्रत्यहं प्रान्त्ये श्रुतदेवीस्तुतिर्मता । प्रतिक्रमणकाले सा न तेषां समयेऽभवत् ॥ ६ ॥
परिकर्मलेशसत्ता तेषां युगेऽभवन्न हि । तेन न सर्वथा दृष्टिवाद उच्छिन्नतां गतः ॥ ७ ॥
कथावल्यामनूचानाः श्रीभद्रेश्वरसूरयः । अन्त्याः श्रुतधरास्तेऽत्र शासने हीत्यवादिषुः ॥ ८ ॥
व्याख्यायामष्टकस्याहुः श्रीजिनेश्वरसूरयः । श्रूयते त्विति तद्वृत्ते विपरीतेऽन्यशङ्किते ॥ ९ ॥
प्रभावके चरित्रेऽपि तद्वृत्ते विविधाः श्रिताः । किंवदन्त्यः समं चैतत् प्रत्नेष्वेषु न युक्तिमत् ॥ १० ॥

सुविहितधुरन्धरसाहित्यसौधानन्यस्तंभोपमश्रीहरिभद्रसूरिसूत्रित-

प्रदेशव्याख्यासंकलितं

श्रीप्रज्ञापनोपांगं (पूर्वभागः)

मुद्रयित्री—मालवदेशान्तर्गतश्रीरत्नपुरीयश्रीऋषभदेवकेसरीमलजी इत्यभिधाना श्वेताम्बरसंस्था.

मुद्रक—फकीरचंद मगनलाल बदामी. श्री 'जैनविजयानंद' प्रिन्टींग प्रेस, हवाडीयाचकला—सुरत.

वीरसंवत् २४७३ | पण्यम् रु. २-०-० | प्रतयः ५००
विक्रमसंवत् २००३ | सर्वेऽधिकाराः १८७८ तमनियमानुसारेण स्वायत्तीकृताः | क्राइस्टसन् १९४७

आचार्यपुरन्दरश्रीहरिभद्रसूरिसूत्रितप्रदेशविवरणयुतं

श्रीप्रज्ञापनोपाङ्गम् ।

ॐ नमः सिद्धेभ्यः ॥ रागादिवध्यपटहः सुरलोकसेतुरानन्ददुंदुभिरसत्कृतिवंचितानाम् । संसारचारकपलायनफालघंटा, जैनं वचस्तदिह को न भजेत विद्वान् ? ॥ १ ॥ तत्राङ्गोपाङ्गप्रकीर्णकाद्यनेकभेदम्, इदं च सर्वमपि विधिनाऽऽसेव्यमानमध्येतृसंसर्तृप्रवक्तॄणामपवर्गावहमितिकृत्वा तदेकदेशप्रज्ञापनाऽऽख्योपाङ्गप्रदेशानुयोगः प्रारभ्यत इति, इदं चोपाङ्गं यथाऽवस्थितजीवादिपदार्थशासनाच्छास्त्रं, तदस्य प्रारंभ एवालोचितकारिप्रवृत्त्यङ्गत्वात् फलादिविभागः प्रदर्श्यते, उक्तञ्च—"प्रेक्षावतां प्रवृत्त्यर्थं, फलादित्रितयं स्फुटम् । मंगलं चैव शास्त्रादौ, वाच्यमिष्टार्थसिद्धये ॥१॥" तत्र प्रयोजनं तावत् परापरभेदभिन्नं द्विविधं, पुनरेकैकं कर्तृश्रोत्रपेक्षया द्विधैव, तत्र द्रव्यास्तिकनयाऽऽलोचनायामागमस्य नित्यत्वात् कर्तुरभाव एव, 'इत्येषा द्वादशाङ्गी न कदाचिन्नासीन् न कदाचिन्न भवती'त्यादिवचनात्, पर्यायनयालोचनायां चानित्यत्वात्तत्सद्भाव इति, तत्त्वालोचनायां तु सूत्रार्थोभयरूपत्वादागमस्यार्थापेक्षया नित्यत्वेऽपि सूत्रापेक्षयाऽनित्यत्वात् कथंचित्कर्तृसिद्धिरिति, तत्र सूत्रकर्तुः परमपवर्गप्राप्तिः, अपरं सत्त्वानुग्रहः, तदर्थप्रतिपादयितुः किं प्रयोजनमिति चेन्न किंचित्, कृतकृत्यत्वात्, प्रयोजनमन्तरेणार्थप्रतिपादनप्रयासोऽनर्थक इति चेन्न, तस्य तीर्थकरनामगोत्रकर्मविपाकत्वात्, तथा चोक्तं—"तं च कहं वेतिज्जति ? अगिलाए धम्मदेसणादीहीं'त्यादि । श्रोतॄणां त्वपरं तदर्थाधिगमः, परं मुक्तिरेवेति, तथा

च ते हि तत्परिज्ञानात् संसाराद्विरज्यंते, ततो मुक्त्यर्थं घटंते, ततस्तामवाप्नुवन्ति । अभिधेयं प्रज्ञापनादिषट्त्रिंशत्पदगतं जीवाजीवादि, सम्बंधस्तु साध्यसाधनलक्षणस्तर्कानुसारिणः प्रति सामर्थ्यगम्य एव, तथाहि—साध्यमुपेयोऽर्थः, साधनमेतदेव वचनरूपापन्नमिति, श्रद्धानुसारिणः पुनः अङ्गीकृत्य गुरुपर्व्वक्रमलक्षणः, स च स्थविरावलिकाऽनुसारतो विज्ञेय इति, वक्ष्यति च—"वायगवरवंसाउ" इत्यादि, तथा "अज्झयणमिणं चित्त"मित्यादि । सांप्रतं मंगलमुच्यते, यस्माच्छ्रेयांसि बहुविघ्नानि भवन्तीति, उक्तञ्च—'श्रेयांसि बहुविघ्नानि, भवंति महतामपि । अश्रेयसि प्रवृत्तानां, क्वापि यान्ति विनायकाः ॥१॥' इति, प्रज्ञापनाख्योपाङ्गानुयोगश्चापवर्गप्राप्तिबीजभूतत्वाच्छ्रेयोभूत एव, तस्मात्तदारम्भे विघ्नविनायकाद्युपशांतये तत् प्रदर्श्यत इति, तच्च मंगलं शास्त्रादौ मध्येऽवसाने चेष्यत इति, सर्वमेवेदं शास्त्रं मंगलमित्येतावदस्तु, मंगलत्रयाभ्युपगमस्त्वनर्थकः, प्रयोजनाभावादिति चेत् न, प्रयोजनाभावस्यासिद्धत्वात्, तथा च—कथन्नु नाम विनेयाः विवक्षितशास्त्रार्थस्याविघ्नेन पारं गच्छेयुः ?, अतोऽर्थमादिमंगलस्योपन्यासः, स एव कथन्नु नाम शिष्यप्रशिष्यादिवंशस्याव्यवच्छित्त्योपकारकः स्यादिति ?, अतोऽर्थं चरममंगलस्येत्यतो हेतोरसिद्धतेति । तत्र प्रथमपदगतेन 'ववगतजरमरण' इत्यादिग्रन्थेनादिमंगलमाह, तथोपयोगपदगतेन 'कतिविहे णं भंते ! उवओगे पण्णत्ते' इत्यादिना तु मध्यमंगलं, उपयोगस्य ज्ञानात्मकत्वात्, तस्य च प्रधानकर्मक्षयकारणत्वेन मंगलत्वाद्, उक्तं च—"जन्नेरइओ कम्मं खवेति बहुयाहिं वासकोडीहिं । तं णाणी तिहिं गुत्तो खवेति उस्सासमित्तेणं ॥१॥" तथा समुद्घातपदगतेन केवलिसमुद्घातपरिसमाप्त्युत्तरकालभाविना सिद्धाधिकारप्रतिबद्धेन 'निच्छिन्नसव्वदुक्खा जातिजरामरणबंधणविमुक्का । सासयमव्वाबाहं चिट्ठंति सुही सुहं पत्ते ॥१॥'त्यादिना चावसानमंगलमिति । शेषाक्षेपपरिहारः नामादिभेदप्रपंचो(चश्च) यथाऽऽवश्यकटीकायां न्यक्षेण निरूपितस्तथैवेहापि द्रष्टव्य इत्यलं प्रसंगेन, प्रकृतं

प्रस्तुमः, ववगतजरमरणभए सिद्धे अभिवंदिऊण तिविहेणं-जरा-वयोहानिलक्षणा मरणं-प्राणत्यागलक्षणं भयमिह लोकादि सप्तप्रकारं, तथा चोक्तं-"इहपरलोआआदाणमकम्हआजीवमरणमसिलोए" जरा च मरणं च भयं च जरामरणभयानि, व्यपगतानि-अपेतानि जरामरणभयानि येभ्यस्ते तथाविधाः, जरामरणभयविप्रमुक्ता इत्यर्थस्तान्, सितं ध्मातमेषामिति सिद्धा-निर्दग्धानेकभवबद्धकर्मेंधना इति भावना, अत एव च व्यपगतजरामरणभयाः, तत्कारणाभावात्, तान् सिद्धान् अभिवंद्य-आभिमुख्येन वंदित्वा, प्रणम्येत्यर्थः, अनेन समानकर्तृकयोः पूर्वकाले क्त्वाप्रत्ययविधानान्नित्यानित्यैकान्तपक्षव्यवच्छेदमाह, नित्यानित्यैकान्तपक्षे तदसंभवात्, तथाहि-अप्रच्युतानुत्पन्नस्थिरैकस्वभावो नित्यः, तस्य कथं भिन्नकालक्रियाद्वयकर्तृत्वं, सदा तत्प्रसङ्गात्, तथा प्रकृत्यैकक्षणस्थितिधर्माऽनित्यः, तस्यापि कथं भिन्नकालक्रियाद्वयकर्तृत्वमवस्थानाभावाद्, अलं विस्तरेण, दिग्मात्रप्रदर्शनमेवैतत्, त्रिविधेनेति-मनसा वाचा कायेनेति, अनेन योगत्रयव्यापारविकलं द्रव्यवंदनमित्याह, वन्दे जिनवरेन्द्रं, यथा भुक्त्वा व्रजामि एवं सिद्धानभिवंद्य वन्दे जिनवरेन्द्रं, तत्र जिनाश्चतुर्विधाः-श्रुतावधिमनःपर्यायकेवलिजिनाः, तत्र केवलिजिनत्वादयं जिनवरः, यतश्चान्येऽपि सामान्यकेवलिनो यथा तीर्थकरास्तथाविधा विद्यंते अयं तु प्रकृष्टपुण्यस्कंधरूपतीर्थकरनामकर्म्मोदयात्तीर्थंकरो बभूव अतो जिनवराणामिन्द्रो जिनवरेन्द्रस्तं, किंभूतं?-'त्रैलोक्यगुरुं' गृणाति शास्त्रार्थमिति गुरुः त्रैलोक्यस्य गुरुस्त्रैलोक्यगुरुस्तं, तथा च भगवानधोलोकनिवासिभवनपतिदेवेभ्यः तिर्यग्लोकनिवासिव्यंतरनरपशुविद्याधरज्योतिष्केभ्यः ऊर्ध्वलोकनिवासिवैमानिकदेवेभ्यश्च धर्ममादिदेश, अथवा त्रैलोक्यगुरुं-त्रैलोक्यस्वामिनं, तत्र सर्व्वे एव ऋषभादयस्तीर्थकरा यथोक्तगुणोपेता अत आह-'महावीरं' 'शूर वीर विक्रांता'विति कषायादिशत्रुजयात् महाविक्रान्तान्महावीरः, 'ईर गतिप्रेरणयो'रित्यस्य वा विपू-

न्वीस्य विशेषेण ईरयति कर्म्म गमयति याति वेह शिवमिति वीरः, महांश्चासौ वीरश्च महावीरस्तं । आह–ऋषभादीन् व्युदस्य महावीरवंदनं किमर्थं ?, उच्यते, वर्त्तमानतीर्थाधिपतित्वादासन्नोपकारित्वाच्चेति । आसन्नोपकारित्वं कथमिति चेत्, उच्यते, यतः 'सुयरयण'गाहा, द्विविधानि रत्नानि भवन्ति–द्रव्यरत्नानि भावरत्नानि च, तत्र द्रव्यरत्नानि वैडूर्यमरकतेन्द्रनीलादीनि, भावरत्नानि तु श्रुतव्रतादीनि, भावरत्नैरिहाधिकारः, श्रुतरत्नानां निधानं, निधानमिव निधानं तत्प्रभूताश्रयत्वात, जिनवरेण–केवलिना, किंभूतेन ?–भव्यजननिर्वृत्तिकरेण, तत्रानादिपारिणामिकभव्यभावयुक्तो मोक्षगमनयोग्यो भव्यजनो निर्वृत्तिः–निर्वाणं भव्यजनस्य सम्यग्दर्शनादिनिर्वृत्तिमार्गकरणशीलो भव्यजननिर्वृत्तिकरः, कारणे कार्योपचारात्, अथवा लोकानुसरणादिना भव्यजननिर्वृत्तिकरस्तेन, आह–वीतरागद्वेषमोहत्वात् किमित्यभव्यजननिर्वृत्तिं न करोति ?, उच्यते, अभव्यानामेतत्स्वभावाद्, उक्तं च वादिमुख्येन–"सद्धर्म्मबीजवपनानघकौशलस्य, यल्लोकबांधव! तवापि खिलान्यभूवन् । तन्नाद्भुतं खगकुलेष्विह तामसेषु, सूर्यांशवो मधुकरीचरणावदाताः ॥१॥" 'उपदर्शिते'ति उप–सामीप्येन दर्शिता उपदर्शिता, उपदिष्टेत्यर्थः । प्रज्ञापनं प्रज्ञापना–प्ररूपणेति भावना, प्रज्ञाप्यन्तेऽनया जीवादयो भावा इति वा प्रज्ञापना, सर्वभावानामिति सर्व्वतत्त्वानां–जीवाजीवाश्रवबन्धसंवरनिर्जरामोक्षाणां, तथा चास्यां षट्त्रिंशत्पदानि, तत्र प्रज्ञापनाबहुवक्तव्यताविशेषाचरमपरिणामपदेषु जीवाजीवानां प्रज्ञापना, तथा प्रयोगक्रियापदयोस्त्वाश्रवस्य, कायवाङ्मनःकर्म्मयोगस्य आश्रववचनात्, तथा 'इंद्रियकषायाव्रतक्रिया०' वचनात्, तथा कर्म्मप्रकृतिपदे बंधस्य, तथा समुद्घातपदे केवलिसमुद्घातप्ररूपणायां संवरनिर्जरामोक्षाणां त्रयाणामपि, शेषपदेषु तु स्थानादिषु क्वचित्कस्यचिदिति । अथवा 'सर्व्वभावाना'मिति द्रव्यक्षेत्रकालभावानामिति, एतावच्च प्रज्ञापनीयं, नान्यदस्तीत्यर्थः । तत्र प्रज्ञापनापदे

नादावुपन्यासः क्रियत इति, आह–कुतोऽयमनियम इति गम्यते ?, उच्यते, इदमेवाध्ययनं ज्ञापकमिति, तथा नंद्यध्ययनादिष्व- दर्शनादित्यलं प्रसंगेन, चित्रार्थाधिकारयुक्तत्वात् चित्रं, श्रुतमेव रत्नं २, दृष्टीनां वादो दृष्टिवादो दृष्टिपातो वा तस्य निष्यंद इव निष्यंदः तत् यथा वर्णितं–कथितं भगवता श्रीमन्महावीरवर्द्धमानस्वामिनेन्द्रभूतिप्रभृतीनां अहमपि तथा वर्णयिष्यामि। आह–कथं छद्म- स्थस्य तथा वर्णयितुं शक्तिरिति, अत्रोच्यते, सामान्येनाभिधेयपदार्थवर्णनमधिकृत्यैवमभिधानाददोषः, तथा चाहमपि तथा वर्ण- यिष्यामि, किमुक्तं भवति ?–तदनुसारेण, न स्वमनीषिकयेति भावार्थः । इह च षट्त्रिंशत् पदानि भवंति, पदं प्रकरणमर्थाधिकार इति पर्यायाः, तानि चामूनि–'पण्णवण' गाहा 'भासा' गाहा 'ओगाहणा' गाहा 'आहारे' गाहा, एतद्गाथाचतुष्टयसंगृही- तानि षट्त्रिंशद्,एतेषु च जीवादीनां पदार्थानामनेकधा स्वरूपकथनं, तत्र प्रज्ञापनाबहुवक्तव्यविशेषचरमपरिणामपदेष्वित्यादि 'प- ण्णवणा सव्वभावाणं'ति गाथाऽवयवव्याख्यानाद्भावनीया, पदोपन्यासानंतरमिदमादिसूत्रं–'से किं तं पण्णवणा ?' अथास्य सूत्रस्य कः प्रस्ताव इति, उच्यते,प्रश्नसूत्रमिदं, एतच्चादावुपन्यस्यन्निदं ज्ञापयति–पृच्छतो मध्यस्थस्य बुद्धिमतोऽर्थिनो भगवदर्हदुपदि- ष्टतत्त्वप्ररूपणा कार्या, नान्यस्य, तथा चोक्तं–"मध्यस्थो बुद्धिमानर्थी, श्रोता पात्रमिति स्मृतः ।" तत्र सेशब्दो मागधदेशीप्रसिद्धो निपातस्तत्रशब्दार्थे, अथशब्दार्थे वा द्रष्टव्यः, स च वाक्योपन्यासार्थ इति, किमिति परिप्रश्ने, तावदिति क्रमोद्योतने, प्रज्ञापनेति प्राग्वत्, ततश्चायं समुदायार्थः–तिष्ठंतु स्थानादीनि, तत्र किं तावत्प्रज्ञापना ?, वस्त्विवतिवाक्यशेषः, अथवा प्राकृतशैल्या 'अभिधे- यवल्लिंगवचनानि भवंती'ति न्यायादेवं द्रष्टव्यं–तत्र का तावत् प्रज्ञापनेति, एवं सामान्येन केनचित् प्रश्ने कृते सति भगवान् गुरुः शिष्यवचनानुरोधेनादरार्थं किंचिच्छिष्योक्तं प्रत्युच्चार्याह–'पण्णवणा दुविहा पण्णत्ता' अनेन चागृहीतशिष्याभिधानेन निर्व-

जीवाजीवद्रव्याणां, तथा स्थानपदे जीवाजीवाधारस्य क्षेत्रस्य, तथा स्थितिपदे नारकादिस्थितिनिरूपणात् कालस्य, शेषपदेषु संख्या-
ज्ञानादिपर्यायव्युत्क्रांत्युच्छ्वासादीनां भावानामिति। अस्याश्च गाथायाः 'अज्झयणमिणं चित्त'मित्यनया गाथया सहाभिसंबंधः।
अतश्च येनेयं सत्त्वानुग्रहाय श्रुतसागरादुद्धृता असावप्यासन्नतरोपकारित्वादस्मद्विधानां नमस्कारार्ह इत्यतस्तद्विषयमिदमपांतराल
एवान्यकर्तृकं गाथाद्वयमिति। 'वायगबर' गाहा, वाचकाः—पूर्वविदः, वाचकाश्च ते वराश्च वाचकवराः, वाचकप्रधाना इत्यर्थः,
तेषां वंशः—प्रवाहो वाचकवरवंशस्तस्मिन् त्रयोविंशतितमेन, तथा च सुधर्म्मादारभ्य आर्यश्यामस्त्रयोविंशतितम एव, किंभूतेन?—
धीः—बुद्धिस्तया राजते इति धीरः, धीरश्चासौ पुरुषश्चेति समासस्तेन, तथा दुर्द्धराणि—प्राणातिपातादिनिवृत्तिलक्षणानि पंच महाव्रतानि
धारयतीति दुर्धरधरस्तेन, तथा मन्यते जगतस्त्रिकालावस्थामिति मुनिस्तेन मुनिना, विशिष्टसंधि(बुद्धि)समन्वितेन। तथा चाह—पूर्व-
श्रुतेन समृद्धा—वृद्धिमुपागता बुद्धिर्यस्य स तथोच्यते तेन, आह—यो वाचकवरवंशांतर्गतः तस्य पूर्वश्रुतसमृद्धा बुद्धिर्भवत्येव, सत्यं,
किन्तु तथाप्याधिक्यप्रदर्शनार्थत्वान्न दोषः, तथा च चतुर्दशपूर्वविदामपि मतिमधिकृत्य षट्स्थानकं वक्ष्यति। श्रुतमेवानोरपार-
त्वात् सुभाषितरत्नयुक्तत्वाच्च सागरः श्रुतसागरस्तस्मात् 'वीणेऊण'त्ति देशीपदं सांप्रतकालीयपुरुषयोग्यं वीनयित्वेत्यर्थः, येन
श्रुतरत्नं प्रज्ञापनोपांगमिदमेव उत्तमं—प्रधानं, न शेषश्रुतरत्नापेक्षया, किंतु स्वरूपत एव, दत्तं—संपादितं। कस्मै?—शिष्यगणाय—
शिष्यसंघाय, प्राकृतशैल्या चतुर्थ्यर्थे षष्ठी। भगः खल्वैश्वर्यादिलक्षणः सोऽस्यास्तीति भगवान् तस्मै भगवते नमः, कस्मै?—आराद् यातः
सर्व्वहेयधर्म्मेभ्य इत्यार्यः आर्यश्चासौ श्यामश्चेति समासस्तस्मै। अधुनोक्तसंबन्धैवेयं गाथा—'अज्झयण'मित्यादि, अध्ययनमिदं
प्रज्ञापनोपाङ्गाख्यं, आह—यद्यध्ययनं किमित्युत्पन्नमाद्यनुयोगद्वारोपन्यासोऽस्यादौ न क्रियत इति,उच्यते, नायं नियमो यदध्यय-

चनसूत्रेणैतदाह–न सर्वमेव सूत्रं गणधरप्रश्नतीर्थंकरनिर्व्वचनरूपं, किं तर्हि ?, किंचिदेवं, बाहुल्येन तु तद्रूपमेव, तथा चोक्तं–"अत्थं भासइ अरहा सुत्तं गुंथंति गणहरा निउण"मित्यादि, अलं विस्तरेण, प्रकृतं प्रस्तुमः, प्रज्ञापनेति पूर्ववत्, द्विविधा–द्विप्रकारा प्रज्ञप्ता–प्ररूपिता, यदा तीर्थंकरगणधरा एवैवमाहुस्तदाऽयमर्थोऽवसेयः–अन्यैरपि तीर्थंकरगणधरैरिति, यदा पुनरन्यः कश्चिदाचार्यस्तन्मतानुसारी तथा तदा तीर्थंकरगणधरैरेवेति। द्वैविध्यमुपदर्शयन्नाह—'तंजहा जीवपण्णवणा य अजीवपण्णवणा य' तद्यथेति वक्ष्यमाणभेदकथनोपन्यासार्थः, जीवंति जीविष्यंति जीवितवंतश्चेति जीवाः–सुखदुःखविज्ञानोपयोगलक्षणाः, जीवानां प्रज्ञापना जीवप्रज्ञापना,न जीवा अजीवाः, जीवलक्षणविकला इत्यर्थः, तेषां प्रज्ञापना अजीवप्रज्ञापना, अत्र चकारौ द्वयोरपि प्राधान्यख्यापनार्थौ, नेहान्यतमस्य गुणभावः, एवं सर्वत्राक्षरगमनिका कार्या, एवं सामान्येन प्रज्ञापनाद्वये उपन्यस्ते सति विशेषतः स्वरूपमनवगच्छन्नाह—'से किं तं अजीवपण्णवणा,' आह 'यथोद्देशस्तथा निर्देश' इति न्यायात् किमन्यथा प्रश्नसूत्रोपन्यास इति ?,उच्यते, अल्पतरवक्तव्यत्वादजीवप्रज्ञापनायाः, अथवा अस्ति पूर्वानुपूर्वी अस्ति पश्चानुपूर्वीति न्यायप्रदर्शनार्थमिति,एवमन्यत्राप्यालोच्य वक्तव्यं,अधुना निर्व्वचनसूत्रमाह–'अजीवपण्णवणा दुविहा पण्णत्ते'त्यादि,निगदसिद्धं यावत् 'अरूवीअजीवपण्णवणा दसविहा पण्णत्ता'अरूपिणश्चेति समासः,अरूपिणः–अमूर्त्ताः,तामेव दशविधतां निदर्शयन्नाह–'तद्यथे'ति वक्ष्यमाणभेदकथनोपन्यासार्थ, धर्म्मास्तिकायः, तत्र जीवपुद्गलानां स्वाभाविके क्रियावत्त्वे तत्परिणतानां तत्स्वभावधारणाद्धर्म्मः अस्तयः–प्रदेशाः अस्तीनां कायोऽस्तिकायः, प्रदेशसंघात इत्यर्थः, धर्मश्चासावस्तिकायश्चेति समासः, अनेन सकलमेव तदवयविद्रव्यमाह, तथा धर्म्मश्चासावस्तिकायस्य देशः,देश इति तस्यैव बुद्धिपरिकल्पितो द्व्यादिविभागः,तथा धर्म्मास्तिकायस्य प्रदेशाः, प्रकृष्टा देशाः प्रदेशाः–निर्विभागा भागा

इत्यर्थः,ते चासंख्येया इतिकृत्वा बहुवचनं, अनेन चावयव्यवयवयोर्भेदाभेदमाह । तथा अधर्म्मास्तिकायः,तत्र जीवपुद्गलानां स्वाभाविके क्रियावत्त्वे तत्परिणतानां तत्स्वभावाधरणादधर्म्मः अस्तयः—प्रदेशाः अस्तीनां कायोऽस्तिकायः, प्रदेशसंघात इत्यर्थः, अधर्म-श्चासावस्तिकायश्चेति समासः, शेषं भावितार्थं यावदधर्म्मास्तिकायस्य प्रदेशा इति । तथा आकाशास्तिकायः, तत्र सर्व्वद्रव्यस्वभावाऽऽदीपनादाकाशः,स्वभावलाभावस्थानदानादित्यर्थः,आङ्शब्दो मर्यादाऽभिविधिवाची,मर्यादायामाकाशे भवंति भावाः स्वात्मनि च,नाकाशभावमेव यांति,अभिविधौ तु सर्वभावव्यापनाद् ,आकाश एव भवंति सर्वे भावाः, अस्तयः—प्रदेशाः—अस्तीनां कायोऽस्तिकायः, प्रदेशसंघात इत्यर्थः, आकाशश्चासावस्तिकायश्चेति विग्रहः,शेषं भावितार्थं यावदाकाशास्तिकायप्रदेशा इति,नवरं अनंता इतिकृत्वा बहुवचनं, तथा अद्धासमयः, अद्धेति कालस्याख्या, अद्धा चासौ समयश्चेति समासः, अथवा अद्धायाः समयः२, समयो—निर्व्विभागः काल इत्यर्थः, तथा चोक्तं—'कालः परमनिकृष्टस्समयाख्य' इत्यादि, अयं चैक एव, वर्त्तमान इतिकृत्वा कायत्वाभाव इति, अतो देशप्रदेशकल्पनाऽभाव इति, तथा चातीतानागतौ समयौ न स्त एव, विनष्टानुत्पन्नत्वात्, भावे चातिप्रसंगात्, अत्राह—ननु धर्म्मास्तिकायाधर्म्मास्तिकायौ स्त इत्यत्र किं प्रमाणं?, उच्यते, अनुमानं प्रमाणं, इह गतिः स्थितिश्च सकललोकप्रसिद्धे कार्ये वर्त्तते, कार्यं च परिणाम्यपेक्षाकारणाऽऽयत्ताऽऽत्मलाभं वर्त्तते, घटादिकार्येषु तथादर्शनात्, तथा च मृत्पिंडमात्रादेव स्यात्, न च भवति, गतिस्थिती अपि जीवपुद्गलाख्यपरिणामिकारणभावेऽपि न धर्म्माधर्मास्तिकायाख्यापेक्षाकारणमंतरेण भवत एव, यतश्च भावो दृश्यतेऽतस्तत्सत्ता गम्यत इति । ततश्चायं भावार्थः—गतिपरिणामपरिणतानां जीवपुद्गलानां गत्युपष्टम्भको धर्मास्तिकायो मत्स्यानामिव जलं, तथा स्थितिपरिणामपरिणतानां च स्थित्युपष्टम्भकोऽधर्म्मास्तिकायो मत्स्यादीनामिव मेदिनी विवक्षया जलं वा, प्रयोगश्च—

गतिस्थिती अपेक्षाकारणवत्यौ कार्यत्वात् घटवत्, विपक्षस्त्रैलोक्यशुषिरमभावो वेत्यलं प्रसंगेन, गमनिकामात्रमेतत्। आह–आकाशा- क्रमहेतुः
स्तिकायसत्ता कथमवगम्यते?, उच्यते, अवगाहदर्शनात्, तथा चोक्तं–"अवगाहलक्षणमाकाश"मिति, आह–कालसत्ता कथमव-
गम्यते?, उच्यते, बकुलचंपकाशोकादिपुष्पफलप्रदानस्यानियमेनादर्शनात्, नियामकश्च काल इति, आह–इत्थमेव क्रमेण धर्म्मास्ति-
कायाद्युपन्यासः किमर्थम्?, उच्यते, धर्मास्तिकायादिपदस्य मांगलिकत्वात् प्रथमं धर्मास्तिकायोपन्यासः, पुनर्धर्मास्तिकायप्रति-
पक्षत्वादधर्मास्तिकायस्य, पुनस्तदाधारत्वादाकाशास्तिकायस्य, पुनरजीवत्वसाम्यात् समयस्य, अथवा लोकालोकव्यवस्थाहेतुत्वात्
प्रथमं धर्म्माधर्म्मास्तिकाययोः, तथा चोक्तं–"धर्म्माधर्म्मौ लोकव्यवस्थाहेतू" तथाऽन्यत्राप्युक्तं–"जीवादीनां वृत्तिर्द्रव्याणां भवति
यत्र तत् क्षेत्रम्। तैर्द्रव्यैः सह लोकस्तद्विपरीतं ह्यलोकाख्यम् ॥१॥ धर्म्माधर्म्मविभुत्वात् सर्वत्र च जीवपुद्गलविचारात्। नालोकः
कश्चित् स्यान्न च सम्मतमेतदार्याणाम् ॥२॥ तस्माद्धर्म्माधर्म्माववगाढौ व्याप्य लोकखं सर्वम्। एवं हि परिच्छिन्नः सिद्ध्यति लोकस्त-
दविभुत्वात् ॥३॥" पुनर्लोकालोकव्यापित्वादाकाशास्तिकायस्य, पुनर्लोकेऽपि समयासमयक्षेत्रव्यवस्थाकारित्वादद्धासमयस्य, एवमा-
गमानुसारेणान्यदपि युक्त्यनुपाति वक्तव्यमित्यलं प्रपंचेन, 'सेत्तं अरूविअजीवपण्णवणा' सा तावदियमरूप्यजीवप्रज्ञापना। पुन-
राह विनेयः–'से किं तं रूविअजीव०?' इत्यादि, रूपिणश्च तेऽजीवाश्चेति समासः, मूर्ता इत्यर्थः, तत्र स्कन्धा इति बहुवचननिर्देशोऽनन्त-
स्कन्धसत्ताज्ञापनार्थः, उक्तं च–'दव्वतो णं पोग्गलत्थिकाये अणंते' इत्यादि, स्कन्धदेशा बुद्धिपरिकल्पिताः, स्कन्धानां स्कन्धत्वपरिण-
तानामेव द्व्यादिविभाग इति, स्कन्धप्रदेशा बुद्धिपरिकल्पिताः स्कन्धत्वपरिणतानामेव प्रकृष्टा देशाः, परमाणव इत्यर्थः, परमाणुपुद्गलाः ॥९॥
स्कन्धत्वबन्धविकलाः, केवला इत्यर्थः, ते स्कन्धादयः समासतो यथासंभवं पंचविधाः प्रज्ञप्ताः, तद्यथा–वर्णपरिणता इत्यनेन

त्रैकालिकीं वृत्तिमाह, परिणमंति परिणंस्यन्ति चेति, तथा चोक्तं—"भवति स नामातीतः प्राप्तो यो नाम वर्त्तमानत्वम्। एष्यंश्च नाम स भवति यः प्राप्स्यति वर्त्तमानत्वम् ॥१॥" शेषं कण्ठ्यं यावत् 'जे फासतो कक्खडफासपरिणता' इति, अत्रावधीकृतस्पर्शप्रतिपक्षनिषेधेन स्कन्धाः विशिष्टैकपरिणामपरिणता एव चतुःस्पर्शा गृह्यंते, ततश्च वक्ष्यमाणस्कन्धविशेषविषयमेवेदं द्रष्टव्यं, केषांचित् पुनर्बादराणां गता(त्वा)युर्देहस्कन्धानामिवापान्तरालस्कन्धभेदात् कृष्णाद्यशेषवर्णसंभवादष्टस्पर्शताऽप्यविरुद्धैव, तथा च देहस्कन्ध एव लोचने स्कन्धः कृष्णस्तदन्तर्गत एव च कश्चिल्लोहितः अन्यः शुक्ल इत्यादि भावना, देहापेक्षया पुनरसावेकः स्कन्ध एव, तथापरिणामादिति, शेषं सूत्रसिद्धं यावत् 'से किं तं जीवपण्णवणा,' इत्यादि, अत्र संसरणं संसृतिर्वा संसारः—तिर्यङ्नरनारकामरभवानुभूतिलक्षणस्तं समापन्नाः, संसारे वर्त्तंत इत्यर्थः, असंसारो—मोक्षस्तं समापन्नाः असंसारसमापन्नाः, मुक्ता इत्यर्थः, शेषं निगदसिद्धं यावत् 'अणंतरसिद्ध' इत्यादि, तत्रानन्तरसिद्धाः सिद्धत्वप्रथमसमयवर्तिनस्ततोऽन्ये परम्परसिद्धा इति, 'से किं तं अणंतरसिद्धअसंसारसमावण्णजीवपण्णवणा?, ०जीवपण्णवणा पनरसविहा पण्णत्ता' यत उपाधिभेदादनन्तरसिद्धाः पंचदशविधाः संभवंति, तथा चाह—'तंजहा—तित्थसिद्धा' इत्यादि, तत्र तीर्थे सिद्धास्तीर्थसिद्धाः, तीर्थं पुनश्चतुर्वर्णः श्रमणसंघः प्रथमगणधरो वा, तथा चोक्तं—"तित्थं भंते! तित्थं? तित्थगरे तित्थं?, गोयमा! अरिहा ताव नियमा तित्थंकरे, तित्थं पुण चाउव्वण्णो समणसंघो" इत्यादि, ततश्च तस्मिन्नुत्पन्ने ये सिद्धास्ते तीर्थसिद्धाः, अतीर्थे सिद्धा अतीर्थसिद्धाः, तीर्थान्तरे सिद्धा इत्यर्थः, श्रूयते च—"जिणंतरे साहुवोच्छेदो" त्ति, तत्रापि जातिस्मरणादिनाऽवाप्तापवर्गमार्गाः सिद्ध्यन्त एव, मरुदेवीप्रभृतयो वा अतीर्थसिद्धाः, तदा तीर्थस्यानुत्पन्नत्वात्, तीर्थंकरसिद्धाः तीर्थंकरा एव संतो ये सिद्धाः, अतीर्थंकरसिद्धाः अन्ये सामान्यकेवलिनः, 'स्वयंबुद्धसिद्धाः'

स्वयंबुद्धाः संतो ये सिद्धाः, 'प्रत्येकबुद्धसिद्धाः' प्रत्येकबुद्धाः संतो ये सिद्धा इति, अथ स्वयंबुद्धप्रत्येकबुद्धयोः कः प्रतिविशेषः ? इति, उच्यते—बोध्युपधिश्रुतलिङ्गकृतो विशेषः, तथाहि—स्वयंबुद्धाः बाह्यप्रत्ययमन्तरेणैव बुध्यंते, प्रत्येकबुद्धास्तु न तद्विरहेण, श्रूयते च बाह्यवृषभादिप्रत्ययसापेक्षतया करकण्ड्वादीनां प्रत्येकबुद्धानां बोधिरिति, उपधिस्तु स्वयंबुद्धानां द्वादशविधः पात्रादिः, प्रत्येकबुद्धानां तु नवविधः प्रावरणवर्ज्यः, स्वयंबुद्धानां पूर्वाधीते श्रुतेऽनियमः, प्रत्येकबुद्धानां तु नियमतो भवत्येव,लिङ्गप्रतिपत्तिः स्वयंबुद्धानां आचार्यसंनिधावपि भवति, प्रत्येकबुद्धानां तु देवता प्रयच्छतीत्यलं विस्तरेण। 'बुद्धबोधितसिद्धाः' बुद्धाः—आचार्यास्तैर्बोधिताः सन्तो ये सिद्धास्ते इह गृह्यन्ते, एते च सर्वेऽपि केचित् स्त्रीलिङ्गसिद्धाः केचित् पुंल्लिंगसिद्धाः केचिन्नपुंसकलिङ्गसिद्धा इति, आह—किं तीर्थंकरा अपि स्त्रीलिंगसिद्धाः भवंति ?, भवंतीत्याह, यत उक्तं सिद्धप्राभृते—"सव्वत्थोवा तित्थकरीसिद्धा, तित्थकरितित्थे णोतित्थसिद्धा असंखिज्जगुणा, तित्थकरितित्थे णोतित्थगरिसिद्धा संखेज्जगुणा, तित्थगरितित्थे णोतित्थगरसिद्धा संखेज्जगुणा" इति,न नपुंसकलिङ्गे, प्रत्येकबुद्धास्तु पुंल्लिङ्ग एव,स्वलिङ्गसिद्धाः द्रव्यलिङ्गं प्रति रजोहरणगच्छ(गुच्छक)धारिणः,अन्यलिंगसिद्धाः(परिव्राजकादिलिंगेन)'अणेगसिद्धा' इति एकस्मिन्नेव समये अष्टशतं यावत् सिद्धं, यस्मादाह—"बत्तीसा अडयाला सट्ठी बावत्तरी य बोद्धव्वा। चुलसीई छण्णउती दुरहियमट्ठुत्तरसयं च ॥१॥" सेत्तं अणंतरसिद्धअसंसारसमावण्णजीवपण्णवणा। 'से किं तं परंपर॰ ?' इत्यादि, न प्रथमसमयसिद्धा अप्रथमसमयसिद्धाः परंपरसिद्धविशेषणप्रथमसमयवर्त्तिनः, सिद्धत्वद्वितीयसमयवर्त्तिन इत्यर्थः, आदिषु तु द्विसमयसिद्धादयः प्रोच्यन्ते, यद्वा सामान्येनाप्रथमसमयसिद्धाभिधानं विशेषतो द्विसमयादिसिद्धाभिधानमिति, शेषं प्रकटार्थं यावत् "तंजहा एगिंदिया" इत्यादि, इन्द्रो—जीवस्तस्य जीवस्य लिंगमिन्द्रियं, एकमिन्द्रियं

येषां ते एकेन्द्रियाः, एवं द्वाविन्द्रियौ येषामित्येवमक्षरगमनिका कार्या, एतदुक्तं भवति- स्पर्शनेन्द्रियावरणक्षयोपशमे शेषेन्द्रियाणां चावरणे वर्त्तमाना एकविज्ञानसंयुक्ताः एकेन्द्रियाः, स्पर्शनरसनेन्द्रियावरणक्षयोपशमे शेषेन्द्रियावरणे च वर्त्तमाना द्विज्ञानसंयुक्ताः द्वीन्द्रियाः, स्पर्शनरसनघ्राणेन्द्रियावरणक्षयोपशमे शेषेन्द्रियावरणे च वर्त्तमानास्त्रिविज्ञानसंयुक्तास्त्रीन्द्रियाः, स्पर्शरसनघ्राणचक्षुरिन्द्रियावरणक्षयोपशमे शेषेन्द्रियावरणे च वर्त्तमानाश्चतुर्विज्ञानसंयुक्ताश्चतुरिन्द्रियाः, स्पर्शनरसनघ्राणचक्षुःश्रोत्रेन्द्रियावरणक्षयोपशमे वर्त्तमानाः पंचेन्द्रिया इति। 'से किं तं एगिंदिया ?, २ पंचविहा पन्नत्ता, तंजहा- पुढविकाइए" इत्यादि, तत्र पृथिव्येव कायः पृथिवी वा कायो येषां ते पृथिवीकायाः, त एव पृथिवीकायिकाः, एवं शेषा अपि वक्तव्याः, 'से किं तं पुढविकाए' इत्यादि, इह च सूक्ष्मनामकर्मोदयात् सूक्ष्माः, बादरनामकर्मोदयाच्च बादराः, नत्वापेक्षिकं बादरसूक्ष्मत्वमिति, पर्याप्तकापर्याप्तकभेदचिन्तायां तु पर्याप्तिर्नाम शक्तिः सामर्थ्यविशेष इत्यर्थः, सा च पुद्गलद्रव्योपचयादुत्पद्यते, 'तओ छ पज्जत्तीओ आहार० सरीर० इंदिय० आणापाण० भास० मणोपज्जत्ती वे'ति, तत्रैकेन्द्रियाणां चतस्रो विकलेन्द्रियाणां असंज्ञिनां च पञ्च संज्ञिनां षट्' तत्र आहारपर्याप्तिर्नाम खलरसपरिणामनसत्ती आहारपज्जत्ती, सप्तधातुतया रसस्य परिणामनशक्तिः शरीरपर्याप्तिः, पंचानामिन्द्रियाणां योग्यान् पुद्गलान् गृहीत्वाऽनाभोगनिर्वर्त्तितेन वीर्येण तद्भावनयनशक्तिरिन्द्रियपर्याप्तिः, आणापाणजोगे पुग्गले घेत्तूण तथा परिणामेत्ता आणापाणणिसिरणसत्ती आणापाणपज्जत्ती, वइजोगे पोग्गले घित्तूण भासत्ताए परिणमित्ता वइजोगत्ताए निसिरणसत्ती भासापज्जत्ती, मणोजोगे पोग्गले घित्तूण मणत्ताए य परिणामेत्ता मणजोगत्ताए निसिरणसत्ती मणपज्जत्ती। एयाओ पज्जत्तीओ पज्जत्तगनामकम्मोदएण णिव्वत्तिज्जंति, तं जेसिं अत्थि ते पज्जत्तया, अपज्जत्तयणामकम्मोदएण अणिवत्ताओ जेसिं अत्थि तेऽपज्जत्तया, एयाओ पज्ज-

त्तीओ जुगवं आढप्पंति, अंतोमुहुत्तेण य निव्वत्तिज्जंति, तह आहारपज्जत्तीए निव्वत्तिकालो समय एव, कहं ?, भण्णति, जम्हा आहारपदे बितिए उद्देसए सुत्तं-"आहारपज्जत्तीए अपज्जत्तए णं भंते ! जीवे किं आहारए अणाहारए ?, गोयमा ! णो आहारए, अणाहारए,"सो य विग्गहे आहारपज्जत्तीए अपज्जत्तओ लब्भति, जदि पुण उववायखेत्तपत्तोऽवि आहारपज्जत्तीए अपज्जत्तओ होज्जा तो एवं वागरणं होज्जा-गोयमा ! सिय आहारए सिय अणाहारए, जहा सरीरादिपज्जत्तीसु सिय आहारए सिय अणाहारए, सेसाओ पुण असंखेज्जसमइयाओ अंतोमुहुत्तेण णिव्वत्तिज्जंति" शेषं प्रकटार्थं यावद् 'बादरकाए मणिविहाणा गोमेज्जया'इत्यादि, अत्र मणिविहाणेत्ति गोमेज्जगाईहिं संबज्झति, शेषं सूत्रसिद्धं यावत् 'तत्थ णं जे ते अपज्जत्तगा ते णं असंपत्ते'त्यादि,' असंप्राप्ता वर्णादीन् विशेषान्, वर्णादिशविभागो भवति बादराणां, ते च उच्छ्वासपर्याप्त्याऽपर्याप्ता एव म्रियंते, नतु शरीरेन्द्रियपर्याप्तिभ्यां, यस्मादागामिभवायुष्कं बद्ध्वा म्रियंते, तच्च शरीरेन्द्रियादिपर्याप्त्या पर्याप्तानां बध्यत इति, असंप्राप्ता वर्णादीनित्येके, एतच्च किल शरीरादिपर्याप्तिप्रतिषेधविधिभ्यां शरीरमात्रापेक्षत्वाच्च वर्णादीनां न युज्यत इत्यतोऽसंप्राप्ताः पर्याप्तिं साकल्येनेत्यन्ये, 'तत्थ णं जे ते पज्जत्तगा' इत्यादि, वर्णादेशेन वर्णभेदविवक्षयेत्यर्थः, एवं गन्धादिष्वपि वक्तव्यं,'सहस्सग्गसो विहाणा' इति, सहस्राग्रसो भेदाः 'संखेज्जाइं जोणिप्पमुहसतसहस्साइं'ति, संख्येया योनिद्वारलक्षा इत्यर्थः, अत्र चैकविशिष्टवर्णादियुक्ताः संख्यातीता अपि स्वस्थाने व्यक्तिभेदेन योनयः जातिमधिकृत्यैकैव गण्यते अतः संख्येयत्वमविरुद्धमिति, 'पज्जत्तगणिस्साए अपज्जत्तगा वक्कमंति'त्ति व्युत्क्रामन्ति-उत्पद्यन्ते, 'जत्थ य एगो' इत्यादि, यत्रैकः पर्याप्तक उत्पद्यते तत्र तन्निश्रयैव नियमेनासंख्येयाः पर्याप्तका इति, शेषं निगदसिद्धं यावत् 'हरतणुए'त्ति, भूमीउ चडेऊण गोधूमंकुरादिषु बिंदुबंधो

हरतणुजो, सुद्धोदकं नद्यादिषु, 'इंगाले'त्ति तत्राङ्गारः-खादिरादिः प्रतीतः ज्वाला अनलसंबंधा मुर्मुरः [illegible] मसृणाग्निः अर्चिः अनलाप्रतिबद्धा, प्रदीपशिखेति चान्ये,अलातं-उल्मुल्कं शुद्धाग्निरयस्पिंडादौ, शेषं प्रकटार्थं यावत् [illegible] विदिशु यो वाति, वातोद्भ्रमोऽनवस्थितः वातोत्कलिका समुद्रोत्कलिकेव, वातमण्डलिका वातोली, उत्कलिकावातः [illegible] डलिकादिमिरिति, गुंजावातो गुंजनशब्दं वाति, झंझावातोऽसुभनिष्ठुरः, संवर्त्तकवातस्तृणादिसंवर्त्तनस्वभावः [illegible] णामो रत्नाद्यधोवर्त्ती, तनुवातो विरलः, शुद्धवातो मन्दस्तिमितः, दइयाइगतमन्ये, शेषं सूत्रसिद्धं यावत् 'एतेसि णं [illegible] संखेज्जजीवे'त्यादि, मूलाः-प्रसिद्धा कन्दहेट्ठा य पसरंति, तदुवरि कंदा प्रसिद्धा चेव, खंधो-गुंठो तया-छल्ली साला-साहा पवाला-अंकुरा, शेषं सुगमं यावत् 'सेत्तं कुहणा' एत्थ य जत्थेगत्थ रुक्खादिणाममेगं वित्तूण पुणोऽवि अन्नत्थ तं चेव गेण्हति तत्थ भिन्नजातीओ सरिसणामो अन्नो चेव दट्ठव्वो, अण्णे भणंति-किलेगोवि अणेगजातीओ कोइ होति, सो अण्णेसुपि णिद्दिसिज्जति ण दोसो । णाणाविहसंठाणरुक्खाणं एगजीविया पत्ता केसिंचि, अतिप्रसङ्गनिवृत्त्यर्थमपवादमाह-'खंधोऽवि एगजीवो' इत्यादि, किंलक्षणाः पुनः प्रत्येकतरवो भवंति ? इत्यत आह-'जह सगल'गाहा, यथेति दृष्टान्तोपन्यासार्थः, सकलसर्षपाणां श्लेषमिश्रीकृतानां वर्तिता-वलिता वर्तिता । तस्यां च वर्त्तौ प्रत्येकप्रदेशाक्रमणेन सिद्धार्थकाः स्थिताः तामन्योऽन्यानुवेधभाजः स्युः, श्लेषग्रहणं तु प्रतिबंधाचारप्रतिपत्तये, यथाऽसौ वर्त्तितस्तथा प्रत्येकतरुशरीरसंघातः, यथा सिद्धार्थकास्तथा तदधिष्ठायिनो जीवाः, यथा श्लेषमिश्रीभावविमिश्रिताः तथा रागद्वेषप्रचितपुद्गलोदयविमिश्रिता जीवाः, पश्चिमार्द्धेन गाथायां उपन्यस्तदृष्टान्तेन सह साम्यं प्रतिपादितं, तथेति शब्दोपादानादिति। 'जह वा तिल' गाहा, तिलपर्पट एव तिलपर्पटिका देशीशैल्याऽमि-

धीयते, शेषं पूर्वगाथातुल्यमेव भावनीयमिति, शेषं सुगमं यावत् 'चक्कार'मित्यादि, चक्राकारा भङ्गा ये मूलकन्दत्वक्पत्रपुष्पफलादयस्तेन ताः, ग्रन्थिरिति च-गच्छस्थानं तच्च, तेषां, श्वेतिका पर्वणः श्लेषवद्धर्चिकाछेद इव घनं भवति, न विषमच्छेदमुद्दंतुरं वा, सरीरं मूलसंगवदिति, अथवा पृथिवीसदृशश्छेदं यच्चदनन्तमिति, सूर्यकिरणनिकरप्रतप्तकेदारतरिकाप्रतरखण्डसममंगं, अनंतजीवं विजानीहि तान्। 'गूढछिरागं'ति सुगमं। 'पुप्फा जला ये'त्यादि, अतिमुक्तकादिपुष्पाणि वृत्तबद्धानि जात्यादिषु पुष्पाणि नालीकाबद्धानि,शेषं सुगमं यावत् पिण्डबाहिरेत्यादि,पोक्खरट्ठिया-कंठिया मिंजाउ-फलाणि वलिमोडओ-पर्व्वपरिवेष्टनं चक्राकारं, वेढो गिरो कडाहंति एगजीवस्स। 'जोणिभूते' गाहा, योन्या अपरित्यक्ते बीजे,भूतशब्दोऽयमवस्थावाची,योन्यवस्थे बीजे-योनिपरिणाममजहतीतियावत्, बीजस्य हि द्विविधा अवस्था-योन्यवस्था अयोन्यवस्था च, यदा योन्यवस्थां न जहाति बीजमुज्झितं च जंतुना तदा योनिभूतमभिधीयते, योनिस्तु जन्तोरुत्पत्तिस्थानमेवमिष्टं तत्रस्थं, जीवपरिणामनशक्तिसंपन्नमित्यर्थः, तस्मिन् बीजे योनिभूते जीवो व्युत्क्रामति-उपपद्येत स एव-पूर्वको बीजजीवोऽन्यो वा आगत्य तत्रोत्पद्यते,यदा जीवेनायुषः क्षयाद् बीजपरित्यागः कृतो भवति, तस्य च यदि बीजस्य पुनरम्बुकालाकाशसंयोगस्तदा कदाचित् स एव प्राक्तनो जीवस्तत्रागत्य परिणमेत,कदाचिदन्य इति,यश्च मूलतया जीवः परिणमते स एव प्रथमपत्रतयाऽपीत्येकजीवकर्तृके मूलप्रथमपत्रे इति यावत्,प्रथमपत्रकं च या असौ बीजस्य समुच्छूनावस्था भूजलकालापेक्षा सैव प्रथमपत्रव्यपदेशमर्हति,नियमप्रदर्शनमेतत्,शेषं किसलयादि सकलं नावश्यं मूलजीवविपरिणामाविर्भावितमिति मंतव्यं,ततश्च "सव्वोऽवि किसलयो खलु उग्गममाणो अणंतओ भणिओ" इत्याद्यपि वक्ष्यमाणमविरुद्धं,मूलपत्रनिर्वर्त्तनारंभकाले किशलयत्वाभावात्, आह-प्रत्येकशरीरवनस्पतिकायिकानां शरीरावस्थां प्रति किं प्रत्येकशरीरत्वं सर्वकालमुतावस्था-

विशेषे कस्मिंश्चिदनन्तत्वमपि संभवति ?, साधारणवनस्पतिकायिकानामपि किमनन्तत्वं सर्वकालमुत प्रत्येकशरीरत्वमपि कदाचित् संभवतीत्यत आह–'सव्वोऽवि किसलओ' इत्यादि, यः सर्वशब्दः अयमपि विशेषवाची, सर्वो वनस्पतिकायः प्रत्येकशरीरः साधारणो वा किशलयावस्थां प्रति 'अणंतओ भणिओ,' स एवानन्तवनस्पतिकायः प्रवृद्धिं गच्छन् अनन्तो वा भवति परित्तो वा भवति, कहं ?, भण्णति–जइ साहारणसरीरं निव्वत्तियं तदा साहारण एव भवति, अह पत्तेयत्तं ततस्तत् किशलयं परित्तमेव भवति, विवड्ढमाणं पुण अंतोमुहूत्तं, कहं ?, णिओयजीवाण अंतोमुहुत्तं ठिती वण्णिया, तेण अंतोमुहुत्ताओ परेण वड्ढमाणो परित्तो होति, अत्र केचिद् वर्णयंति–साधारणाधिकारे पठितत्वात् साधारणकिशलयस्यैव ग्रहणमिति, तच्च न, अपिशब्दोपादानादुद्गच्छन्निति च विशेषोपादानात्, तथा च सति संभवे व्यभिचारे च विशेषणविशेष्यभाव इति वचनात्, तस्मादुभयकिशलयस्यैव ग्रहणमिति। साधारणलक्षणं प्रतिपादयन्नाह–'समयं' गाहा, समयं–युगपद् व्युत्क्रान्तानां–उत्पन्नानां समकं तेषां शरीरनिर्वृत्तिर्भवति, समकं च प्राणापानग्रहणं, समकं उच्छ्वासनिश्वासौ तदुत्तरकालभाविनाविति, "एक्कस्स उ" गाहा, एको यदाहारादि गृह्णाति तद् बहूनां ग्रहणं, यद् बहवो गृह्णन्ति तदपि संक्षेपादेकस्य ग्रहणं, साधारणं–सामान्यं, किं पुनः साधारणं तेषामिति ?, उच्यते–आहारः प्राणापानौ चेत्यादि, एकस्मिन्नाहारप्रवृत्ते सर्वे प्रवृत्ता भवंति, एवं प्राणापानयोग्यपुद्गलोपादानमोक्षप्रवृत्तिरपि भावनीया। "जह अयगोलो" गाहा, निगदसिद्धा॥ "एगस्स" गाहा, नैकादीनामसंख्येयावसानानामनन्ततरुजीवानां शरीराण्युपलभ्यन्ते, कुतः ?, अभावात्, न ह्येकादिजीवगृहीतान्यनन्तानां शरीराणि संति, अनन्तजीवपिंडत्वादेव, कथं तर्ह्युपलभ्यास्ते भवन्तीत्यत आह–'दीसंति' दृश्यन्ते शरीराणि बादराणि बादरनिगोदानामनन्तजीवानां, सूक्ष्मनिगोदानां तु नोपलभ्यंते, अनन्तजीवसंघातत्वे सत्यपि शरीराणीत्यर्थः, निगोदास्तु नियमत

एवानन्तजीवसंघाता भवंतीत्याह–“गोला य असंखिज्जा होंति निगोदा असंखया गोले। एक्केको य णिगोदो अणंतजीवो मुणेयव्वो ॥१॥” एतेषां प्रमाणमभिधातुकाम आह–“लोयागास” गाहा ॥ द्वयमपि निगदसिद्धं, नवरमेकगृहान्तर्गतक्षेत्रे प्रदीपप्रभावस्थानन्यायेन विचित्रपरिणामसंभवाद् भावनीयं। ‘पत्तेय’ गाहा, प्रतरः संहितचतुरस्सीकयलोयस्स घेप्पति, शेषं सूत्रसिद्धं यावत् खुल्ला गुल्लियाओ, खुल्ला सामुद्दसंखणका, शेषं सुगमं यावत् ‘सत्त जातिकुलकोडी’त्यादि, अस्य भावना, सत्त जाती कुलकोडीण जोणिप्पमुहा–जोणिप्पवाहा सत्तसहस्सा हवंति इति–एवमाशंकायां भगवता परिथूरोदाहरणेण दंसिज्जति, जहा जाती तिरिक्खजाती, तीए कुलाणि किमिकीडविच्छुगाणि, जोणिप्पवहाणि य एयाणि, तथा च एगजोणिए चेव अणेगाइं कुलाइं भवंति, जहा छगणजोणीए कृमिकुलं कीडगकुलं विच्छुयकुलमित्यादि, अथवा किमिजातीकुलं कीडगजातीकुलमित्याद्यपान्तरजातिभावात्, थूरोदाहरणं चेवैतदिति, शेषमनिगूढार्थं यावत् पदावसानं, नवरं वीयावा–जाती शतपदी–गोण्ही कण्णवि–सिवाली आसालिया नाम अंगुलसंख्येयभागकायादिभेदा यावद् द्वादशयोजनानि घोरगृद्धा, समुद्रकवत् स्थितौ पक्षौ गच्छतामपि ततावेव नित्यमनाकुंचितौ पक्षौ, एष चम्म इति। संक्षेपरुचिदर्शनाधिकारे ‘सहसंमुतिय’त्ति, जातिस्मरणादिना जीवादिपदार्थेषु तत्त्वतो–भावतः श्रद्धानं, ‘णिव्विसमाणकाया’ जे परिहारतवं करेंति, निर्विष्टः कायो यैस्ते निर्विष्टकायाः, केऽपि, परिहारतवो जेहिं कतो आसी ते निविट्ठकाया, ‘पढमसमय’ इति जे तेसिं चेव खीणकसायादीणं विसेसाणं पढमे समए वट्टंति, ततो बितियादिसमए वट्टमाणा अपढमसमया इति भण्णंति, तहा चरिमसमय अचरिमसमय इति, जे तेसिं चेव खीणकसायादीणं विसेसाणं अन्तसमए वट्टंति ते चरिमसमया इति, ये ततो द्विचरिमत्रिचरिमादिसमयेषु वर्त्तन्ते ते अचरिमा इति, ‘वेमाणिया कप्पोववन्नगा

कल्पातीता य' तत्र कल्पशब्दः प्रकारवचनः, यत्रेन्द्रसामानिकादिप्रकाराः सन्ति ते कल्पा उच्यंते सौधर्म्मादयस्तेषु ये उत्पन्नास्ते कल्पोपपन्नाः, ते इन्द्रादयः प्रकारा न संति ते कल्पातीताः ग्रैवेयकादय इति॥

एवं प्रज्ञापनाप्रदेशव्याख्यायां प्रथमपदव्याख्या समाप्तेति॥

——××——

साम्प्रतं द्वितीयमारभ्यते—अस्य चायमभिसम्बन्धः—प्रथमपदोक्तानामेव पृथिवीकायिकादीनामिह स्थाननिरूपणं क्रियते, तथा चाह—'कहि णं भंते !' इत्यादि, 'कहिं'ति कस्मिन्, णंशब्दो वाक्यालंकारार्थः 'भंते'ति भदंत इति परमगुर्वामंत्रणार्थः, बादरपृथिवीकायिकानां पर्याप्तकानां स्थानानि स्वस्थानादीनि प्रज्ञप्तानि—प्ररूपितानि ?, एवं गौतमस्वामिना प्रश्ने कृते सति भगवानाह महावीरवर्द्धमानः—'गोयमा ! सट्ठाणेण'मित्यादि, आह—गौतमोऽपि भगवानुपचितकुशलमूलो गणधरस्तीर्थकरभाषितमातृकापदश्रवणमात्रावाप्तप्रकृष्टश्रुतज्ञानावरणक्षयोपशमश्चतुर्दशपूर्वविद्विवक्षितार्थपरिज्ञानसमन्वित एव किमर्थमित्थं पृच्छति ?, तथाहि—न चतुर्दशपूर्वविदः प्रज्ञापनीयं किंचिदविदितमस्ति, यथोक्तं—"संखातीतेऽवि भवे साहति जं वा परो तु पुच्छेज्जा। ण य णं अणादिसेसी वियाणती एस छउमत्थो ॥१॥" अत्रोच्यते—जानन्तो वाऽन्यत्र विनेयेभ्यः प्रतिपाद्य तत्संप्रत्यय इति निमित्तं पृच्छति, सर्वत्र गणधरप्रश्नतीर्थकरनिर्वचनरूपं वा किंचित् सूत्रमितिकृत्वा इत्थमेव रचयति, स्वल्पानाभोगसंभवाद्वा पृच्छति, उक्तं च—"न हि नामानाभोगश्छद्मस्थस्येह कस्यचिन्नास्ति। ज्ञानावरणीयं हि ज्ञानावरणप्रकृति कर्म्म ॥१॥" छद्मस्थश्चासावित्यलं प्रसङ्गेन, गमनिकामात्रसारोऽयमारंभ इति, प्रकृतं प्रस्तुमः, गोयमत्ति लोकप्रथितमहागोत्रविशिष्टाभिधायकेनामंत्रणयन्नाह— ॥१८॥

हे गौतम !, गौतमसमगोत्रेति भावार्थः, 'सट्ठाणेणं'ति स्वस्थानं यत्रास्ते बादरपृथिवीकायिकः पर्याप्तको निर्देशार्ह इति, यत्र वर्णादिविभागेनादेष्टुं शक्यत इत्यर्थः, उपपातसमुद्घातस्थाननिवृत्त्यर्थं स्वस्थानग्रहणं, तेन तदंगीकृत्य 'अट्ठसु पुढविसु' इत्यादि सुगमं यावत् 'उववाएणं लोगस्स असंखेज्जइभागो' उपपतनमुपपातः तेनोपपातेन, यथोक्तबादरपृथिवीकायिक-पर्याप्तकस्वस्थानप्राप्त्यभिमुख्येनेत्यर्थः, लोकस्य चतुर्दशरज्ज्वात्मकस्य 'असंखेज्जइभागे'त्ति असंखेज्जइभागे, अत्र केचिदेवं व्याचक्षते—परिस्थूरऋजुसूत्रनयदर्शनेन बादरपृथिवीकायिकपर्याप्तकायुरेव विशिष्टविपाकतो वेदयंतो बादरपृथिवीकायकपर्याप्तका उच्यन्ते, ततश्चोपपातेन—उपपातमधिकृत्य 'लोयस्स असंखेज्जइभाए'त्ति यस्माद्रत्नप्रभादि स्वस्थानं लोकस्यासंख्येयभाग एव वर्त्तते, यतो रत्नप्रभा घनभावेनाशीतियोजनसहस्राधिकं लक्षं वर्त्तते, एवं शेषा अपि स्वेन घनभावेन वक्तव्याः, स्वस्थानप्राप्ताश्च तेऽधिकृतव्यपदेशभाजो भवंति, नापान्तरालगतौ, यस्मात् पर्याप्तकनामकर्म्मोदयात् पर्याप्तका, न पर्याप्तकनामकर्मबंधमात्रेणाति-प्रसंगात्, स च पर्याप्तकनामकर्म्मोदयो विशिष्टः स्वस्थानप्राप्तानामेव भवति, आहारादिपर्याप्तिनिर्वृत्तिभिर्लक्षिष्यत इत्यर्थः, अन्ये पुनरित्थमभिदधति—स्तोकत्वादेव तेऽपान्तरालगतिपरिग्रहेऽपि लोकस्यासंख्येयभाग एवेति, तथा च समुद्घातेनासंख्येयभाग एव, वक्ष्यते च स्वस्थानातिरिक्त एव क्षेत्रे वर्त्तंत इति भावनीयं, तत्त्वं तु केवलिनो विदंति विशिष्टश्रुतविदो वा, 'समुग्घातेणं लोगस्स असंखेज्जतिभागे'त्ति, हननं घातः समेकीभावे उत् प्राबल्ये एकीभावेन प्राबल्येन च घातः समुद्घातः, तदुपयो-गानन्यतया आयुष्कपुद्गलानां प्रबलसातनमित्यर्थः, ततश्च समुद्घातेन—समुद्घातमधिकृत्य लोकस्यासंख्येयभाग इति, अयमत्र भावना—जे ते बादरपुढविकायपज्जत्तगा सोवक्कमाउया निरुवक्कमाउया वा तिभागावसेसाउया यदि परभवियाउयं बंधित्ता मारणंतिय-

समुग्घाएणं समोहणंति तदा निक्खित्तनियदंडा लोगस्स असंखेज्जतिभागे भवंति, ते य बादरपुढविकाइया पज्जत्तगा आउए अक्खीणे ते चेव लब्भंति, शेषं सुगमं यावत् उववाएणं सव्वलोए, समुग्घाएणं सव्वलोए, बादरपुढविकाइया अपज्जया उववाएणं समुग्घाएण य सव्वलोग इति, कहं ?, भण्णति—जम्हा अपज्जत्तया अंतरा गतीए ठाणे य अपज्जत्तया चेव, अपज्जत्तयनामकम्मोदयातो, अपज्जत्तया चेव मरंतित्तिकाउं, ते य णारगदेववज्जेहिं सव्वकाएहिंतोवि उववज्जंति, अत उक्तं—उववाएणं समुग्घाएण य सव्वलोए, अण्णे भणंति—बहुत्तणओ चेव सव्वलोग इति, इह चैवंभूतया स्थापनया भावना कार्येति, अत्र प्रथमं वक्रं यदैव संहरंति केचन तदैव तद्वक्रदेशमन्ये पूरयंति, एवं द्वितीयवक्रसंहरणेऽपि, अवक्रोत्पत्तावपि प्रवाहतो भावनीयं 'सट्ठाणेणं लोयस्स असंखेज्जइभागे'त्ति यथा पर्याप्तकास्तथा भावनीयं, तन्निश्रयैवैषामुत्पत्तेः, सुहुमपुढविकाइया जे पज्जत्तगा अपज्जत्तगा ते सव्वे एगविहत्ति एकप्रकारा एव, प्रकृतं स्वस्थानादिविचारमधिकृत्यौघतः, 'अविसेस'त्ति अविलक्षणाः—विशेषरहिताः, यथा पर्याप्तकास्तथेतरेऽपि 'अनानात्वा'नानात्ववर्जिताः येष्वेवाधारभूताकाशप्रदेशेष्वेके तेष्वेवेतरेऽपीत्यर्थः, 'सव्वलोयपरियावण्ण'त्ति उपपातसमुद्घातस्वस्थानैः सर्वलोक इति भावना, पण्णत्तत्ति प्रज्ञप्ता मया अन्यैश्च ऋषभादिभिस्तीर्थकृद्भिरिति, अनेनागमस्य कथंचिन्नित्यत्वमाह,'समणाउसो'त्ति आमंत्रणवचनं गौतमस्य, शेषं सुगमं, जाव णिव्वाघाएणं पण्णरससु कम्मभूमीसु इत्यादि, 'निव्वाघाएणं'ति भरहेरवएसु सुसमसुसमासु सुसमासु दूसमदूसमासु—अतिदुष्षमायां वाघातो भण्णति, एयासु भरेहरवएसु ण होति बादरतेउकाइयत्ति भावार्थः, शेषं सुगमं जाव तिसुवि लोगस्स असंखेज्जइभागेत्ति तिसुवि—उववायसमुग्घायसठाणेसु लोगस्स असंखेज्जइभागे वट्टंति, स्तोकत्वादिति भावना, शेषं सुगमं यावत् उववाएणं लोगस्स दो-

सुद्धकवाडेसु इत्यादि, अस्य भावना—अड्ढाइज्जेसु दीवसमुद्देसु उभयो पासिं पुव्वावरदाहिणुत्तरायते कवाडे, उड्ढं लोयंतं अधोवि लोगंतं पुट्ठे, केवलिसमुग्घातदण्डवत्, तच्छ्रेणिपतिता उपपद्यमानका अपि जीवा लभ्यंते, तेसु बादरतेउकाइयाणं संभवो, ण पुण जे बाहिं दोण्हं उद्धकवाडाणं विदिसी विस्सेणीऽवट्ठिया, उपपत्त्यर्थं गतियुक्ता अपि नोच्यन्ते बादरतेउकाइया इति व्यवहारनयदर्शनेन, व्यवहारनयस्य हि बादरतेउकाइयसट्ठाणआकाशसमश्रेणिस्थस्वस्थानप्राप्त्यभिमुखो बादरतेजस्कायिक इति व्यवह्रियते; यथा कश्चिन् मगधादिदेशात् सुराष्ट्रं प्रस्थितः गिरिनगरादिनगरे निवासं कल्पयितुकामः सुराष्ट्रापर्यन्तग्रामप्राप्तः समुत्पद्यमानेषु प्रयोजनेषु सौराष्ट्रक इति व्यवह्रियते तद्वदिहापीति,इतरश्चाथ आह ऋजुसूत्रनयदर्शनेन, विचित्रा च सूत्रस्य गतिर्भगवत इति; बादरतेउकाइएसु य उववज्जमाणो पढमे समए कवाडं ण पविसति, जाव ण पविसति ताव पुव्वभवअवत्थ एव लब्भति, अत उच्यते—उववाएणं दोसुद्धकवाडेसु तिरियलोयतत्थे यत्ति, तयोः स्थितस्तत्स्थितः, तयोः ऊर्ध्वकपाटयोर्यः स्थितस्तिर्यग्लोकस्तत्स्थः, चशब्दात्तत्संश्च, अन्ये तु व्याचक्षते—'तिर्यग्लोकपयट्टे(वट्टे)य'त्ति तिर्यग्लोके स्थालके च, ततश्च स्वयंभूरमणादीहिंतोवि तिरिच्छकं जे अविग्गहेणा-गच्छंति विग्गहेणवि समसेढिपवण्णगा तेऽवि घिप्पंति,इयमत्र स्थापना। समुग्घाएणं सव्वलोएत्ति—जया लोयग्गसेढीए उड्ढकवा-डाणं अंतरवची बादरतेउकाइएसु उववज्जिउकामो सुहुमपुढविकाइयादि मारणंतियसमुग्घाएणं समोहतो पदेसे णिच्छुब्भति ते य पदेसा सरीरप्पमाणमेत्तं विक्खंभवाहल्लेणं आयामेणं जाव लोयंतं फुसंति, यस्माद्वक्ष्यति ओगाहणसंठाणपदे—"पुढविकाइयस्स णं भंते ! मारणंतियसमुग्घाएणं समोहयस्स तेयासरीरस्स केमहालिया सरीरोगाहणा पण्णत्ता ?, गोतमा ! सरीरप्पमाणमेत्तं विक्खंभबाह-ल्लेणं, आयामेणं जहण्णेणं अंगुलस्स असंखेज्जभागं उक्कोसेणं लोगंते" अत उच्यते—समुग्घाएणं सव्वलोग इति, अन्ये त्वभिदधति—

तेजस्कायिकसमुद्घातमवधिकृत्य लोकापूरणमविरुद्धं,तेषां सर्वत्र सूक्ष्मादुत्पत्त्या समुद्घातसंभवात् , तथा हि प्रथमव्याख्यापक्षेऽपि विग्रहे स्वस्थानपरित्यागमंतरेण लोगापूरणं न संभवति, इहापि स्वस्थानपरित्यागे तेजस्कायिकसमुद्घाते तुल्यमेव,न चेत्थमपि कश्चिद् दोषो लक्ष्यते, अपि तु निरुपचरिततेजस्कायिकसमाश्रयणाद् गुणः,इह च यदि समुद्घातेनैव स चान्यत्रोत्पाद्येत ततः प्राक्तने शरीरे परित्यक्तेऽपि विग्रहगतिसमापन्नो न तावदाहारको भवति यावत् सर्वात्मप्रदेशैरुपपातक्षेत्रं न प्रविष्ट इति, सट्ठाणेणं लोगस्स असंखेज्जइभागे-पंच भरहादीणि सट्ठाणं एयं लोयस्स असंखेज्जइभागे, पज्जत्तगनिस्साए अपज्जत्तगा वक्कमंतित्ति वयणाओ सट्ठाणं तेसिंपि पंच भरहादीणि। बादरवाउक्काइयाणं पज्जत्तयाणं सट्ठाणं घनवातादिषु, तत्र निष्कुटो गवाक्षवन्नरकादिदेशः छिद्राणि-नरकविमानानामवकाशान्तराणि, तीसुवि लोयस्स असंखेज्जेसु भाएसु, सुषिरबहुत्वाद् , यत्र च शुषिरं तत्र वायोः संभव इति, बादराणां अपज्जत्तया उववाएण य समुग्घाएण य सव्वलोए, कहं ?, नारकदेववर्ज्यकायेभ्य उपपातसंभवात् , अपज्जत्तगत्तं च आंतरगतीए-वि लब्भइत्तिकाउं । बादरवणस्सतिकाइया पज्जत्तया उववाएणं समुग्घाएण य सव्वलोए, कहं ?, भण्णति-जम्हा तेसिं सट्ठाणं घणोदहिआदि भणियं, तत्थ य बायरनिगोदाणं संभवो सेवालादीणमत्थित्ति, तत्थ सुहुमनियोदाणं अंतोमुहुत्तं भवट्ठिती, ते य बादरणिओएसु पज्जत्तएसु उववज्जमाणा णियउववाएणं सव्वलोए लब्भंति, सुहुमा य सव्वलोएत्ति वयणातो, अत उच्यते-उववाएणं सव्वलोए, तत्थ समुग्घाएणं सव्वलोए कहं ?, तदा बादरनियोदवणस्सतिकाइया सुहुमनिओदत्ताए आउं बंधेत्ता मारणंतियसमुग्घाएणं समोहया पदेसे निच्छुब्भंति, ते उ बादरनिओदपज्जत्तयआउए अक्खीणे ते चेव लब्भंतित्तिकाउं समुग्घाएणं सव्वलोए । बेइंदिया उड्ढलोयतदेकदेसभागे-मन्दरादिवाप्यादिषु अहोलोगतदेकदेसभागे-अहोलोगियगामकूवतलागादिषु,

शेषं गतार्थं। काऊअगणिवण्णाभा, कृष्णोऽग्निर्लोहादीनां ध्मायमानानां। असीउत्तरजोयणसत इत्यादि, असीयं जोयणसतसहस्सं बाहल्लं जीसे पुढवीए सा पुढवी आसीउत्तरसहस्सबाहल्ला। मणुस्साहिगारे समुग्घाएणं सव्वलोएचि जं भणितं तं केवलिसमुग्घायं पडुच। उक्किणंतरा गंभीरा गंभीरखायपरिहा जेसु ताणि भवणाणि उक्कीणंतरगंभीरखातपरिहाणि, उक्किणंतरा इति खायाणं फलिहाणं च अंतरे पाली अत्थित्ति भणितं होति, खायफलिहाणं विसेसो—फरिहा उवरि विसाला अध संकुचिया, खायं तु सममेव। अडतालकोट्ठगयरइयत्ति अडयालीसभेदभिन्नविचित्तछंदगोपुरकलिता, अण्णे भणंति—अडयालीससद्दो किल वसंसावाचको, एवं मालासुवि भाणियव्वं, लाउल्लोइयमहिताइंति लाइतं नाम जं भूमीए छगणाइणा लिंपणं, उल्लोइयं पुण कुड्डमालाणं सेडियादीहिं संमट्ठीकरणं, लाउल्लोइयमहियं लाउल्लोइयं तेण महिता—पूजिताणित्ति लंबितानि लाउल्लोइयमहिता। आसत्तोसत्त इत्यादि, आसत्त इति अवाङ् अधोभूमौ सक्तानि भूमीए लग्गाणि, उसत्त इति ऊर्ध्वं सक्तः-लीनः उल्लोयतलेणं अंतराले आसत्तोसत्ताणि विपुलाणि महति वट्टत्ति—वृत्तानि वग्घारियाणित्ति लंबितानि मल्लदाम इति फुल्लदामाणि कलावफुल्लदामाणि, कलाव इति समुदायाः, ण एकेकं, पासादीया—मनःप्रसादकराः, द्रष्टव्या—दर्शनीयाः,चक्षुषा पश्यन् श्रमं न गच्छतीत्यर्थः, अभिरूपाः—कमनीयाः, प्रतिरूपा इति द्रष्टारं द्रष्टारं प्रति रमणीयाः प्रतिरूपाः, न एकस्य कस्यचित्, भूसणेसु णागफणादीणि चिचाणि, परिवारादिसम्पद् ऋद्धिः, द्युतिः शरीरच्छाया, वलं शक्तिविशेषः, पराक्रमकृतं यशः, सापानुग्रहसामर्थ्यमनुभावः, शेषं गतार्थं, णवरं साणं साणंति स्वकीयानां२, वामेयकुंडलधरा एककण्णावतंसकुंडलधारिणो, शेषं सुगमं, यावत् ईसीपब्भाराए पुढवीए बहुमज्झे देसभाए इत्यादि, अट्ठजोयणिए खेत्ते आयामविक्खंभेणं अट्ठजोयणादि, बाहल्लेणं चट्ट-

त्तणेणंति वुत्तं भवति इति, एयस्स इमा ठवणा। 'तिण्णि सया तेत्तीसा' इत्यादि, पंचधणुसतपमाणाणं हवंति,आह—यदि एवं मरुदेविसामिणीए अहिगयराए होयव्वं, जओ समहियपंचधणुसयाइं पणवीसुत्तराइं, उक्तं च—"नवधणुसयाइं" गाहा (आव०)॥ ततः किमिति चेदुच्यते—इत्थीणंपि संघयणादीहिं कुलगरतुल्लत्तणं, तो भणियं च 'संघयणं संठाणं उच्चत्तं चेव कुलगरेहिं सम'मित्यादि, आचार्य आह—सच्चं भणियं, बाहुल्यमाश्रित्य, तत्त्वतस्तु मनागूना एव भवंति इति, योषित इति न दोषः, गजस्कन्धासीनायाश्च मुक्तिप्राप्तेरित्यदोषः,'चत्तारि य' इत्यादि, सत्तहत्थाणं। 'एक्का य' इत्यादि, दुहत्थाणं कुम्मयसुताईणं,संठाणमणित्थत्थं इदंप्रकारमापन्नमित्थं इत्थं तिष्ठतीति इत्थस्थं न इत्थस्थमनित्थस्थं। फुसति अणंते सिद्धे गाहा॥ ठवणा। शेषं सूत्रसिद्धं॥

प्रज्ञापनाप्रदेशव्याख्यायां द्वितीयपदव्याख्या समाप्ता॥

———*———

साम्प्रतं तृतीयपदमारभ्यते,अस्य चायमभिसंबंधः—प्रथमपदे प्रज्ञापितानां पृथिवीकायिकादीनां द्वितीयपदे च स्वस्थानादिविभागतो निरूपितानां दिगादिविभागेनाल्पबहुत्वसंख्यानिरूपणार्थमिदं प्रक्रम्यते, तथा चाह—'दिसाणुवाएणं सव्वत्थोवा जीवा पच्चत्थिमेण'मित्यादि, इह दिसोऽनेकप्रकाराः प्रथमाङ्गे व्यावर्णिताः, तत्र सूर्योदयोपलक्षिता पूर्वा,शेषाश्च पूर्वदक्षिणादिकास्तदनुक्रमेण वेदितव्याः, नामानि चासां—"इंदग्गेयी जम्मा य णेरती वारुणी य वायव्वा। सोम्मा ईसाणावि य विमला य तमा य बोद्धव्वा॥१॥" आसां च तिर्यग्लोकमध्यगतादष्टप्रदेशिकाद् रुचकात् प्रभवोऽवगन्तव्यः, यथोक्तं—"अट्ठपदेसो रुयगो तिरियं लोगस्स मज्झयारंमि। एस पभवो दिसाणं एसेव भवे अणुदिसाणं॥१॥" दिक्ष्वनुपातो दिगनुपातस्तेन—दिग्विभागेन—दिग्वशेन

दिशोऽधिकृत्येत्यर्थः, सर्वस्तोका जीवाः पश्चिमेन–पश्चिमायां दिशि, इदं चाल्पबहुत्वं बादरानधिकृत्य, न सूक्ष्मान्, यतस्ते सर्व-लोकापन्नाः सर्वत्र प्रायससमा एवेति, तत्र सर्वस्तोका जीवाः पश्चिमेनेत्यत्र भावना–इह सर्वबहवो वनस्पतय इतिकृत्वा यत्र ते बहवः सन्ति तत्र बहुत्वं, तेषां च बहुत्वं जत्थ आउकाओ तत्थ णियमा वणस्सइकाइया इति, पणगसेवालहडादी बादरावि होज्जा, सुहुमा आणागेज्झे अगेज्झे मंसचक्खुणा॥ यथोक्तमनुयोगद्वारेषु "ते णं वालुगा सुहुमस्स पणगजीवस्स सरीरोगाहणाहिंतो असं-खिज्जगुणा"इति, उदकं च बहुयं समुद्देसु दीपद्विगुणविष्कम्भेषु, 'प्राचीप्रतीच्योश्च दिशोः समुद्रेषु चन्द्रसूर्यद्वीपाः संति,यत्र च ते अवगाढास्तत्रोदकाभाव इति,तदभावाच्च वनस्पतिकायाभाव इति,प्रतीच्यां तु गौतमद्वीपो लवणसमुद्रेऽप्यधिकस्तत्र चोदकाभावादल्प-तरा एव जीवा पच्छिमेणंति,पूर्वस्यां तु तदभावाच्चावतैव विशेषेणातिरिच्यंत इति, दक्षिणस्यां तु चन्द्रसूर्यद्वीपाभावात् पूर्वतो विशेषा-धिका इति, उदीच्यां तु संख्येययोजनिकेषु द्वीपेषु माणसो सरो संखिज्जाओ जोयणकोडीओ आयामविक्खंभेणं अतस्तत्र दक्षिणतो-ऽपि उत्तरस्यां विशेषाधिकाः, एतदेव प्रयोजनं आउकाइयवणस्सतिकाइयबेइंदियतेइंदियचउरिंदियपंचिंदियतिरिक्खजोणियाणं चाल्पबहुत्वस्य, तत्र संखादिद्वीन्द्रियप्राभूत्यात्, पिपीलिकादित्रीन्द्रियप्राभूत्यात्, भ्रमरादिचतुरिन्द्रियप्राभूत्यात्, मत्स्यादिपंचेन्द्रि-यबाहुल्याच्च, एवं सामान्येन दिगनुपातेन जीवानामल्पबहुत्वं प्रतिपादितं। इदानीं विशेषेणोच्यते–'सव्वत्थोवा पुढविकाइया दाहिणेण'मिच्यादि, जत्थ जलं न बहुलं तत्थ पुढवी बहुगा, जत्थ सुसिरं तत्थ सव्वे थोवा, तेण दाहिणेण थोवा, जम्हा बहुतरगा भवणा णरगावासा य दाहिणेणंति, जे पुण उत्तरेणं भवणा णरगावासा य ते थोवा, तेण उत्तरेण विसेसाहिया, पुव्वेण विसेसाहिया रविससिदीवे अहिकिचा, अवरेणं विसेसाहिया, गोतमदीवमहिकिचा, आह–यदि गोतमदीवो समतिरिचो पच्छिमाए चेव दिसाए

अहोलोइयगामा अत्थित्तिकाउं तुल्ला चेव, ण पुण विसेसाहिया, उच्यते, नैतदेवं, कुतः?—जतो अहोलोइयगामावगाहो णव जोयणसताणि, दीवस्स पुण छावत्तरं जोयणसहस्समुच्चत्तं, विक्खंभो से बारसजोयणसहस्साति, तेणं अहोलोइयछिद्दे पक्खिप्पितो समाणोऽतिरित्तो भवति, न तुल्लो, तेण विसेसाहिया पुढविकाइया। आउक्काइया जहा ओहिया, सव्वत्थोवा तेउक्काइया दाहिणुत्तरेणमित्यादि, कथं?, यत्र मनुजास्तत्रैव बादरतेजस्कायिकानां सम्भवः, यस्मात्तेषां पाकारंभोऽस्ति, अतः स्तोकास्तेजस्कायिकाः (कदाइ) भरतैरावतेषु चाभावात्, पुरस्तात् संख्येयगुणाः, अवरेणं विसेसाहिया, अहोलोइयगामे पडुच्च, यत्र शुषिरं तत्र वायुः, यत्र घनं तत्र नास्ति, तस्माद् घनत्वात् पूर्वस्यां दिशि अल्पा वायवः, अपरस्यां विशेषाधिकाः, अधोलौकिकग्रामसंभवात्, उत्तरस्यां विशेषाधिका भवनबहुत्वाच्छुषिरबहुत्वमितिकृत्वा, ततोऽपि दक्षिणस्यां दिशि विशेषाधिकाः, भवनबहुत्वादेव। वणस्सइकाइया जहेवोहिया जीवा। नारकसूत्रे नारका दक्षिणेनासंख्येयगुणाः, पापोदयात् कृष्णपाक्षिकत्वाद् बहव उत्पद्यन्त इति, शेषं गतार्थं। मनुष्यसूत्रे उपपत्तिर्यथा बादरतेउकाइयाणं। भवनवासिसूत्रे पुरत्थिमपच्चत्थिमेणं भवणा थोवा, तन्निवासिनोऽपि भवनवासिनो देवाः स्तोकाः, उत्तरेण असंखेज्जगुणाः, यस्मात् स्वस्थानमेव नन्वेषां, दक्षिणस्यां संख्येयगुणाः, भवनबहुत्वात्, यस्मान्निकाये२ चत्वारि भवनशतसहस्राण्यतिरिच्यंते। व्यन्तरसूत्रे यत्र शुषिरं तत्र व्यन्तराः प्रचरंति, यत्र पुनर्घनं तत्र न, तस्माद् घनत्वात् पूर्वस्यां दिशि सर्वस्तोकत्वं, अपरस्यां दिशि विशेषाधिकाः, अधोलोकिकग्रामसंभवात्, उत्तरस्यां विशेषाधिकाः, नगरावासबहुत्वात् स्वस्थानत्वाच्च, ततोऽपि दक्षिणेन विशेषाधिकाः, नगरावासबहुत्वादेव। ज्योतिष्कसूत्रे प्राचीप्रतीच्योः स्तोकाः ज्योतिष्काः, यस्माच्चन्द्रादिद्वीपेषूद्यानकल्पेषु अल्पा राजधान्य इति, दक्षिणस्यां विशेषाधिका विमानबहुत्वात् कृष्णपाक्षिकदक्षिणगामित्वाच्च, उत्त-

कायाद्यल्पबहुत्वं

॥२६॥

रस्यां विशेषाधिकाः, यस्मान् मानसे सरसि बहवो ज्योतिष्काः क्रीडनस्थानव्यापृता नित्यं समासते, मानससरसि च ये मत्स्यादयो जलचरा आसन्नविमानदर्शनकृतनिदानाः किंचित् व्रतं प्रतिपद्य अनशनादि च कृत्वा तत्रोपपद्यंते । सव्वत्थोवा देवा सोहम्मे कप्पे पुरत्थिमपच्चत्थिमेणं, कहं ?, भण्णति–जे आवलियपविट्ठा विमाणा ते चउसुवि दिसासु तुल्ला, जे पुण पुप्फावकिन्ना ते दाहिणेणमुत्तरेण य बहू असंखिज्जवित्थडा य, तेण पुरत्थिमपच्चत्थिमेणं थोवा, उत्तरेणं असंखेज्जगुणा, पुष्पावकीर्णकविमानबहुत्वात् असंख्येययोजनविस्तृतत्वाच्च, दक्षिणस्यां दिशि विशेषाधिकाः,दाहिणगामिए णं कण्हपक्खिए त्तिकाउं, सुक्कपक्खिया अप्पा, एवं जाव माहिंदो, बंभलोए सव्वत्थोवा पुरत्थिमपच्चत्थिमउत्तरेणं,जण्णं कण्हपक्खिया तिरिक्खजोणिया दाहिणेण बहवो उववज्जंति, सुक्कपक्खिया पुण उत्तरेण, तेण दाहिणेण असंखेज्जगुणा, एवं जाव सहस्सारो, शेषं गतार्थं, आणयादिसु बहुसमा, कहं ?, भण्णति–मणुस्सा चेव तेसु उववज्जंतित्तिकाउं । सिद्धसूत्रे सिद्धा मनुष्यवत्, कथं ?, जम्हा पंचसु भरहेरवएसु सिज्झंतित्ति तेण सव्वत्थोवा सिद्धा उत्तरदाहिणेणं, पुरत्थिमेणं संखिज्जगुणा, कहं ?, पंच पुव्वविदेहाणि भरहेरवएहिंतो संखेज्जगुणवित्थडाणि, पच्चत्थिमेण विसेसाहिया, अहोलोइएसु गामेसु सिज्झंतित्तिकाउं । अष्टगतिसमाससूत्रे स्त्रीभ्यो मनुष्याः असंखेज्जगुणाः, सम्मूर्च्छनजानपि गृहीत्वा, नपुंसकवेदोऽत्र न विवक्ष्यते, ते च वान्तादिषु निर्धमनान्तेषु जायंते असंख्येयाः । इंद्रियसूत्रे एकेन्द्रियादिभ्यः पंचेन्द्रिया अल्पतराः, कथं ?, यस्मात् पर्याप्तापर्याप्तकसूत्रे शेषकायेभ्यः अल्पतरा एव पठिता इति, एकेन्द्रियेभ्यः सेन्द्रिया विशेषाधिकाः, केन विशेषेण ?, द्वीन्द्रियादिना, तत्र स्थिता एवैकेन्द्रिया इति । पर्याप्तापर्याप्तकसूत्रे चतुरिन्द्रिया अल्पायुषः पर्याप्ताश्च न चिरमासते अपर्याप्ताश्च बहवो म्रियंते, पंचेन्द्रिया विपर्ययेण, तेन स्तोकाः, इयमत्र भावना–इंद्रियभेदांस्त्रिधा पाटिकासु स्थाप-

इति श्रीप्रज्ञापनाप्रदेशव्याख्यायां पंचमपदव्याख्या समाप्तेति।

—— * ——

साम्प्रतं षष्ठं पदं आरभ्यते, अस्य चायमभिसम्बन्धः-इहानंतरपदे औदयिकक्षायोपशमिकक्षायिकभावाश्रयं पर्यायपरिमाणावधारणं प्रतिपादितम्, इह तु भावतस्तत्साम्यत एव सत्त्वानामुपपातविरहादयश्चिन्त्यन्ते, तत्र द्वावेवाधिकारौ, संग्रहगाथा-'बारस चउवीसा से अंतरं एगसमय कत्तो य। उव्वट्टणपरभवियाउयं च अट्ठेव आगरिसा ॥१॥" निरयगती णं भंते! केवइयं कालं विरहिया उववाएणं पण्णत्तेत्यादि सूत्रं, तत्र नरकगतिरित्यनेन सप्तपृथिवीपरिग्रहः, णमिति वाक्यालंकारे, भदंत! इत्या-

मंत्रणे, केवइयं—कियंतं कालं समयादिलक्षणं विरहितेति—शून्या, केन ?—उपपातेन, तत्रोपपतनमुपपातः, तदन्यगतिकानां सत्त्वानां नारकत्वेन उत्पाद इत्यर्थः, तेन, प्रज्ञप्ता भगवता अन्यैश्च ऋषभादिभिरिति, 'गोयमा ! जहण्णेणं एक्कं समय'मित्यादि, प्रायो निगदसिद्धं, णवरं तिरियगईए गब्भवक्कंतियपंचिंदियतिरिक्खजोणीए अहिकिच्च विण्णेयं, मणुयगतीएवि गब्भवक्कंतियमणुस्से अहिकिच्चत्ति, देवगइएसु ण सव्वे, भवणवणजोइवेमाणिएत्ति, तथा 'सिद्धिगती णं भंते !' इत्यादि, तत्र सिध्यंति—निष्ठितार्था भवंत्यस्यामिति सिद्धिः—लोकान्तक्षेत्रलक्षणा, तथा चोक्तं—'इह बोंदिं चइत्ताणं, तत्थ गंतूण सिज्झति' गम्यत इति गतिः कर्म्मसाधनः, सिद्धिरेव गम्यमानत्वात् गतिः सिद्धिगतिः, सिज्झणयाएत्ति सिद्ध्यमानतयेति, एतद् उपपातव्यवच्छेदार्थं, सकर्म्मकाणां हि उपपात इतिकृत्वा, निर्वचनं सूत्रसिद्धं, एतदुद्वर्त्तनाविरहकालोऽप्यवगंतव्य इति, एवं तावत् सामान्येन नरकादिगत्यपेक्षया जघन्येतरभेदभिन्न उपपातादिविरहकालः प्रतिपादितः। साम्प्रतं सामान्यस्य विशेषानुगतत्वाद्विशेषाणां च सामान्याश्रयत्वाद्विशेषाभिधानार्थः प्रश्नः, 'रयणप्पभापुढविणेरइयाण'मित्यादि, तत्रेह रयणप्पभापुढविणिरयगई णं भंते ! केवइयं कालं विरहिया उववाएण'मित्येवं वक्तव्ये 'रयणप्पभापुढविनेरइयाणं भंते !' इति यदुक्तं तदौदयिकभावविध्युपदर्शनार्थं, उक्तं च—'ओदइए दुविहे पन्नत्ते, तं०—उदये य उदयणिप्फण्णे य' तत्रोदयनिष्पन्नमधिकृत्य सूत्रोपन्यासः, जीवोदयनिप्फण्णे नेरइए तिरिक्खजोणिए इत्यादिवचनात्, अत्र बहु वक्तव्यं तत्तु नोच्यते ग्रन्थविस्तरभयादप्रस्तुतत्वाच्च, शेषं सूत्रसिद्धमेव, णवरं सुद्धओदगो भणति—ण य रयणप्पभादिसु एक्काएवि पुढवीए बारसमुहुत्तिगो परमो उववायविरहकालो भणितो, अविय चउव्वीसादि छम्मासा अवसाणातो, कहं पत्तेयमेगविसेसेऽवि अविज्जति सामण्णगतीए सो भविस्सति ?, उच्यते—सर्वग्रहणादिति, एत्थ दिट्ठंतो—जहा एगंमि नगरे सत्त महापाडगा, तत्थ एगंमि पाडगे ज-

हण्णेण समयंतरेण उक्कोसेण चउवीसेहिंतो मुहुत्तेहिं इत्थिया दारगं पसवति, वीयादिसु जहण्णं तुल्लमेव, उक्कोसेणं सुत्तभणियं सत्त-रत्तादि, जइ य एवं तहावि णगरं पडुच्च बारस मुहुत्ता लब्भंतित्ति भावनीयं, येषां पुनर्जीवानां नारकादिगतिषु विविध उपपातो वर्णितः तैः जीवैः पूर्वभव एव वर्त्तमानैरायुर्बद्धं सत् पश्चादुपपातः, कियति च पूर्वभवायुषि शेषे बद्धमित्यतः प्रश्नः–नेरइया णं भंते ! कतिभागावसेसाउया परभवियाउयं पकरेंतीत्यादि गतार्थं यावत् कतिविहे णं भंते ! आउयबंधे पन्नत्ते इति, तत्र नरकाद्यायुष्ककर्म्मनिषेधककाल एव तत्सहभाविनीनां कर्म्मोत्तरप्रकृतीनां जातिनामगतिनामअवगाहनाप्रकृतीनामपि निषेकं करोति, निषिक्तमिति च निधत्तं, कर्म्मपुद्गलानां प्रतिसमयानुभवनरचनेत्यर्थः, यस्मादुक्तं कर्म्मप्रकृतिसंग्रहणिकायां स्थितिबंध-प्ररूपणाधिकारे–चत्वार्यनुयोगद्वाराणि–ठितिबंधट्ठाणपरूवणा णिसेगट्ठाणपरूवणा आहाकंडगपरूवणा अद्धाच्छेद इति, तत्थ निसेग-परूवणत्थं इमा गाहा 'मोत्तूण सगमबाहं पढमाएँ ठितीएँ बहुतरं दव्वं। सेसे विसेसहीणं जावुक्कोसंति सव्वासिं ॥१॥" अतः उ-च्यते नारकाद्यायुष्कनिषेककाल एव तत्सहभाविनीनां नामकर्म्मोत्तरप्रकृतीनामपि निषेकं करोतीति, अत एव चोक्तं निर्वचनवा-क्ये–छव्विहे आउयबंध इति, जातिनामणिहत्ताउयमित्यादि, अथ किमर्थं पुनर्जात्यादिनामकर्म्मणा आयुर्विशिष्यते ?, उच्यते–आ-युष्कस्य प्राधान्योपदर्शनार्थं, यस्मान्नारकायुरुदये सति जात्यादिनामकर्म्मणामुदयो भवति, नारकादिभवोपग्राहकं च आयुरेव, यस्मात् पन्नत्तीए भणियं–"नेरइए णं भंते ! णेरइएसु उववज्जति ? अणेरइए य नेरइएसु उववज्जति ?, गोयमा ! णेरइए नेरइएसु उववज्जति, नो अनेरइए नेरइएसु उववज्जइ" एतदुक्तं भवति–नारकायुःप्रथमसमयसंवेदनकाल एव नारक इत्युच्यते, तत्सहचारिणां च पंचेन्द्रियजात्यादिनामकर्म्मणामप्युदय इति, तत्र जातिरेकेन्द्रियजात्यादि, गतिर्नारकादि, स्थितिरिति यत् स्थातव्यं तेन भावेन,

अवगाहना येष्वाकाशप्रदेशेषु नारकादीनां वैक्रियादिशरीरमवगाढं,पदेसनिहत्ताउए प्रदेशानां तथा सम्बन्धः,अनुभागो विपाक इति, इदानीं स पुनर्जात्यादीनामायुर्बन्धः कियद्भिराकर्षैरुपात्तानां कर्म्मपुद्गलानां निधत्तीभवतीत्यतः सामान्यप्रश्नः–जीवा णं भंते ! जातिनामनिहत्ताउयं कतिहिं आगरिसेहिं पगरेंतीत्यादि, तत्र आकर्षो नाम कर्म्मपुद्गलोपादानं, यथा गावी पाणियं पीयंती भएण पुणो२ आवृंहति, एवं जीवो तिव्वेण आउयबंधअज्झवसाणेणं एक्कम्मि चेव जातिणामणिहत्ताउयादि पगरेति, विपाक इति, मंदेणं दोहिं तीहिं वा, मंदतरेण तीहिं चउहिं वा, मंदतमेणं पंचहिं छहिं सत्तहिं अट्ठहिं वा, शेषं गतार्थं, अयं चैकाद्याकर्षनियमो जात्यादिनामकर्म्मणामायुर्बंधकाल एव बध्यमानानां, न शेषकालं, आयुर्वन्धपरिसमाप्त्युत्तरकालमपि बन्धः, ध्रुवबन्धिनीनां च ज्ञानावरणादिप्रकृतीनां प्रतिसमयमेव निवृत्तिर्भवति, एतास्तु परावृत्य बध्यंत इत्यलं प्रसंगेन ।

इति श्रीप्रज्ञापनाप्रदेशव्याख्यायां षष्ठपदव्याख्या समाप्तेति ।

——*——

इदानीं सप्तममारभ्यते, अस्य चायमभिसंबंधः–इहानन्तरपदे सत्त्वानामुपपातविरहादयः प्रतिपादिताः, इदानीं नारकादिभावेनोपपन्नानामाहारशरीरेन्द्रियप्राणापानभाषामनःपर्याप्तानां यथासंभवमुच्छ्वासनिश्वासक्रियाविरहकालपरिमाणावधारणार्थं चिन्ता, तत्रेदं सूत्रम्–'णेरइया णं भंते ! इत्यादि,' प्रायो निगदसिद्धं, नवरं यदेवोक्तं आणमंति य तदेवोक्तं ऊससंति तथा पाणमंति तदेव नीससंति,अण्णे भणंति–आणमंति पाणमंति चेत्यनेनाध्यात्मक्रिया परिगृह्यते, ऊससंति वा णीससंति वेत्यनेन बाह्येति, पुढविक्काइया विमायाए विषमा मात्रा विमात्रा, अनियतविरहकालपरिमाणोच्छ्वासेत्यर्थः, देवानां यो यथा महायुस्तस्य तथा

महानुच्छ्वासक्रियाविरहकालः दुःखरूपत्वादुच्छ्वासक्रियाया इति ।

इति श्रीप्रज्ञापनाप्रदेशव्याख्यायां सप्तमपदव्याख्या समाप्तेति ।

---*---

इदानीमष्टममारभ्यते, अस्य चायमभिसम्बन्धः—इहानन्तरपदे सत्त्वानामुच्छ्वासपर्याप्तिनामकाययोगाश्रया क्रिया विरहाविरहकालेनोक्ता, अधुना वेदनीयमोहनीयोदयाश्रयान् ज्ञानदर्शनावरणक्षयोपशमाश्रयांश्च आत्मपरिणामविशेषानेवाधिकृत्य सामान्यप्रश्नमाह—कति णं भंते ! सण्णाओ इत्यादि, तत्र संज्ञा आभोग इत्यर्थः,मनोविज्ञानं इत्यन्ये, संज्ञायते वा अनयेति संज्ञा—वेदनीयमोहनीयोदयाश्रया ज्ञानदर्शनावरणक्षयोपशमाश्रया च विचित्रा आहारादिप्राप्तये क्रियेत्यर्थः, सा चोपाधिभेदाद्भिद्यमाना दशप्रकारा भवति, तद्यथा—आहारसंज्ञेत्यादि, तत्र क्षुद्वेदनीयोदयाद् कवलाद्याहारार्थं पुद्गलोपादानक्रियैव संज्ञायते अनयेत्याहारसंज्ञा, तथा भयवेदनीयोदयाद् भयोद्भ्रान्तस्य दृष्टिवदनविकाररोमाञ्चोद्भेदार्था विक्रियैव संज्ञायतेऽनयेति भयसंज्ञा, तथा पुंवेदोदयान्मैथुनाय स्त्र्यालोकनप्रसन्नवदनमनःस्तम्भितोरुवेपथुप्रभृतिलक्षणा विक्रियैव संज्ञायते अनयेति (मैथुनसंज्ञा,चारित्रमोहविशेषोदयात् धर्मोपकरणातिरिक्ततदतिरेकस्य वा आदित्साक्रियैव) परिग्रहसंज्ञा, तथा क्रोधोदयात् तदाशयगर्भा पुरुषमुखनयनदंतच्छदस्फुरणचेष्टैव संज्ञायतेऽनयेति क्रोधसंज्ञा, तथा मानोदयादहंकारात्मिकोत्सेकादिपरिणतिरेव संज्ञायतेऽनयेति मानसंज्ञा, तथा मायोदयेनाशुभसंक्लेशादनृतभाषणादिक्रियैव संज्ञायतेऽनयेति मायासंज्ञा, तथा लोभोदयाल्लालसान्विता सचित्तेतरद्रव्यप्रार्थनैव संज्ञायतेऽनयेति लोभसंज्ञा, तथा लोभोदयोपशमाच्छब्दाद्यर्थगोचरा सामान्यावबोधक्रियैव संज्ञायते अनयेति ओघसंज्ञा, तथा

तद्विशेषाववोधक्रियैव संज्ञायते अनयेति लोकसंज्ञा, ततश्चौघसंज्ञा दर्शनोपयोगः लोकसंज्ञा तु ज्ञानोपयोग इति, व्यत्ययमन्ये, अन्ये पुनरित्थममिदधते—सामान्यप्रवृत्तिरोघसंज्ञा, लोकदृष्टिर्लोकसंज्ञा, एताश्च सुखप्रतिपत्तये स्पष्टरूपाः पंचेन्द्रियानधिकृत्योक्ताः, एकेन्द्रियादीनां तु प्रायो यथोक्तक्रियानिबंधनकर्मोदयादिपरिमाणरूपा एवावगंतव्या इति, उक्तं च—"चउहिं ठाणेहिं आहारसण्णा समुप्पज्जति, तं०—ओमकोट्ठयाए छुहावेयणिज्जस्स कम्मस्स उदयेणं मतीए तदट्ठोवओगेणं, चउहिं ठाणेहिं भयसण्णा समुप्पज्जति, तं०—अवचियमंससोणिययाए मोहणिज्जस्स कम्मस्स उदएणं मतीए तदट्ठोवयोगेण य, चउहिं ठाणेहिं मेहुणसण्णा समुप्पज्जति, तं०—चियमंससोणिययाए मोहणिज्जस्स कम्मस्स उदएणं मतीए तदट्ठोवओगेणं, चउहिं ठाणेहिं परिग्गहसण्णा समुप्पज्जति, तं०—अविमुत्तयाए लोभवेयणिज्जस्स कम्मस्स उदएणं मतीए तदट्ठोवओगेणं, कोहादिसण्णा कोहादिवेयणिज्जोदयओ भवंति, तहा नेरइया उस्सण्णकारणं पडुच्च भयसण्णोवउत्तत्ति, अत्र बहु अल्पं बाह्यकारणं प्रतीत्येति, भावं पडुच्च आहारसण्णोवउत्ता इत्यादि, इहान्तरानुभवभावः संतिभाव इत्युच्यते, ततश्चाल्पबहुत्वचिंतायां परिग्गहसण्णोवउत्ता संखेज्जगुणत्ति यदुक्तं तदप्यविरुद्धं, सरीरकुंतादिसु प्रभूततराणां परिग्रहसंज्ञासद्भावादिहार्थार्थमेव भयसंज्ञासंभवाद्, एवमन्यत्राप्युक्तानुसारतो भावनीयमिति ।

इति श्रीप्रज्ञापनाप्रदेशव्याख्यायां अष्टमपदव्याख्या समाप्तेति ।

—*—

साम्प्रतं नवममारभ्यते, अस्य चायमभिसम्बन्धः—इहानन्तरपदे सत्त्वानां संज्ञापरिणामाः प्रतिपादिताः, साम्प्रतं योनयः प्रतिपाद्यंते, तत्रेदमादिसूत्रं—'कतिविहा णं भंते! जोणी'त्यादि, तत्र योनिरिति कः शब्दार्थः?, यु मिश्रणे, युवंत्यस्यां जीवा ॥६२॥

इति योनिः-तैजसकार्मणशरीरवन्तः सन्तः औदारिकवैक्रियशरीरयोग्यस्कन्धसमुदायेन मिश्रीभवन्तीत्यर्थः, "जोएणं कम्मएणं०" गाहा, योनिरिति च सामान्यं, तस्य सचित्तशीतसंवृत्तादिभेदाः, अतस्तद्भेदोपदर्शनार्थं तिविधा येत्यादि, तत्र नारकाणां यदुपपातक्षेत्रं तच्छीतस्पर्शपरिणतं अन्यत्र परिणतं, तत्रोत्पन्नत्वाच्छीतयोनिकाः उष्णयोनिकाश्च नारका भवंतीति, भवनवासिनामुपपातक्षेत्रं शीतोष्णस्पर्शपरिणतं तत्रोत्पन्नत्वाच्छीतोष्णयोनिकाः, एकेन्द्रियाणामग्निकायवर्जानां यावत् संमूर्च्छनजपंचेन्द्रियतिरश्चां सम्मूर्च्छनजमनुष्याणां च शीतादित्रिविधस्पर्शपरिणाममुपपातक्षेत्रमिति त्रिविधयोनिका भवंति, एवं गब्भवक्कंतियपंचिंदियतिरिक्खजोणियाणं गब्भवक्कंतियमणुस्साणं, वाणमंतरजोइसियवेमाणियदेवाणं जहा भवणवासीणं, नारकाणां यदुपपातक्षेत्रं तन्न केनचिज्जीवेन परिगृहीतमिति अचित्ता योनिः, सत्यप्येकेन्द्रियसूक्ष्मजीवनिकायसंभवे, एवं भवनवासिनामपि, पृथिवीकायिकादीनां यावत् संमूर्च्छनजमनुष्याणामुपपातक्षेत्रे परिगृहीते चापरिगृहीते चोभयरूपेणोत्पत्तिरिति त्रिविधा योनिः, गब्भवक्कंतियपंचिंदियतिरिक्खजोणिया गब्भवक्कंतियमणुस्सा य यत्र जायंते तत्र अचित्ता अपि पुद्गलाः शुक्रशोणितादयः संतीति मिश्रा योनिः, व्यंतरादयो यथा भवनवासिनः, नारकाणां योनिः संवृता, नरकनिष्कुडा संवृतगवाक्षकल्पास्तत्र जाता वर्द्धमानमूर्त्तयस्तेभ्यः पतंति, शीतेभ्य उष्णेषु उष्णेभ्यश्च शीतेषु, एवमसुरकुमारादीनामपि संवृता योनिः, 'देवसयणिज्जंसि देवदूसंतरिए अंगुलस्स असंखिज्जइभागमेत्ताए सरीरोगाहणाए उववण्णा' इति वचनात्, एवं सर्वदेवानां संवृता योनिरेकेन्द्रियाणां च, द्वीन्द्रियाणां चतुरिन्द्रियपर्यवसितानां विवृता योनिः, पंचिंदियतिरिक्खजोणियाणं मणुस्साण य संवृतविवृता योनिरिति, शेषं प्रकटार्थं यावत् पदसमाप्तिरिति ।

इति श्रीप्रज्ञापनाप्रदेशव्याख्यायां नवमपदव्याख्या समाप्तेति ।

सारूप्रतं दशममारभ्यते, अस्य चायमभिसम्बन्धः—इहानन्तरपदे सत्त्वानां योनयः प्रतिपादिताः, साम्प्रतं यत्तत् उपपातक्षेत्रं रत्नप्रभादि तस्य चरमाचरमविभागप्रदर्शनार्थमिदं प्रक्रम्यते, तत्रेदमादिसूत्रं—'कइ णं भंते! पुढवीओ पण्णत्ताओ' इत्यादि, निगदसिद्धं यावत् 'इमा णं भंते! रयणप्पभा पुढवी किं चरिमा अचरिमे'त्यादि पुच्छा, अथ केयं चरमाचरमपरिभाषेति?, अत्रोच्यते—चरिमं नाम प्रांतपर्यन्तवर्त्ति, आपेक्षिकं चरमत्वं, यदुक्तमन्यद्रव्यापेक्षया इदं चरमं द्रव्यमिति, यथा पूर्वशरीरापेक्षया चरमं शरीरमिति, तथा अचरमं नाम प्रान्तमध्यवर्त्ति, आपेक्षिकं चाचरमत्वं, यदुक्तमन्यद्रव्यापेक्षया इदमचरमद्रव्यं, यथाऽन्यशरीरापेक्षया मध्यशरीरमिति, चरमाइं अचरमाइंति बहुवचनप्रश्नः, चरिमंतप्रदेशा अचरिमंतपदेसत्ति, चरमान्येवान्तवर्त्तित्वादन्ताश्चरमान्ताः तेषां प्रदेशा इति समासः, तथा अचरममेवान्तः अचरमान्तस्तस्य प्रदेशा इति विग्रहः, अचरिमान्तप्रदेशा इति भावनीयं, गो०! णो चरिमा णो अचरिमा, चरिमाचरिमत्वमेतदापेक्षिकं, अपेक्षाऽभावाच्च कथं चरिमा भविष्यति, अचरमत्वमप्यन्यापेक्षयैव भवति, कथमन्यापेक्षया चरिमत्वं?, यदि रत्नप्रभाया बाह्यतोऽन्या पृथिवी स्यात् तस्यामवस्थायामचरमत्वं युज्यते, न चास्ति, तस्मान्नाचरमा, अयं च वाक्यार्थः—किमियं रत्नप्रभा पश्चिमा उत मध्यमेति, तदेवत् द्वितीयमपि यथा न संभवति तथोक्तं, इदानीं नोचरिमाइंति नोअचरिमाइंति, कहं?, यदा चरमव्यपदेशा चेव नत्थि तदा चरिमाइं कहं भविस्संति, एवं अचरिमाइंपि, तेण णोचरिमाइं णोअचरिमाइं, णोचरिमंतपदेसा णोअचरिमंतपदेसत्ति, अत्रापि चरमत्वस्याचरमत्वस्य चाभावात् प्रदेशकल्पनाया अप्यभाव इत्यत उक्तलक्षणा णोचरिमंतपदेसाणोअचरिमंतपदेसा रत्नप्रभेति, किं तर्हि?, नियमेन अचरिमं चरिमाणि य, एतदुक्तं भवति—अवश्यंतयैव केवलभंगवाच्या न भवति, अवयवावयविरूपत्वादसंख्येयप्रदेशावगाढत्वाद्यथो-

क्तनिर्वचनविषयैवेति, तथाहि–रत्नप्रभा तावदनेन प्रकारेण व्यवस्थिता इति विनेयजनानुग्रहाय लिख्यते, एवमवस्थितायां यानि
मान्तेषु व्यवस्थितानि तदध्यासितक्षेत्रखण्डानि तानि तथाविधविशिष्टैकपरिणामयुक्तत्वाच्चरमाणि, यत् पुनर्मध्ये महद् रत्नप्रभाक्रान्तं
क्षेत्रखण्डं तदपि तथाविधपरिणामयुक्तत्वादचरिमं, उभयसमुदायरूपा चेयं, अन्यथा तदभावप्रसंगात्, तथा प्रदेशपरिकल्पनायां
तु चरिमंतपदेसा य अचरिमंतपदेसा य, कहं ?, जे बाहिरखंडपदेसा ते चरिमंतपदेसा जे मज्झखंडपदेसा ते अचरिमंतपदेसा
इति, अत्र अन्ये तु व्याचक्षते–तथाविधप्रविष्टेतरप्रान्ताक्रान्ते प्रदेशेऽर्द्धश्रेणिपटलरूपाणि चरिमाणि, मध्यस्त्वचरिम इति, न चेत्थ-
मपि कश्चिद्दोष इति, चरिमंतपदेसा य अचरिमंतपदेसा यत्ति, पूर्ववदेकान्तदुर्नयनिरासप्रधानेन निर्वचनसूत्रेण अवयवावयवि-
रूपं वस्त्वित्याह, तयोश्च भेदाभेद इति, एवं जाव अहेसत्तमाए, ईसीपब्भाराए, अलोए णं किं चरिमे अचरिमे पुच्छा, गोयमा ! अचरिमे
चरिमाणि य, चरिमाणि ताव जाणि लोकदंतएसु पविट्ठाणि, शेषमन्यदचरिमं, चरिमंतपदेसा य अचरिमपएसा य तथैव, इमीसे णं भंते !
रयणप्पभाए पुढवीए अहे० चरिमस्स चरिमाण य चरिमंतपदेसाण य अचरिमंतपएसाण य पुच्छा, गोयमा ! सव्वत्थोवा दव्वट्ठयाए एगे
चरिमे, कथं ?, स्कन्धपरिणामं प्रतीत्य, यच्चदचरमं तत् स्कन्धपरिणामेन परिणतत्वादेकमेव द्रव्यं, तथैव स्कन्धस्य चरिमा दव्वा ते
असंखिज्जगुणा, यस्मादसौ महास्कन्धः तस्मादसंख्येयगुणो, इदाणीं चरिमाणं दव्वाणं अचरिमं चरिमाणि य समुदितानि किं तुल्लाइं ?,
चरिमा साहिया इति, अत आह–अचरिमं चरिमाणि य दो विसेसाहियाइं, कहं ?, जं तं अचरिमं दव्वं तं चरिमदव्वेसु पक्खित्तं
ताहे तं विसेसाहियमेव भवति चरिमदव्वाणं, पदेसट्ठयाए पुण सव्वत्थोवा चरिमंतपदेसा, अचरमपएसा असंखिज्जगुणा एव, चरमंतप-
देसा स्तोकाः, पृथिवीन्यासेऽप्येवमेव दृश्यन्ते, चरिमंतपदेसा य अचरिमंतपदेसा य दो विसेसाहिया अचरिमंतपदेसेहिंतो, कहं ?, चरिमं

तपदेसा अचरिमंतपदेसरासिंमि पक्खिया समहिया चेव अचरिमंतपदेसरासीतो, न दुगुणाइगुणा चेति,तेण चरिमंतपदेसा अचरमंतपएसा य समुदिया दोवि विसेसाहिया दव्वट्ठयाए पदेसट्ठयाए सव्वत्थोवा,एगे अचरिमे चरिमाइं असंखेज्जगुणाइं,अचरिमं चरिमाणि य दोवि विसेसाहियाइं,चरिमंतपदेसा असंखिज्जगुणा,कहं ?,अचरिमसमुदायस्स चरिमंतपदेसा असंखिज्जगुणा दव्वसमुदायं पडुच्च,जो अचरिमचरिमदव्वसमुदायो दव्वाणं तस्स दव्वस्स समुदायस्स जे चरिमदव्वाणं पदेसा ते असंखिज्जगुणा, जम्हा एगमेव दव्वं-असंखेज्जपदेसोगाढं,चरिमंतपदेसेहिंतो अचरिमंतपदेसा य असंखिज्जगुणा, जम्हा अचरिमं दव्वं चरिमे दव्वसमुदायस्स असंखिज्ज-गुणमेव तेण पदेसेहिंतोवि असंखिज्जगुणं भविस्सति,चरिमंतपदेसा जे लोगदंतेसु पविट्ठा, अचरिमंतपदेसा य ते णवरं अणंतगुणा, कथं ?, अनन्तत्वादलोकस्य,लोगस्स णं भंते ! अचरिमस्स य चरिमाण य पुच्छा, गोयमा ! सव्वत्थोवा लोगागासस्स दव्वट्ठयाए एगमेगे अचरिमे य, लोकस्यापि द्रव्योपचारेण एकमचरमद्रव्यं, अलोकस्याप्येकमचरमद्रव्यं एकद्रव्यत्वात् सर्वस्तोकं, लोगस्स चरिमाइं असंखिज्जाइं, अलोगस्स पुण ततोहिंतो विसेसाहियाइं, जम्हा अलोगंतपदेसेसु गणिज्जमाणा पृथिवीन्यासेन समतिरिक्ता दृश्यन्ते, तेण अलोगस्स चरिमाइं विसेसाहियाइं, लोगस्स अलोगस्स य चरिमाणि समुदिताणि विसेसाहियाइं, जम्हा लोगचरि-मरासी वीसा ठाविओ अलोगचरिमाचरमरासी बत्तीसा, एयस्स लोगालोगागासस्स चरिमअचरिमरासी य संखिज्जन्तो विसे-साहियओ भवति, एवं बत्तीसाए बावण्णा विसेसाहिया, पदेसट्ठयाए पुण सव्वत्थोवा लोगस्स चरिमंतपदेसा, अलोगस्स चरिमंतपदेसा विसेसाहिया, जम्हा लोगचरिमंतपदेसेसु अलोगचरिमंतपदेसा पृथिवीन्यासेन गण्यमानाः समतिरिक्ता एव दृश्यन्ते, लोगस्स अचरिमंतपदेसा असंखेज्जगुणा अलोगचरिमपदेसेहिंतो, कथं ?, यस्मात् क्षेत्रमेव तद् बहु, क्षेत्रबहुत्वाच्च

प्रदेशबहुत्वमपि, तेण अचरिमंतपदेसा लोयस्स असंखिज्जगुणा, अलोगस्स पुण अचरिमंतपदेसा अणंतगुणा, लोगस्स अचरिमंतपदेसेहिंतो कथमनन्तगुणता ?, क्षेत्रस्यानन्तगुणत्वादेव, लोगस्स अलोगस्स य चरिमंतपदेसा य अचरिमंतपदेसा य दोवि विसेसाहिया, तथैव पूर्वन्यायेन विंशतिर्द्वात्रिंशद्वा संक्षेपतः द्रष्टव्यं, दव्वट्ठपदेसट्ठयाए सव्वत्थोवा लोगालोगस्स दव्वट्ठयाए एगमेगे अचरिमे, यस्मात्तदेकमेव द्रव्यं स्कन्धपरिणतं, लोगस्स चरिमाइं विसेसाहियाइं, जम्हा अलोगचरिमंता लोगचरिमंतएसु पविट्ठा गणिज्जमाणा समतिरित्ता एव दृश्यन्ते पृथिवीन्यासे, लोगस्स य अलोगस्स य अचरिमाइं चरिमाणि य दोवि विसेसाहियाइं, कथं ?, अलोगचरिमाचरिमरासी बत्तीसा बुद्धीए ठाविऊण लोगचरिमरासी वीसं, एत्तो लोगचरमरासिंमि अलोगचरिमरासिं अचरिमाणि य दुवेण्हंपि एगत्थ संखिवेज्जा, जाता बावण्णा, तेण समुदिता विसेसाहिया, विसेसाहिया ण संखेज्जगुणा, जेण दुगुणावि न भवंति, लोगस्स चरिमंतपदेसा असंखिज्जगुणा, यस्माद्द्रव्यं प्रदेशगणनया गण्यमानमसंख्येयमेव, अलोगचरिमंतपदेसा विसेसाहिया, जम्हा चरिमंताणि चेव समतिरित्ताणि तेण पदेसा विसेसाहिया, लोगस्स अचरिमंतपदेसा असंखिज्जगुणा अलोकचरिमान्तप्रदेसेभ्यः, यस्मात् क्षेत्रं एकमेव तद् बहु, अलोगस्स अचरिमंतपदेसा अणंतगुणा, कथं ?, यस्मादनन्तगुणमेव तत् क्षेत्रं, लोकस्य अलोकस्य च चरिमंतपदेसा य अचरिमंतपदेसा य विसेसाहिया, पूर्वाभिहितेनोपायेन वक्तव्यं, सव्वद्व्वाणि विसेसाहियाणि । परमाणुपोग्गले णं भंते ! किं चरिमे अचरिमे अव्वत्तए पुच्छाए छव्वीसं भंगा, ते य इमेण विहिणा ठाविज्जंति–चरिमे अचरिमे अव्वत्तव्वए चरिमाइं अचरिमाइं अव्वत्तव्वयाइं, एते पत्तेयभंगा, ततो चरिमे अचरिमे चउभंगी, ततो चरिमे य अवत्तव्वए य चउभंगी, ततो अचरिमे य अवत्तव्वए य चउभंगी, ततो चरिमे य अचरिमे य अवत्तव्वए य अट्ठ भंगा, एवं

एते छव्वीसं भंगा, गोयमा! परमाणुपोग्गला ण चरिमे ण इत्यादि, न चरम इत्येकत्वादसहायत्वादेकप्रदेशावगाहत्वात्, तथा नाचरमः अमध्यत्वान्निरवयवत्वात्, किंतु अवत्तव्वए, अवक्तव्यको नाम चरमाचरमव्यपदेशकारणशून्यः,स उभयथापि वक्तुमशक्यत्वादवक्तव्यक इति,अस्य स्थापना,णो चरिमाइं इत्यादि सूत्रसिद्धं याव दुपएसिएणं भंते! इत्यादि,अत्र निर्वचनं गो०! सिय चरिमे णो अचरिमे सिय अवत्तव्वए,अयमत्र भावार्थः–यदा दुपदेसिओ दोसु पदेसेसु समसेढीए एवमोगाहति तदा चरिमे,णो अचरिमेत्ति, सर्वद्रव्याणामेव केवलाचरमत्वस्यायोगात्,जया पुण स एगंमि पदेसे एवमोगाहति तदा अवत्तव्वए,शेषं सूत्रसिद्धं,यावत् तिपदेसिएणं भंते! इत्यादि,अत्र निर्वचनं गोयमा! सिय चरिमएणो अचरिमे सिय अवत्तव्वए,अयमत्र भावार्थः-यदा दुपएसिए दोसु पदेसेसु समसेढीए एवमवगाहति तदा चरिमे णो अचरिमे इत्यादि, अत्र लाघवार्थमुक्तानुक्तविधिमानभंगोपदर्शनाय संग्रहगाथामाह–'परमाणुम्मि य ततितो पढमो ततिओ य होइ दुपदेसे' तृतीयोऽवक्तव्यकः,स दर्शित एव,पढमे चरमो सद्दहितो,ततिओ य अवत्तव्वयाभिहाणो होति दुपएसे खंधे, एएवि दरिसिता चेव, 'पढमो ततिओ णवमो एक्कारसमो य तिपदेसे' इयमत्र भावना–जदा दो एगो य, एएसु पएसेसु समसेढीए एवमवगाहति तदा चरिमववदेसं लभति, एस पढमो भंगो, जदा पुण स एगंमि पदेसंमि अवगाहति तदा अवत्तव्वगववएसं पावतित्ति एस ततिओ, यदा पुण स एव तिपएसिओ तिसु पएसेसु समसेढीए अवगाहति तदा चरिमाइं च अचरिमे यत्ति अभिहाणमासादेति, कहं?, एत्थ जे अंतिमेल्ला दो परमाणू ते परोप्परमसंसत्तत्तणतो चरिमाइं, जो मज्झे स मध्यवर्तित्वादेवाचरम इत्येवं नवमः,यदा पुण स एव तिपदेसिओ तिसु पदेसेसु समसेढिविसेढीए एवमवगाहति तदा चरिमे य अवत्तव्वा यत्ति संलप्पति, कहं?, जे दो परमाणू समसेढी सा अवत्तव्वगत्तिकट्टु एक्कारसमो, एतं असंमोहत्थं भणियं, लक्खणावि अणु-

पुव्वीठ्ठवणाए दंसिज्जति—परमाणुम्मि दुपएसिए तिपदेसिएत्ति भावार्थः, चतुपदेशिकभंगान् प्रतिपादयन्नाह—पढमो ततिओ नवमो दसमो एक्कारसो य बारसमो । भंगा चउप्पदेसे तेवीसइमोऽवि दठ्ठव्वो ॥१॥ अयमत्र भावार्थः—जया चउप्पदेसितो दोसु पदेसेसु समसेढीए एवमवगाहति तदा चरिमंति भण्णति, एस पढमो, यदा पुण स एगंमि पदेसे एवमवगाहति तदा अवत्तव्वयत्ति बुचति, स ततिओ, जया पुण स एव तिसु पएसेसु समसेढीए एवमवगाहति तदा चरिमाइं च अचरिमे यत्ति शब्द्यते, एस नवमो, चरिमो भावितार्थ एव, जदा पुण स एव चउसु पदेसेसु समसेढीए एवमवगाहति तदा चरिमाइं च अचरिमाइं कीर्त्यते, कहं ?, जे अंतिमिल्ला दो परमाणू ते चरिमाइंति, जे मज्झे दो ते अचरिमाइंति, एस दसमो, जया पुण एसोवि तिसु पदेसेसु समसेढीविसमसेढीए एवमवगाहति तदा चरिमे य अवत्तव्वए यत्ति व्याख्यायते, एस एक्कारसमो, भावितार्थः, एवं जदा पुण स एव जं चउसु पदेसेसु दो समसेढीए दो विसमसेढीए एवमवगाहति तदा चरमाइं अवत्तव्वाइंति अभिलप्पते, कहं ?, जं समसेढिया दो ते चरिमाइं जे विसेढिया ते अवत्तव्वयाइं, एस बारसमो, जदा पुण स एव चतुप्पदेसियो चउसु पदेसेसु समसेढीविसेढीए एवमवगाहति, तदा चरिमाइं च अचरिमे य अवत्तव्वए य,एस तेवीसइमो,प्रकटार्थश्चेति,संपतमेते असमोहत्थं भणियलक्खणावि अणुपुव्वीठवणाए दंसिज्जए प्रथमादयश्चतुष्प्रदेशिकेति गाथार्थः, पंचप्रदेशिकभंगान् प्रतिपादयन्नाह 'पढमो ततिओ सत्तम नव दस एक्कारसो य बारसमो । तेवीस चउव्वीसो पणवीसइमो य पंचमए ॥१॥ इदमत्र हृदयं—जदा पंचपदेसिओ दोसु समसेढीए एवमवगाहति तदा चरमंति भण्णंति, एस पढमो, जदा पुण स एगमेगम्मि पदेसे एवमवगाहति तदा अवत्तव्वगंति वुच्चति एस ततिओ,जदा पुण स एव पंचसु पदेसेसु एवमवगाहति तदा दो चरिमे अचरिमे यत्ति शब्द्यते, कथं ?, इह ये चरिमा चत्तारि परमाणू तेसिमेग-

संबंधपरिगणणओ एगरूवत्तं एगवण्णत्तं एगरसत्तं एगफासत्तं पडुच्च एकव्यपदेशः, एकव्यपदेशत्वे च सति चरिमेत्ति भण्णति,
जो पुण मज्झे सो अचरिमोत्ति एस सत्तमोत्ति, जया पुण स एव तिसु पदेसेसु समसेढीए एवमवगाहति तदा चरिमाइं च अव-
त्तव्वए यत्ति कीर्त्यते, एप नवमो, भावितार्थमेव, जया पुण स एव चउसु पदेसेसु समसेढीए एवमवगाहति तदा चरिमे य अव-
त्तव्वयाइं च, एसो बारसमो विज्ञातार्थ एव, जया पुण स एव पंचसु पदेसेसु समसेढीविसमसेढीए एवमवगाहति तदा चरिमाइं
च अवत्तव्वए य, जया दो समसेढीए तहिंपि दो चरिमाइं जो एगो विसेढीए सो अवत्तव्वगंति, एस तेरसमो, जया पुण स एव
चउसु पदेसेसु समसेढीविसमसेढीए एवमवगाहति तदा चरिमाइं च अचरिमे य अवत्तव्वए य, एत्थ जे अंतिमिल्ला ते चरिमाइं,
जो मज्झपदेसो सो अचरिमं, जो विसेढीओ सो अवत्तव्वगंति, एस तेवीसइमो, जदा पुण स एव पंचपदेसिओ पंचसु पदेसेसु सम-
सेढिविसेढिए एवमवगाहति तदा चरिमाइं च अचरिमाइं च अवत्तव्वए य, एस पणुवीसइमो, भावितार्थ एव, साम्प्रतमस्य स्पष्ट-
संवेदनाऽसन्मोहार्थोक्तलक्षणाऽपि विधिवदनुक्रमस्थापनया दृश्यन्ते प्रथमादयः पंचप्रदेशिक इति गाथार्थः । विधिप्रतिषेधरूप-
त्वाच्छास्त्रस्य विधिना अणुद्व्यणुकादीनां भङ्गकानभिधाय साम्प्रतं प्रतिषेधभंगकनिषेध्यद्वारेण षट्प्रदेशिकविधीयमानभंगोपदर्शनाये-
दमाह—"बिचउत्थ पंच छट्ठं पण्णर सोलं च सत्तरट्ठारं । वीसेक्कवीसबावीसकं च वज्जेज्ज छट्ठंमि ॥१॥" एतदुक्तं भवति—अत्र द्विती-
यादयो यथोक्ता भंगा वज्जंते, किं कारणं?, उच्यते—इह बितियभंगो अचरिमो, अचरिमं च केवलं चरमरहियं दव्वमेव णत्थि,
प्रान्ताभावे चरमाभावादिति भावना, तथा चउत्थो चरिमाइं, पंचमो अचरिमाइंति छट्ठो अवत्तयाइं च, पण्णरसमो अचरिमे य
अवत्तव्वयाइं च सोलसमो अचरिमे य अवत्तव्वयाइं च सत्तरसमो अचरिमाइं च अवत्तव्वए य अट्ठारसमो अचरिमाइं च अवत्त-

व्वयाइं च, एयप्पगारं लोए दव्वमेव णत्थि, केवलचरमादीनामभावादित्यत एवोपन्यस्तभंगकदम्बकं स्वरूपतो भावनीयमेतदिति, वीसइमो पुण चरिमे य अचरिमे य अवत्तव्वगाइं चत्ति एयारूवो सत्तपदेसियस्सेवत्तिकट्टु, एवं एगवीसइमोवि चरिमे य अचरिमाइं च अवत्तव्वए यत्ति एसोवि एरिसो सप्तप्रदेशिकस्यैवेतिकृत्वा, बावीसइमो पुण चरिमे य अचरिमाइं अवत्तव्वगाइं चत्ति एरिसो अट्ठपदेसियस्सेव भवतित्तिकृत्वा परिगृह्यते, एत्थ चोदगो भणति–णणु छट्ठं भंगो अवत्तव्वगाइं इमेण रूवेण होइ, एत्थ किं पडिसिद्धाइं, दुपएसियादिसु य किं णो विहियाइंति?, उच्यते, ण, एयारूवं दव्वं नत्थि, कथं ज्ञायते इति चेदाचार्यो प्रवृत्ति-र्यदि स्यात् प्रतिपादयेत् न च प्रतिपादितं, भावे वा जातिपरनिर्देशादिना तृतीयभंग एवान्तर्भाव इति, शेषास्तु प्रथमभंगादयो यथार्थं गम्यंते, भवंतीति, तेऽपि विनेयानुग्रहार्थमुपदर्श्यंत एव–यदा स्वाप्य एएसिं दोसु पदेसेसु समसेढीए एवमवगाहति तदा स चरिमो, स एव जदा एगंमि पदेसे एवमवगाहति तदा अवत्तव्वए, स एव जया पंचसु पदेसेसु एगपरिक्खेवेण तदा अचरिमे चरिमे, यदा पुण स एव छसु पएसेसु एगपरिक्खेवेणं एगाहिएणं एवमवगाहति तदा चरिमे य अचरिमाइं च, एत्थ एगे आयरिया एवं भणंति–जे अंतिमिल्ला चत्तारि परमाणू ते चरिमं जे मज्झिल्ला दो ते अचरिमाइं, अण्णे भणंति–चउण्हं खेत्तपदेसं भवा उवहियत्तणओ ऊ ण एगपरिणामो जुत्तो तम्हा ण भवति चेव एस भंगो, पडिसिद्धो य सुत्ते, जओ भणियं–छट्ठं च, एयस्स अत्थो पाययसेलीए इमो–छट्ठं अट्ठमं च, जहावि एतारूवो छप्पएसिओ होति तहावि एवं गमिज्जति–जे एगाबोढंतगा चत्तारि परमाणू ते तथैकपरिणामपरिणतत्वात् चरमंतः तदधिकोऽपि विसमश्रेण्यैव प्रतिबद्धत्वादतिरिक्त इत्येकमेव चरमं, पुनश्च अधिग-विढितो मध्यवर्त्तित्वादनेकपरिणामत्वाद्वस्तुनि अचरमोवि घेप्पति, ततो अचरिमाइवि हवंति, तदा न कश्चिद्विरोधः, अन्यथा ॥७१॥

त्वाऽऽगमाविरोधेन भावनीयं, यथा न दोषः, विचित्रपरिणामसंभवाद्, अलं प्रसंगेन, तत्त्वमत्र केवलिनो विदंति, विशिष्टश्रुतविदश्च, जदा पुण स एव तिसु पदेसेसु समसेढीए एवमवगाहति तदा चरिमाइं च अचरिमे य, जया पुण स एव चउसु पदेसेसु समविसमसेढीए एवमवगाहति तदा चरिमाइं अचरिमाइं च, यदा पुण स एव तिसु पदेसेसु समसेढीविसेढीए एवमवगाहति तदा चरिमे य अवत्तव्वए य, यदा पुण स एव चउसु पदेसेसु समसेढीविसेढी एवमवगाहति तदा चरिमे य अवत्तव्वयाइं, जया पुण स एव पंचसु पदेसेसु समसेढीविसेढीए एवमवगाहति तदा चरिमाइं च अवत्तव्वए य, यदा पुण स एव छसु पदेसेसु समसेढिविसमसेढीए एवमवगाहति तदा चरिमाइं च अवत्तव्वयाइं च, जदा पुण स एव छसु पदेसेसु एगपरिक्खेवेगं एगाहिगेणं एवमवगाहति तदा चरिमे य अचरिमे य अवत्तव्वए य, जदा पुण स एव चउसु पदेसेसु समविसमसेढीए एवमवगाहति तदा चरिमाइं च अचरिमे य अवत्तव्वए य, जया पुण स एव पंचसु पदेसेसु समसेढीविसमसेढी एवमवगाहति तदा चरिमाइं च अचरिमे य अवत्तव्वयाइं च, जदा पुण स एव पंचसु पदेसेसु समसेढीए विसमसेढीए एवमवगाहति तदा चरिमाइं च अचरिमाइं च अवत्तव्वए य, जया पुण छप्पएसिओ छसु चेव पएसेसु समसेढिविसमसेढीए एवमवगाहति तदा चरिमाइं च अचरिमाइं च अवत्तव्वयाइं, एवं ताव छप्पएसियस्स संभवभंगा णिदंसियत्ति गाथार्थः। इदाणीं सत्तपदेसियमहिगिच्च भण्णति–बिचउत्थ पंच छट्ठं पण्णर सोलं च सत्तरहारं। वज्जिय बावीसइमं सेसा भंगा उ सत्तमए ॥१॥ इदं गाथासूत्रं वस्तुतो भावितार्थमेव, नवरं बावीसइमो भंगो अट्ठपदेसियस्स हवति तेण वज्जिज्जति, दंसिओ य सो, सेसा पुण सव्वखंधेसु चेव वज्जिज्जंति, दर्शितमिदं विनेयजनानुग्राहार्थं ठवणामेत्तेण चेव सेसा पुण जे भवंति ते णिदंसिज्जंति; एतेसिं भावणा–जम्हा सत्तपदेसियस्स एगंमि पदेसे दोसु तिसु चउसुवि जाव सत्तसुवि ॥७२॥

अवगाहो भवति तेण एते भंगा भवंतित्ति जाणियव्वा; इदानीं अट्ठपदेसियमधिकृत्येदमाह–विचउत्थपंचछट्ठं पण्णर सोलं च सत्तरऽट्ठारं। एते वज्जिय भंगा सेसा सेसेसु खंधेसु ॥१॥ अयमभिप्रायो भवितार्थ एव, णवरं सेसा जे सत्तपदेसिए रतिता बावीस तिमो य एयारूवो, एते सेसेसु अट्ठपदेसगादिसु भवंति, जम्हा अट्ठपदेसगाणवि एगादिपदेसेसु अवगाहो हवति चेव, अण्णे पढंति–'एते वज्जिय भंगा, तेण परमवट्ठिया सेसा,, कथं ?, यस्मादसंख्येयप्रदेशिकस्याप्यनंतप्रदेशिकस्यापि च स्कंधस्य एकस्मिन्नपि प्रदेशेऽवगाहः, द्वयोर्यावदसंख्येयेष्वपि पृथक् पृथग्, अनंतेष्ववगाहो न भवति, यस्माल्लोक एव असंख्येयप्रदेशिकः, आह–कथमनन्तानां स्कंधानामनंतप्रदेशिकानामसंख्येयेष्ववगाह इति ?, उच्यते, शुषिरस्वभावत्वादाकाशस्य, यथैकस्य प्रदीपस्य गृहमध्ये प्रज्वालितस्य प्रभास्सर्वमेव गृहं व्याप्नुवंति तथा प्रदीपसहस्रस्यापि व्याप्नुवंति, यस्मात् पुरुषस्य मध्यावस्थितस्य पृथक् २ छाया दृश्यंते, तथा गंधपुद्गलाः शीतपुद्गलाः धूमाश्चान्योन्याविरोधाद्व्याप्नुवंति एवमिहापीति, तथा चोक्तं–"आविशतां द्रव्याणां भात्यवकाशो यदन्यपूर्णेऽपि। आकाशमिति निरुक्तं तेन नभस्तत्र निरवयव ॥१॥" मिति, तस्मादसंख्येयेष्वेवानंतानामवगाह इति ॥ कति णं भंते ! संठाणा पण्णत्ता?, गो० ! पंच, परिमंडले वट्टे तंसे चउरंसे आयते, तत्थ परिमंडले णं भंते ! संठाणे किं संखिज्जपदेसिए असंखेज्जपदेसिए अणंतपदेसिए ?, गो० ! सिय संखेज्जपदेसिए सिय असंखिज्जपदेसिए सिय अणंतपदेसिए, एवं जाव आयए, परिमंडले णं भंते ! संठाणे संखेज्जपदेसिए किं संखेज्जपएसोगाढे असंखेज्जपदेसोगाढे अणंतपएसोगाढे पुच्छा, गो० ! संखिज्जपदेसोगाढे णो असंखिज्जपदेसोगाढे णो अणंतपएसोगाढे, जम्हा ते संखिज्जा एव पदेसा कहमसंखिज्जेसु वा अणंतेसु वा पदेसेसु अवगाहिस्संति ?,असंखिज्जपदेसिए अणंतपएसिए य संखिज्जेसु वा असंखिज्जेसु वा, एवं जाव आयए, परिमं-

डले णं भंते! संपुण्णपरिमंडले० संखेज्जेसु वा अवगाहेज्जा असंखिज्जेसु वा, अणंतपदेसिए० संखेज्जेसु वा असंखेज्जेसु वा, णो अणंतेसु, जम्हा लोगो चेव असंखेज्जपदेसिओ, पोग्गलाणं च अण्णत्थ गती णत्थि, एवं जाव आयए, परिमंडले णं भंते! संठाणे संखेज्जपदेसिए संखेज्जपदेसोगाढे किं चरिमे पुच्छा, जहा रयणप्पभाए वागरणं तहा भणियव्वं, एवमेतेणं गमएणं असंखेज्जपदेसिए संखिज्जपदेसोगाढे किं चरिमे०? सव्वमणुगंतव्वं, परिमंडलस्स णं भंते! संठाणस्स असंखिज्जपदेसियस्स असंखिज्जपदेसोगाढस्स अचरिमस्स य चरिमाण य पुच्छा, एतदप्पमिहितमेव जहा रयणप्पभाए सव्वमणुगंतव्वं सुत्ताणुसारेणं, णवरं संकमेणं अणंतगुणत्ति खेत्तचिंताए दव्वचिंतासंकमेणाणंतीत्यर्थः। तहा नेरइयाणं भंते! गतिचरिमेणंति, गतिचरिमेणंति गतिचरिमतया, पुण णरगेसु अणुववज्जणत्ताएत्ति वुत्तं भवति, णेरइयाणं भंते! पुच्छाए बहुवयणतो विसेसोत्ति, गतिठिती गाहा, गतिचरिमे ठितिचरिमे भवचरिमे भवो सो चरिमें य इत्यादि भावनीयमिति। प्रज्ञापनाप्रदेशव्याख्यायां दशमपदव्याख्या।१०॥

साम्प्रतमेकादशमारभ्यते, अस्य चायमभिसंबंधः—इहानंतरपदे सत्त्वानां यदुपपातक्षेत्रं रत्नप्रभादि तस्य चरमविभागः प्रतिपादितः, इह तु भाषापर्याप्तिपर्याप्तानां सत्यादिभाषाविभागोपदर्शनार्थमिदं प्रस्तूयते, इह चेदमादिसूत्रं—से णूणं भंते! मण्णामीति ओहारिणी भासा?, सेशब्दस्तत्रशब्दार्थः, स च वाक्योपन्यासे, नूनमुपमानावधारणतर्कप्रश्नहेतुषु, इहावधारणे, भदंत इत्यामंत्रणे, मन्ये अवबुध्य इति, एवं अवधार्यते—अवगम्यतेऽनयेत्यवधारणी, अवबोधबीजभूतेत्यर्थः, भाष्यत इति भाषा, भाषायोग्यतया परिणामितनिसृष्टनिसृज्यमानद्रव्यसंहतिरिति हृदयं, एष पदार्थः, अयं पुनर्वाक्यार्थो वर्त्ततेतत्र भदंत! एवमहं मन्ये—अवश्यमवधारणी भाषेति, न च सकृत् तदनालोच्यैव, किंतु चिंतेमीति, ओहारिणीं भाषां चिंत

यामीति पर्यालोचयामि युक्तिद्वारेणापि इति—एवं यदुत अवधारणी भाषेति पूर्ववत्, एवं निवेद्य स्वमभिप्रायमधिकृतार्थनिश्चयायैव भगवंतं पृच्छति—अह मन्नामीति ओधारिणी भाषा, अथ प्रक्रियाप्रश्नानन्तर्यमंगलोपन्यासप्रतिवचनसमुच्चयेषु, इह प्रश्ने, ततश्च काक्काऽयमर्थोऽवसेयः—अथ मन्ये एवं यथा अवधारणी भाषा, द्वितीयाभिप्रायनिवेदनमधिकृत्य प्रश्नमेवाह—अह चिंतेमीति ओहारिणी भासा, अथ चिंतयाम्येवं यथाऽवधारणी भाषा, साध्विदमनवद्यमित्यभिप्राय इति, अवयवार्थ उक्त एव, अधुना मतालोचितार्थविषयमंशतः साम्यमंशतश्चासाम्यमपि संभावयन् समस्तमतालोचितार्थाविपरीततथाभावावधारणायेदमाह—तह मण्णामीति ओहारिणी भासा, तथा समुच्चयनिर्देशावधारणसादृश्यप्रैष्येषु, इह च निर्देशे, ततश्च काक्काऽयमर्थोऽवसेयः—तथा मन्ये यथा पूर्वं मतवान्, न कश्चिद्विशेष इत्यभिप्रायः, कथमिति ?, एवं—यदुतावधारणी भाषा, तह तह चिंतेमीति ओहारिणी भासा, तथा चिंतयामि यथा पूर्वं चिंतितवान, न किंचित्तत्र वितथं, कथमिति ?, एवं यदुतावधारणी भाषेति, अवयवार्थो निदर्शित एव, एवं गौतमेनाभिप्रायनिवेदने प्रश्ने च कृते सति भगवानाह—हंता गोयमा ! मण्णामीति ओहारिणी भासा, अस्य प्राकृतशैल्या छांदसत्वाच्चायमर्थोऽवसेयः-हंत संप्रेषणप्रत्यवधारणविवा (षा) देषु, इह प्रत्यवधारणे, हंता गौतम ! नासत्यत्वं इत्येवं यदुतावधारणी भाषेति, वेद्मयहमिदमित्यभिप्रायः, तथा अविकलं मन्यस्व यथा पूर्वं मतवानित्येवं यदुतावधारिणी भाषा, तथाऽविकलं चिंतयस्व यथा पूर्वं चिंतितवान् इत्येवं यदुतावधारिणी भाषेत्येवं तावत् पूज्यपादा व्याचक्षते, अन्ये पुनरन्यथा, तदभिप्रायं पुनरतिगंभीरत्वान्न वयमवगच्छामः, ओहारिणी णं भंते ! भासा किं सच्चेत्यादि, अवधार्यतेऽनयेत्यवधारणी, णमिति वाक्यालंकारे, भदंत इत्यामंत्रणे, भाष्यत इति भाषा, किमिति परप्रश्ने, सतां हिता सत्या, संतो मुनयो

गुणाः पदार्था वेति, एतद्विपरीता मृषा, सत्यामृषोभयरूपा, परिस्थूलव्यवहारनयमतानुसारिणी चेयमत्रसेयेति, असत्यामृषा त्रितयविनिर्मुक्ता, व्यवहारनयमतानुसारिण्येवेत्यर्थः, गोयमा ! सिय सच्चेत्यादि निर्वचनं स्यात्सत्या, स्याच्छब्दोऽनेकांतद्योतकः, शेषं सूत्रसिद्धं यावत् आराधनी सच्चेत्यादि, तत्राराध्यतेऽनयेत्याराधनी–यथावस्थितवस्त्वभिधायिनी सत्या, यथा अस्त्यात्मा सदसन्नित्यानित्याद्यनेकधर्म्मकलापालिंगित इति, विराधनी विपरीतवस्त्वभिधायिनी मृषा, यथा नास्त्यात्मा सन्नेव वेत्यादि, आराधनीविराधनी सत्यामृषा, यथा अधिकृत्य किंचिन्नगरं पत्तनं वा अस्मिन् दश दारका जाता इति पंचसु जातेष्वेवमभिदधतः, या नैवाराधनीत्यादित्रयविकला सा असत्यामृषा, यथा हे देवदत्त इत्यादि, शेषं सूत्रसिद्धं यावत् अह भंते ! गाउमित्यादि, इहाराधनी यथावस्थितवस्त्वभिधायिनी सत्येत्युक्तमत इहोक्तलक्षणयोगसंशयापन्नस्तदपनोदाय पृच्छति–अथ भदंत ! गावः प्रतीताः मृगा अपि पशवः-अजाः पक्षिणः प्रतीताः, प्रज्ञापनी तदर्थकथनी, णमिति पूर्ववत्, एषा सत्या भाषा नैषा भाषा मृषेति, कोऽभिप्रायः ?–गाव इति गोजातिं प्रतिपादयति, तत्र च त्रिलिंगोऽप्यभिधेयोऽर्थोऽस्ति स्त्रीपुंनपुंसकवेदभावात्, एवं मृगपशुपक्षिष्वपि भावनीयं, न च ते शब्दास्त्रिलिंगाभिधायकाः, तथाऽश्रवणाद्, अपि तु पुल्लिंगगर्भा एव, भगवानाह–हंता गोयमेत्यादि, हंतेति प्रत्यवधारणे, गौतमेत्यामंत्रणे, गाव इत्यादि प्रज्ञापनी तदर्थकथनी आराधनी यावदेषा भाषा, न एषा भाषा मृषेति, कोऽभिप्रायः ?, गाव इति गोजातिं प्रतिपादयति, तत्र च त्रिलिंगोऽप्यभिधेयोऽर्थोऽस्ति स्त्रीपुंनपुंसकवेदभावात्, एवं मृगपशुपक्षिष्वपि भावनीयं, न च ते शब्दास्त्रिलिंगाभिधायकाः, तथाऽश्रवणाद्, अपि तु पुंल्लिंगगर्भा एव, भगवानाह–हंता गोयमा! न मृषा जात्यभिधायित्वाज्जातेश्च त्रिलिंगार्थाव्यतिरेकात्तदभिधाने च वस्तुतो लिंगार्थानभिधानाच्छब्दशक्तिस्वाभाव्यात्

तया प्रतीतिदर्शनाद् व्यवहारहेतुत्वाददुष्टविवक्षया समुत्पत्तेः अपरपीडाकरत्वाच्चेति हृदयं । अह भंते जा य इत्थिवयू इत्यादि, अथेति प्रश्ने, भदंत इत्यामंत्रणे, या च स्त्रीवाक् स्त्रीवचनमित्यर्थः, एवं पुरुषनपुंसकयोरपि वाच्यं, शेषं गतार्थं यावत् प्रश्नसूत्रांतः, कोऽभिप्रायः ?, इह यदा खट्वाघटाऽऽतोद्यादौ स्त्रीपुंनपुंसकवचनानि प्रयुज्यंते न च बाह्योऽर्थः तदाकारेण परिणतोऽस्ति खट्वादिः, कथं ?, यस्माच्छब्दविद्भिरिदं रूपादिलक्षणमुक्तं–"योनिर्मृदुत्वमस्थैर्यं, मुग्धता क्लीबता स्तनौ । पुंस्कामितेति लिंगानि, सप्त स्त्रीत्वे प्रचक्षते ॥१॥ मेहनं खरता दार्ढ्यं, शौंडीर्यं श्मश्रु धृष्टता । स्त्रीकामितेति लिंगानि, सप्त पुंस्त्वे प्रचक्षते ॥२॥ स्तनादिश्मश्रुकेशादिभावाभावसमन्वितम् । नपुंसकं बुधाः प्राहुर्मोहानलसुदीपितम् ॥३॥" तथाऽन्यत्राप्युक्तं–स्तनकेशवती स्त्री स्याद्रोमशः पुरुषः स्मृतः। उभयोरंतरं यच्च, तदभावे नपुंसक ॥४॥ मित्यादि। तदेयं प्रज्ञापनी न वेत्यापन्नसंशयस्तदपनोदाय पृच्छति, अत्र भगवानाह-हंता गोयमेत्यादि, अक्षरगमनिका सूत्रांतरवदवगंतव्या, भावार्थस्त्वयं-प्रज्ञापनी, कथं ?,व्यवहारतः स्त्र्यादिवचनानामर्थांतरेऽपि प्रवृत्तेः, प्रतिपत्तिहेतुरूपत्वात् तत्रैव प्रवृत्तिदर्शनात् अदुष्टविवक्षासमुत्पत्तेः अपरपीडाजनकत्वाच्चेति। अह भंतेत्यादि, प्रश्नसूत्रं, अस्याक्षरार्थः सूत्रांतराव्याख्यानतोऽवगत एव, नवरं आज्ञाप्यतेऽनयेत्याज्ञापनी, स्त्रिया आज्ञापनी स्त्रयाज्ञापनी, एवमिति रे अयित्राच्ये, अभिप्रायस्त्वयं–आराधनी सत्येत्युक्ता, इयं च प्रज्ञापनी, विपरीता मृषेति, आज्ञाप्यमानश्चार्थः स्त्र्यादिस्तथा कुर्यान्न वा, आज्ञासंपादनक्रियायुक्तश्चाभिधीयते भाषयेत्यत इयं प्रज्ञापनी न वेति संशयापन्नो विनिश्चयाय पृच्छति, अत्र भगवानाह–हंता गोयमेत्यादि, इदमत्र हृदयं-या स्वपरानुग्रहबुद्ध्या साध्यमंतरेणामुष्मिकफलप्रसाधनाय प्रतिपन्नैहिकप्रयोजनालंबना विवक्षितकार्यप्रसाधनसामर्थ्ययुक्तविनीतविनेयजनविषया गीयते तत्त्वतस्सैव

प्रज्ञापनी, व्यवहारतोऽन्येति, उक्तं च—"अविणीयमाणवेंतो किलिस्सती भासती मुसं तहय, घंटालोहं णाउं को कडकरघो पवत्तेज्जा ? ॥ १ ॥" किरिया हि द्रव्यं विनयति नाद्रव्यमित्यभिप्रायः, अह भंतेत्यादि, या च स्त्रीप्रज्ञापनी, यथा योनिरित्यादि, या च पुरुषप्रज्ञापनी मेहनमित्यादि, या च नपुंसकप्रज्ञापनी स्तनादीत्यादि, प्रज्ञापनीयं भाषा मृषा, कोऽभिप्रायः ?-रुयादिवचनानामर्थान्तरेऽपि प्रवृत्तेः प्रतिपादितत्वाद् इत्थं प्रतिपादने नियमायोगात्, हंता गोयमेत्यादि निर्व्वचनं, अस्य गर्भो-व्यवहारतः खल्वित्थमपि प्रज्ञापनेऽपराधाभावः व्यवहारयोगात् कुत्सितविवक्षाऽयोगात् भावानतिपातादिति, अन्ये तु व्याचक्षते—या च स्त्री प्रज्ञापनेत्यादि, अत्र यदा रुयादिपरिणतोऽर्थो बाह्यमर्थं रुयादिविज्ञानपरिणतं प्रज्ञापयति शब्दनयदर्शनेन च स तस्मात् प्रज्ञाप्यमानादर्थादभिन्नस्तदुपयोगानन्यत्वाद् यथा पुंसः पुमांसमभिदधतः स्त्रियाः स्त्रियं नपुंसकस्य नपुंसकमिति तदर्थता, यदाऽपि पुमान् स्त्रियमभिधत्ते तदापि तदुपयोगानन्यत्वात् स्त्रीरूप एवासाविति समानलिंगतैव, नपुंसकमभिदधानो नपुंसकमेवेति समानलिंगता, एवं स्त्रीनपुंसकयोरप्यायोजनीयं, संग्रहव्यवहाराभिप्रायात्तु बाह्यार्थाद् वचनमात्मलाभं लभते, यदि बाह्योऽर्थस्तथा परिणतोऽस्ति ततः पुंसः पुल्लिंगवचनमभिदधतस्सत्यता, अतोऽन्यथा मृषातेति प्राप्ते मूढनयदर्शनेन प्रश्ने निर्व्वचनं विजातिरिति, स्त्रीलिंगोऽपि सन् पुमादिवृत्तिमनुभवति सर्व्वलिंगसमानाधिकरणश्च भवति, स्त्रीलिंगोपादानश्च भवति। अह भंते जातीत्यादि, जातौ स्त्रीवचनं सत्ता तथा जातौ पुंवचनं भावः तथा जातौ नपुंसकवचनं सामान्यं, प्रज्ञापनीत्यादि पूर्ववद्, भावार्थोऽपि सनिर्वचनसूत्रः पूर्ववदेव, अन्ये तु व्याचक्षते—जातौ स्त्रीवचनं यथा गृहकोकिलिकेत्यादि, जातौ पुंवचनं कोकिलइत्यादि, जातौ नपुंसकवचनं आसनमित्यादि, प्रज्ञापनी एषा, न एषा मृषा, ॥७८॥

कोऽभिप्रायः ?- गृहकोलिकाशब्दो हि त्रिलिंगयुक्तार्थवाचकः स्त्रीपुंनपुंसकसद्भावात्, एवं कोकिलशब्दोऽपि, एवमासन-शब्दोऽपि मंचिकासन्दकपीठकादिषु, हंता गोतमेत्यादि निर्व्वचनं, गर्भार्थः प्राग्भावित एव, अह भंते! जातीति इत्थि-आणमणीत्यादि, पूर्वोक्तानुसारत एवोक्तोदाहरणापेक्षया भावनीयं। अह भंते! जातीति इत्थिपण्णवणीत्यादि स्त्रीजातिप्रज्ञापनीत्यादि, प्रागविशेषेण स्त्रीप्रज्ञापन्याः प्रतिपादितत्वात् सांप्रतं जात्या विशेषितत्वादपौनरुक्त्यमिति भावनीयं, अन्यथा वा आगमाविरोधतो भेदो वाच्यः, एवमन्वर्थसंज्ञया प्रज्ञापनीशब्दमधिकृत्यानंतगमपर्यायत्वात् सूत्रस्य व्याख्यातानि सूत्राणि, अन्ये तु पारिभाषिकीमसत्यामृषां प्रज्ञापनीशब्दमधिकृत्य कथमपि सर्वत्र निगमनमभिदधति, तत् स्वबुद्ध्या भावनीयमित्यलं प्रसंगेन। अह भंते मंदकुमार एवेत्यादि, मंदकुमारक-उत्तानशायको बालः सोऽनाभोगिकेन कायवीर्येण भाषापुद्गलोपादानं कृत्वा निसर्गकाले ब्रुवन् जानाति-अहमेतत् ब्रवीमीति?, अत्र कोऽस्य प्रश्नस्यावकाश इति ?, उच्यते, प्रदेशांतरे उक्तं-"बुद्धीदिट्ठे अत्थे जं भासइ तं सुतं मतीसहितं।" तत्र मतिश्रुतज्ञानभेद-प्ररूपणं कुर्व्वाणेनाचार्येण बहुप्रकारं गाथार्द्धं व्याख्यायोपसंहृतं, अथवा सामान्येनेह मतिश्रुतात्मिका बुद्धिरधिक्रियते, तथा दृष्टानर्थान् भाषत एव कदाचिदपीतिं संभवमात्रमंगीक्रियते, नावश्यं भाषमाण एव, तदिह भाषमाणस्य भावश्रुतमतोऽन्या मतिः, मतिसहितमिति श्रुतविज्ञानसहितमुपयुक्तस्येतियावत्, यान् भाषते एवावश्यं कदाचिदपि तच्छ्रुतमनुभाषमाणस्य श्रुतमेवेति, यस्मान्मतिज्ञानालोचिता अपि केचिद्द्रव्यश्रुतेनोच्यंते, अवग्र्याद्विज्ञानालोचिताश्च, एवं सर्वमेव हि श्रुतज्ञानं ध्वनिप-रिणाममिति, मतिज्ञानं चोभयपरिणाममित्युक्तं भवति, अतो विज्ञानमेव वाग्रूपापन्नमिति प्रश्नः, तथाऽन्यैरप्युक्तं-"आत्मा बुद्ध्या

समध्वर्थान्मनो युंक्ते विवक्षया । मनः कायाग्निमाहंति, स प्रेरयति मारुत ॥१॥" मित्यादि, व्याकरणं-णो इणट्ठे समट्ठे पर्याप्त्यापर्याप्तस्यापि सतः मनःकरणमपटु, अपटुत्वाच्च करणस्य क्षयोपशमो मंदः, मनःकरणं च श्रुतज्ञानावरणस्य क्षयोपशमहेतुस्तस्मान्न जानाति अहमेतत् ब्रवीमीति, नान्यत्र संज्ञिन इति, अन्यत्रशब्दः परिवर्जनार्थः, यथा "अन्यत्र द्रोणभीष्माभ्यां, सर्वे योधाः पराङ्मुखाः" भीष्मद्रोणौ वर्ज्जयित्वेत्यर्थः, एवमिहापि, तत्र संज्ञी अवधिज्ञानी जातिस्मरी वा, एवं कवलाहारं आहारेमाणी, अम्मापियरो भट्टिदारए इति, भट्टी-सामी तस्य दारओ-पुत्तो, सर्वत्र संज्ञिनं मुक्त्वा न जानाति, अतिरावले देशीभाषया स्वामिकुलं, शेषं निगदसिद्धं यावत् अह भंते ! उट्ठे गोणेत्यादि, अत्रापि बालावस्था गृह्यत इति केचित्, अह भंते पुढवीत्ति इत्थियाणमणीत्यादि, अत्र कर्म्मतया आज्ञापनं वेदितव्यं, यथा पृथिवीं कुर्वित्येके, पृथिवीमानयेत्यन्ये, एवं पुरुषनपुंसकयोरपि भावनीयं, पुढवीत्ति इत्थीपण्णवणित्ति, पृथिवीस्वरूपं स्त्रीत्वेन प्रज्ञापयति च इति विशेषप्रश्नः, भासा णं किमादीया इति प्रश्नः, निर्व्वचनं-गोयमा ! भासा णं जीवादीया इत्यादि, जीवाद्या तथाविधतत्प्रयत्नमंतरेण भाषाया अभावात् जीवमूलेत्यर्थः, उक्तं च-"तिविहंमि सरीरंमी जीवपदेसा हवंति जीवस्स । जेहि उ गिण्हति गहणं तो भासति भासतो भासं ॥१॥" अत एव शरीरप्रभवा, शरीरादेव तद्दंडनिर्गतेः, वज्जसंठिता लोकव्यापित्वात् तथा संस्थानात् लोकाकारत्वाल्लोकवद्वज्रसंस्थितेति, लोगंतपज्जवसिया लोकव्यापि चादेव प्रज्ञप्तेति। भासा कुतो य पभवा इत्यादि प्रश्नः, निर्व्वचनं-सरीरप्पभवा भासेत्यादि, तत्र शरीरप्पभवा भासा जम्हा काययोगेणं, भंते ! भासाजोग्गे पोग्गले गेण्हित्ता भासत्ताए परिणामित्ता वइजोएणं णिसरति, दोहिं समएहिं निसिरिति- भासति, एगंतरं गिण्हति निसरति ॥८०॥

एगंतरं चेति, पढमसमयगहिए पोग्गले बितियसमए णिसिरति, तेण दोसमया भासा, चउप्पगारा सच्चादि, दोण्णि य भासा अणुमयाओ उ--सच्चा असच्चमोसा य, पर्याप्ता–अलं समर्था अर्थप्रतिपादनं प्रति, कतिविहा णमित्यादि प्रश्नः, निर्व्वचनं-पज्जत्तिका य अपज्जत्तिगा य, इह पज्जत्तिगा णाम जा अवधारेउं सक्कति, जहा सच्चा मोसा वेति, जा पुण सच्चावि मोसावि दुपक्खग्गाहिणी सा ण सक्कति विभावेउं जहा एसा सच्चा मोसा वेति अपज्जत्तिगा, शेषं निगदसिद्धं यावत् जणवतेत्यादि, तत्र जनपदसत्यं नाम नानादेशीभाषारू.मप्यविप्रतिपत्त्या यदेकार्थप्रत्यायनव्यवहारसमर्थमिति, यथोदकार्थे कोंकणादिषु पयः पिच्चं नीरमुदकमित्यादि,अदुष्टविवक्षाहेतुत्वान्नानाजनपदेष्विष्टार्थप्रतिपत्तिजनकत्वाद् व्यवहारप्रवृत्तेः सत्यमेतदिति, एवं शेषेष्वपि भावना कार्या, सम्मतसत्यं नाम कुमुदकुवलयोत्पलतामरसानां समाने पंकजसंभवे गोपालादीनां सम्मतमरविंदमेव पंकजमिति, स्थापनासत्यं नाम अक्षरमुद्राविन्यासादिषु यथा माषकोऽयं कार्षापणोऽयं शतमिदं सहस्रमिदमिति, नामसत्यं नाम कुलमवर्द्धयन्नपि कुलवर्द्धन इत्युच्यते धनमवर्द्धमानोऽपि धनवर्द्धन इत्युच्यते, अपक्षस्तु पक्ष इति, रूपसत्यं नाम तद्गुणस्य तथा रूपधारणं रूपसत्यं, यथा प्रपंचयतेः प्रव्रजितरूपधारणमिति, प्रतीत्यसत्यं नाम यथा अनामिकाया दीर्घत्वं ह्रस्वत्वं चेति, तथाहि तस्यानंतपरिणामस्य द्रव्यस्य तत्तत्सहकारिकारणसन्निधानेन तत्तद्रूपमभिव्यज्यत इति सत्यता, व्यवहारसत्यं नाम दह्यते गिरिः गलति भाजनं अनुदरा कन्या अलोमा एडिकेति, गिरिगततृणादिदाहे लोके व्यवहारः प्रवर्त्तते, तथोदके च गलति सति, तथा संभोगजीवप्रभवोदराभावे च सति, लवनयोग्यलोमाभावे चेति, भावसत्यं नाम शुक्ला बलाका,सत्यपि पंचवर्ण-संभवे, योगसत्यं नाम छत्रयोगाच्छत्री दंडयोगाद्दंडीत्येवमादि, उपमया सत्यं नाम समुद्रवत्तडागं, 'मोसा दसविहा, कोहादि-

णिस्सिया' क्रोधाभिभूतो विसंवादनबुद्धया असत्येन परं प्रत्याययन् सत्यमसत्यं वा वदति, तस्याशयविप्रतिपत्तितः घुणाक्षरमिव कदाचित् सत्यं तथापि तन्मृषैव, 'माणणिस्सिया' जं तु अत्तुकस्सेण अभूतमपि ऐश्वर्याद्यनुभूतमिति प्रकाशयति, मायाकारकवच्चक्षुर्मोहेन शकटादीनां मुखप्रवेशनादि मायाणिस्सिया, वणिज्जादि कूडमाणसमयकरणं वा लोभणिस्सिया, अतिप्रेमाणं दासोऽहं तवेति पेज्जणिस्सिया, पडिनिविट्ठस्स तित्थगरादीणवि अपवादभासणं दोसणिस्सिया, हास्यनिसृता नर्मानृतं, भयनिःसृता तस्करादिभयेऽसमंजसवचनं, आख्यायिकानिसृता आख्यायिकाऽसंभव्यभिधानं, उपघातनिसृता अभ्याख्यानवचनं। सच्चामोसा दसविहा उप्पण्णमीसगविगतमीसगादि, उद्दिस्स गामं वा नगरं वा दमण्हं दारगाणं जंमं पगासंतस्स ऊणेसु अहिएसु वा एवमादि उप्पन्नमिस्सिया, एमेव मरणकहणे विगयमिस्सिया, जम्मणस्स मरणस्स य कयपरिणामस्स उभयकहणे विसंवादणे उप्पाएण विगतमिस्सिता, जीवंतमयगसंखणगादिरासिदरिसणे अहो महं जीवरासित्ति भणंतस्स जीवंतेसु सच्चा मएसु मोसत्ति जीवमिस्सिता, एत्थ चेव बहुसु मतेसु अहो महंतोऽजीवरासित्ति भणंतस्स मएसु सच्चा जीवंतेसु मुसा इति अजीवमिस्सिया, सच्चं मयममयं वा उभयं णियमेण अवधारयंतस्स विसंवादे जीवाजीवमिस्सिया, मूलकादि अणंतकायं तस्सेव पडिरिक्कयपंडुपत्तेहिं अण्णेण वा वणस्सइकाएण मिस्सं दट्ठूण एस अणंतकायोत्ति भणंतस्स अणंतमिस्सिया, तमेव समुदयं करमेत्ते परित्ताणं अमिलाणं रासीकयं परित्तमिति भणंतस्स परित्तमिस्सिया, अद्धा कालो सो दिवसो रत्ती वा, जो तम्मिस्सियं करेति, परं तुरियावेंतो दिवसतो भणति—उट्ठेहि रत्ती जायत्ति, एसा अद्धामिस्सिया, तस्सेव दिवसस्स रातीए वा एगपदेसो अद्धद्धा, तं पढमपोरिसिकाले तहेव तुरियंतो मज्झण्हीभूतं भणंतस्स अद्धद्धमिस्सिया। असच्चामोसा 'आमंतणी'त्यादि, हे देव इति आमंतणी, एसा किलाप्रवर्त्त-

कनिवर्त्तकत्वात् सत्यादिभाषात्रयलक्षणवियोगतश्चासत्यामृषेति, एवं स्वबुद्ध्या अन्यत्रापि भावना कार्येति, कज्जे परस्स पवत्तणं जहा इमं करेहित्ति आणवणी, कत्थइ वत्थुविसेसस्स देहित्ति मग्गणं जायणी, अविण्णायस्स संदिद्धस्स वा अत्थस्स जाणणत्थं तदभिजुत्तचोदणं पुच्छणी, विणीयस्स उवएसो जहा—पाणवहाउ णियत्ता हवंति दीहाउया अरोगा य एमादी पण्णवणी पण्णत्ता वीयरागेहिं ॥ १ ॥ जायमाणस्स पडिसेहणत्थं पच्चक्खाणी, कज्जोवघातितस्स तथा भवतु ममवि पढममभिप्पेयंति इच्छाणुलोमा, अत्थाणभिग्गहेणं बालुम्मत्तपलावपहसितादि अणभिग्गहिया, घडातिअत्थपडिवायणमभिग्गहिया, एएसऽवायणी अणभिग्गहिया सैव, चशब्दः समुच्चयार्थः, सैंधव इव पुरिसवच्छलवाजिसु पवत्तमाणा संसयकरणी, घटादिलोगपसिद्धसद्दत्था वोगडा, अतिगंभीरसद्दत्था लहुक्खरपउत्ता वा अविभावियत्था अवोगडा, शेषं सूत्रसिद्धं, याव णण्णत्थ सिक्खापुव्वगंतीतीत्यादि, शिक्षापूर्वकं शुकसारिकादयः संस्कारविशेषात् प्रायः चतुर्विधामपि भाषां भाषंते, उत्तरगुणलब्धिं वा प्रतीत्य जातिस्मरणादौ कुतश्चित् क्षयोपशमविशेषाद्, विक्रियाकरणवत्, शेषं प्रकटार्थं यावत् ठिताइं गेण्हतीत्यादि, तत्र स्थितानि स्वस्थाने, न गमनक्रियावन्तीत्यर्थः, एगसमयठितियाइंति स्थितिपरिणामं प्रति,जाव असंखिज्जसमयठितीयाइंति, कथं ?,यस्मादुक्तं 'अणंतपदेसिए णं भंते ! खंधे केवइयं कालं सेए ?, गोयमा ! जहण्णेणं इक्कं समयं उक्कोसेणं आवलियाए असंखिज्जइभागं, णिरेये जहन्नेणं एक्कं समयं उक्कोसेणं असंखेज्जं कालं' ततो, ताणि गेण्हमाणो अणंतरसमयंमि चेव गेण्हति, गिहणाणंतरमेव णिस्सिरणभावादिति, ण ताणि य गमणजोगा, अन्ये त्वभिदधति—एकसमयस्थित्यादि भाषापरिणामाऽपेक्षयोच्यते, यस्मात् किल विचित्राः पुद्गलपरिणामा इति, तान्येवानेकधा परिणाममासादयंतीति, 'गहणे'त्यादि 'गहणदव्वाइं पडुच्च' इति तत्र गृह्यत इति ग्रहणं तच्च तद् द्रव्यं च ग्रहणद्रव्यं, एतदुक्तं भवति—जाइं गहणजोग्गाइं ताइं कयाइं कालादिवण्णपरिणामेणं एक्केण दोहिं तीहिं

चउहिं पंचहि य भवेज्ज, सव्वगहणं पडुच्च इति यदा समुदायो विवक्ष्यते तदा नियमा पंचवण्णाइं, एवं तेहिं तेहिं गंधरसफासेहिं भाणियव्वं । 'पुट्ठा' इति आत्मप्रदेशैः स्पृष्टानि गृह्णाति, 'ओगाढाइं'ति जेसु आगासपदेसेसु जीवपएसा ओगाढा तेसु चेव ताइंपि ओगाढाइं गेण्हति, अणंतरोगाढाइंति आत्मप्रदेशानन्तरस्थानि गृह्णाति, नैकादिव्यवहितानि, भाषाया आदिमध्याव-सानेषु सर्वेष्वपि गृह्णाति, सविसये गिण्हइत्ति विषयो—गोचरः स एव स्पृष्टावगाढानन्तरावगाढाख्यः तस्मिन् गृह्णाति विषये, आणुपुव्वीए यथाऽऽसन्नं नातिक्रम्य, स्थित्वापि गृह्णाति, प्रतिसमयमपि गृह्णाति, यदा सान्तरं गृह्णाति तदा जघन्यत एकं समयमंतरं कृत्वा गृह्णाति, भाषाप्रवृत्तस्यैव भाषमाणस्येदमन्तरं चिन्त्यते. एकस्मिन् समये गृहीत्वा मोक्षसमये वा अनुपादानं कृत्वा तृतीयसमये पुनर्गृह्णीयात्, निरंतरग्रहणे तु जघन्यतो द्वौ समयौ निरंतरौ, तदा प्रथमसमये गृह्णात्येव, न मुंचत्यपि, द्वितीयसमये प्रथमसमयगृहीतांश्च मुंचत्यन्यांश्च वाक्पुद्गलानुपादत्ते, तृतीयसमये तानेव द्वितीयसमयोपात्तान् मुंचत्येव पुनर्न भाषते, उत्कर्षेण त्वसंख्येयान् समयान् ग्रहणं करोति, तत्राद्ये ग्रहणमेवांत्ये मोक्ष एव, द्वितीयादिषु तु द्वयमपि च युगपत् करोति, पूर्वसमयगृहीतानां यदैव मोक्षस्तदैवोत्तरसमयानां ग्रहणं, एवं सर्वेषु मध्येषु, स्थापना चेयं, अन्यार्थनियमितानि भृशं क्षिप्त लोष्टवद्, तेसिं पंचविहे भेदे पण्णत्ते, तंजहा-खंडभेदेइत्ति इत्यादि यत् चूर्णीकृतानि भवंति लोष्टवत्, प्रतरभेदे अभ्र-पटलभूर्जपत्रादिवत्, अनुतडिकाभेदे इक्षुतडागतरिकादि, छल्यादिवत्, चूर्णिकाभेदे क्षिप्तपिष्टवत्, उत्करिकाभेदे मृत्पार्थिववत्। अज्झत्थवयणं अध्यात्मं, अज्झत्थाय योजनीयं, विवक्षा उत्तरकालपर्यंतं भवतीत्यन्ये, उपनीतवचनं प्रशंसावचनं अपनीतवचनं निन्दावचनं, उपनीतापनीतवचनं प्रशंसित्वा निन्दति, अपनीतोपनीतवचनं निन्दित्वा प्रशंसतीति ॥

॥ प्रज्ञापनाप्रदेशव्याख्यायां एकादशपदव्याख्या समाप्तेति ॥

आचार्यपुरन्दरश्रीहरिभद्रसूरिसूत्रितप्रदेशविवरणयुतं

श्रीप्रज्ञापनोपाङ्गम् ।

(उत्तरार्धम्)

साम्प्रतं द्वादशमारभ्यते, अस्य चायमभिसम्बन्धः, इहानन्तरपदे सत्त्वानामसत्यादिभाषाविभागोपदर्शनं कृतं, इह पुन- र्भाषाया एव शरीरायत्तत्वात्, शरीरप्रभवा भाषेत्यत्रैव प्रतिपादितत्वात्, तथा 'गिण्हति य काइएणं निसिरति तह वाइएण जोगेणं'ति, अन्यत्राप्युक्तत्वाच्छरीरप्रभवा, तद्विभागोपदर्शनायेदमारभ्यत इति, इह चेदमादावेव प्रश्ननिर्वचनं, आदिसूत्रं-गोतमा!' पंच सरीरया पण्णत्ता तंजहा-ओरालियेत्यादि, तत्रोत्पत्तिसमयादारभ्य प्रतिक्षणमेव शीर्यत इति शरीरं, तत्रौदारिकमिति कः शब्दार्थः? उदारं प्रधानं, उदारमेवौदारिकं, प्राधान्यं चास्य तीर्थकरगणधरशरीरापेक्षया, ततोऽन्यत् न प्रधानतरमस्ति, प्राकृतशैल्या ओरालियं, तत्र ओरालं नाम विस्तरालं, विशालंति वा, जं भणितं होति, कहं? तं सातिरेगजोयणसहस्समवट्ठितप्पमाणमोरालियं, अन्नमेद्दहमेत्तं णत्थि, वेउव्वियं होज्जा तं तु अणवट्ठियप्पमाणं अवट्ठिय पुण पंचधणुसयाइं अहेसत्तमाइ, इमं पुण अवट्ठियप्पमाणं सातिरेगं जोयणसहस्सं वनस्पत्यादी(ती)नामिति, अथवौरालिकं, उरलं नाम स्वल्पप्रदेशोपचितत्वात् बृहत्त्वाच्च भेंडवत्, अथवौरालिकं, उरालं नाम मांसस्थिमज्जाद्यवबद्धं वा यदुक्तं च-"त- थोदारमुरालं, उरालं महद् विन्नेयं, 'ओदारियंति पढमं पडुच्च तित्थेसरसरीरं,' भण्णति य-'ओरालं वित्थरवंतं, वणस्सइं पप्प 'एवतियं णत्थि अण्णं एद्दहमेत्तं विसालं ॥ १ ॥ "ति, ओरालं थेवपदेसोवचियंति महल्लगं जह भेंडगं? मंसट्ठिण्हारूबद्धं ओरालं समयपरिभासा, ॥ ८५ ॥

इदानीं वैक्रियं, तत्र वि विविधा विशिष्टा वा क्रिया, विक्रियायां भवं वैक्रियं, उक्तं च—" विविहा विसिट्ठया वा किरिया मई य जं भव तमिह। वेउव्वियं तयं पुण नारकदेवाण सहजम्मं ॥ १ ॥ " योगबलेनाह्रियत इत्याहारकं, उक्तं च—" कज्जंम्मि समुप्पन्ने सुयकेवलिणा विसिट्ठलद्धिए। जं एत्थ आहरिज्जति भणंति आहारगं तं तु ॥१॥" कार्याणि चाऽमूनि " पाणिदय१ रिद्धिदरिसणत्थ २ अत्थोवगहणहेतुं ३ वा संसयवोच्छेदत्थं ३ गमणं जिणपायमूलंमि ॥ १ ॥ " कार्यपरिसमाप्तौ च पुनर्मुच्यते, याचितोपकरणवत्, तथा तेजसो भावो तैजसं उष्मादिलिंगसिद्धमिति' उक्तं च-"सव्वस्स उण्हसिद्धं रसादिआहारपागजणणं च। तेयगलद्धिनिमित्तं तेयगं होइ नायव्वं ॥ १ ॥ " तथा कर्मणो विकारः कार्मणं सकलशरीरकारणमित्यर्थः, उक्तं च—" कम्मवियारो कम्मणमट्ठविह विचित्तकम्मणिप्फण्णं। सव्वेसि सरीराणं कारणभूयं मुणेयव्वं ॥ १ ॥" अत्राह—किं पुनरयमौदारिकादिः क्रम इति? अत्रोच्यते परं परं प्रदेशसौक्ष्म्यात् परं परं प्रदेशबाहुल्यात् परं परं प्रमाणोपलब्धेः प्रत्यक्षोपलब्धत्वात् प्रथितत्वाच्चौदारिकादिकः क्रमः, ताणि य सरीराइं जीवाणं बद्धमुक्काइं दव्वखेत्तकालभावेहिं साहिज्जति, द्रव्यप्रमाणं वक्ष्यति अभव्यादिभिः, क्षेत्रेण श्रेणिप्रतरादिना, कालेनावलिकादिना, भावो द्रव्यान्तर्गतत्वान्न सूत्रेणोक्तः सामान्यलक्षणत्वाच्च, वर्णादीनामन्यत्रोक्तत्वात्, ओरालिया दुविहा बद्धेल्लया मुक्केल्लया य, बद्धं गृहीतमुपात्तमित्यनर्थान्तरं, मुक्तं त्यक्तं क्षिप्तं समुज्झितमस्तमित्यनर्थान्तरं, तत्थ बद्धेल्लया असंखिज्जया असंखिज्जाहिं उस्सप्पिणिओसप्पिणिहिं अवहीरंति कालतो, खित्ततो असंखिज्जा लोगा, एतं सुत्तं, इदानीमर्थः, ण संखेज्जा असंखिज्जा, ण तीरंति संखातुं गणितेण जहा एत्तिय मास [मेत्ता] कोडीप्पभिइणातोवि कालादीहिं साहिज्जति, कालतो ताव समए २ एक्केक्कं सरीरं समवहीरमाणमसंखेज्जाहि उस्सप्पिणीओस्सप्पिणीहिं अवहीरंति, जं भणियं असंखिज्जाणं ओस्सप्पिणिओसप्पिणीणं जावइया समया एवतिया ओरालिया सरीरा बद्धेल्लया खेत्तओ परिसंखाणं असंखिज्जा लोगा भवंति, ओगाहणाहिं ठविज्जंति, तेहिं जइ वि एक्केक्क पदेसे सरीरमेक्केक्क ठविज्जति तो वि असंखिज्जा लोया भवंति, किंतु अवसिद्धंतदोसपरिहरणत्थं अप्पणप्पणियाहिं ओगाहणाहिं ठविज्जंति, आह—कहमणंताणमोरालियसरीराणं असंखेज्जाइं ओरालियसरीराइं भवंति? आयरिय आह—पत्तेय सरीरा अ-

संखेज्जा, तेसिं सरीरावि तावइया चेव, जे पुण साहरणा ते अणंता, तेसिं अणंताणवि एक्केक्कमोरालियं काउं असंखिज्जा सरीरा भवंति, एवमोरालिया बद्धेल्लया असंखेज्जा, मुक्केल्लया अणंता, कालपरिसंखाणं अणंताणं उस्सप्पिणीओसप्पिणीणं समयरासिप्पमाणमित्ताइं. खेत्तओ परिमाणं अणंताणं लोगप्पमाणमित्ताणं खंडाणं पदेसरासिप्पमाणमेत्ताइं, दव्वओ परिसंखाणं अणंतभवसिद्धियजीवरासीओ अणंतगुणाइं, तो किं सिद्धरासिप्पमाणमित्ताइं होज्जा? भण्णति सिद्धाणमणंतभागमित्ताइं, आह—तो किं परिवडियसम्मदिट्ठीरासिप्पमाणाइं होज्जा ते ?, तेसिं दोण्हवि रासीण मज्झे पढिज्जंतित्ति काउं, भण्णति जइ तप्पमाणाइं होज्जाइं तो तेसिं चेव निद्देसो होंतो, तम्हा ण तप्पमाणाइं, तो किं तेसिं हिट्ठा होज्जा?, उवरिं होज्जा ?, भण्णति, कयाइ हेट्ठा कयाइ उवरिं होज्जा, कयाइ तुल्लाइं, तेण स व्याघातत्वात् ण णिच्चकालं तप्पमाणाइं तीरंति वोत्तुं, आह—कहं मुक्काइं अणंताइं भवंति ओरालियाइं? जइ ताव ओरालियाइं मुक्काइं ताइं जाव अविकलाइं जाव घिप्पंति तो तेसिं अणंतकालठाणाभावातो अणंतत्तणं ण पावति, अह जे जीवेहिं पोग्गला ओरालियत्तेण घित्तुं मुक्का तीयद्धाए तेसिं गहणं, एवं सव्वपोग्गलगहणमावण्णं एवं जं तं भण्णति, अभवसिद्धिएहिं अणंतगुणा सिद्धाणं अणंतभागोत्ति तं विरुज्झति, एवं सव्वजीवेहिंतो बहुएहिं गुणेहिं अणंतत्तणं पावति?, आयरिय आह—ण य अविकलाणमेव केवलाण गहणमेयं, ण य ओरालियगहणमुक्काण सव्वपुग्गलाणं, किंतु जं सरीरमोरालियं जीवेण मुक्कं होति तं अणंतभेदभिन्नं होति, जाव ते य पोग्गला तं जीवनिव्वत्तियं ओरालियसरीरकायप्पओगं ण मुयंति, ण ताव अण्णपरिणामेण परिणमंति ताइं पत्तेयं २ सरीराइं भणंति, एवमेकेक्कस्स ओरालियसरीरस्स अणंतभेदभिण्णत्तणओ अणंताइं ओरालियसरीराइं भवंति, तत्थ जाइं दव्वाइं ताइं ओरालियसरीरप्पओगं मुयंति ताइं मोत्तुं सेसाइं ओरालियाइं चेव, तेसिं पुण असंखिज्जं कालं अवत्थाणं, तेणासंखिज्जेणं कालेणं जाव तं पढममोरालियमणंतगुणं जाव तं भावं मुयति—ताव अन्नाइं असंखिज्जाइं छड्डेइ ताइं तहेवाणंतभेदाइं हवंति, एवं जाहे असंखिज्जाइं अणंतयाइं भवंति, ताहे पढममणंतयं अणंतत्तणेण परिणमति तमोरालियभावं मुयति, एवमणंतमोरालियाणं, आह—कहमेक्केको सरीरदव्वदेसो सरीरत्तणेणोत्रचरि-

ज्ञति?, आयरिय आह—लवणादिवत्, यथा लवणस्य तुलाढककूडवादिष्वपि लवणोपचारो यावदेकशर्करायामपि सैव लवणाख्या विद्यते, केवलं संख्याविशेषः एवमिहापि प्राण्यंगैकदेशेऽपि प्राण्यङ्गोपचारः कपालादिवत्, एवमनन्तान्यौदारिकादीन्यपीति, अत्राह—कथं पुनस्तान्यनन्तलोकप्रमाणान्येकस्मिन्नेव लोकेऽवगाहन्ति?, अत्रोच्यते प्रदीपप्रकाशवत्, यथैकप्रदीपार्चिष्येकभवनाभासीनि भवन्ति अन्येषामप्यनेकेषां प्रदीपानामर्चिंषि तत्रैवानुविशन्त्यन्योऽन्याविरोधात् एवमौदारिकाण्यपीति, एवं सर्वशरीरेष्वपि आयोज्यमिति, अत्राह—किमुत्क्रमेण कालादिभिरुपसंख्यानं क्रियते?, कस्माद् द्रव्यादिभिरेव न क्रियते?, अत्रोच्यते, कालान्तरावस्थायित्वेन पुद्गलानां शरीरोपचार इतिकृत्वा कालो गरीयान्, तस्मात् तदादिभिरुपसंख्यानं, ओरालियाइं, संमत्ताइं ओहियाइं, दुविहाइंपि जहियाइं ओहिओरालियाइं, एयं सव्वेसिंपि एगिंदियाणं दव्वाइं, किं कारणं जेण ओहिओरालियाइंपि तेसिं पडुच्च वुच्चति?, वेउव्विया बद्धेल्लया असंखेज्जा असंखेज्जाहिं उस्सप्पिणीओसप्पिणीहिं तहेव असंखिज्जाओ सेढीओ, ताओ णं सेढीओ०, आह—का पुण एसा सेढी णाम?, उच्यते—सेढी लोगाओ णिप्फज्जति, लोगो पुण चउद्दसरज्जूसिओ हेट्ठा देसूणसत्तरज्जुविच्छिण्णो मज्झे एगं बंभलोगं पञ्च उवरिं लोगंते एगं रज्जुं विच्छिन्नो, रज्जु पुण सयम्भूरमणसमुद्दपुरत्थिमपच्चत्थिमवेदियंता, एस लोओ बुद्धिपरिच्छेदएण संवट्टेउं घट्टणो कीरति, कहं पुणं?, नालीए दाहिणिल्लमहेलोगखंडं हेट्ठा देसूणतिरज्जुविच्छिण्णं उवरिं देसूणजोयणविच्छिण्णं अतिरित्तसत्तरज्जूसियं घित्तुं ओमच्छियं उत्तरे पासे सङ्घातिज्जत्ति उड्ढलोए दो दाहिणिल्लाइं खंडाइं बंभलोए बहुमज्झदेसभाए बिरज्जुविच्छिण्णाइं सेसंतेसु अंगुलसहस्सभागविच्छिण्णाइं देसूणाध्धुट्ठरज्जूसियाइं घित्तुं उत्तरपासे विवरीयाइं सङ्घाइज्जंति, एवं किं जायं?, हेट्ठिलं लोगद्धं देसूणचउरज्जूविच्छिण्णं सातिरित्तसत्तरज्जूसितं जातं, उवरिल्लमद्धं तिरज्जुविच्छिण्णं देसूणसत्तरज्जूसियं जातं, उवरिल्लमद्धं घित्तुं हेट्ठिल्लस्स उत्तरे पासे संघाइज्जति, एवं किं जातं?, सातिरित्तसत्तरज्जूसितं देसूणसत्तरज्जुविच्छिण्णं जातं, उवरि सत्तरज्जु अब्भहियं घित्तुं च उत्तरे पासे उड्ढायय संघाइज्जति, तहावि सत्तरज्जु न पूरंति, ताहे जं दक्खिणिल्ला खंडा तस्स जस्स जमहियं बाहल्लओ तस्सद्धं छेत्तुं उत्तरओ बाहल्ले संघाइज्जति, एवं किं जातं?, वित्थरओ

आयामओ सत्त रज्जू बाहल्लओ रज्जुए असंखभागेण अहियाओ छ रज्जुओ, एवं सव्वलोगो ववहारेण सत्तरज्जुघणो जाओ, ऊणाइरित्तं जाणिऊण ततो बुद्धीए संघाएज्जा, जत्थ जत्थ सेढीगहणं तत्थ तत्थ एयाए सत्तरज्जुआययाए अवगंतव्वं, पयरस्सवि एयस्स चेव सत्तरज्जुयस्स चेव अणेण लोगेण खेत्तप्पमाणं, एवमेतेण सरीरप्पमाणेणं वेउव्वियाइं बद्धेल्लयाइं असंखिज्जसेढिप्पदेसरासिप्पमाणमित्ताइं, मुक्काइं जहा ओरालियाइं, आहारगो-बद्धाइं सिय अत्थि सिय नत्थि, किं कारणं ? जेण तस्स अंतरं जहण्णेणं एक्कं समयं उक्कोसेणं छम्मासा, तेण ण होतिवि कयाइ, यदि होंति जहण्णेण एक्को व दो व तिण्णि व उक्कोसेणं सहस्सपुहुत्तं, दोहिंतो आढत्तं पुहत्तसण्णा जाव णव, मुक्काइं, जहोरालियाइं मुक्काइं तेया बद्धा अणंता अणंताहिं उस्सप्पिणिओसप्पिणीहिं कालपरिसंख्याणं, खेत्तओ अणंता लोया, दव्वओ सिद्धेहिंतो अणंतगुणा सव्वजीवाणंतभागूणा, किं कारणमणंताइं ? तस्सामीण अणंतत्तणओ, आह-ओरालियाणंपि सामिणो अणंता, आयरिय आह-ओरालियसरीरमणंताणं एगं भवति साधारणत्तणओ, तेयाकम्माइं पुण पत्तेयं पत्तेयं सव्वसरीरिणं, तेयाकम्माइं पडुच्च पत्तेयं चेव सव्वजीवा सरीरिणो, ताइं च सव्वसंसारिणंतिकाउं, संसारी(रिणो) सिद्धेहिंतो अणंतगुणा होंति, सव्वजीवा अणंतभागूणा, के पुण ?, ते चेव संसारी सिद्धेहिं ऊणा, सिद्धा जीवाणं अणंतभागो, तेण ऊणा अणंतभागूणा भवंति, मुक्काइं अणंताइं अणंताहिं उस्सप्पिणिओसप्पिणीहिं कालपरिसंखाणं, खेत्तओ अणंता लोगा, दोवि पूर्ववत्, 'दव्वतो सव्वजीवेहिं अणंतगुणा जीववग्गस्स अणंतभागो', कहं सव्वजीवाणंतगुणा ? जाइं तेयाकम्माइं मुक्काइं ताइं तहेवाणंतभेदभिन्नाइं असंखिज्जकालवत्थाइयाणि जीवेहिंतो अणंतगुणाइं भवंति, केण पुण अणंतएण गुणाइं ?, तं चेव जीवाणं तएण गुणितं जीववग्गो भण्णति, एत्तियाइं होज्जा ?, आयरिय आह—एत्तियं न पावति, किं कारणं ?, असंखिज्जकालावत्थायित्तणओ तेसिं दव्वाणं, तो कित्तियाइं पुण होज्जा ?, जीववग्गस्स अणंतभागो, कहं पुण एतदेवं घित्तव्वं ?, आयरिय आह—ठवणारासीहिं णिदरिसणं कीरति, सव्वजीवा दस सहस्साइं घिप्पंति, तेसिं वग्गो दस कोडीओ होंति, सरीरयाइं पुण दससयसहस्साइं बुद्धीए अवधारिज्जंति, एवं किं जातं ?, सरीराइं जीवेहिंतो सतगुणाइं जाताइं, जीववग्गस्स दस (सततम) भागे संवुत्ताइं, णिदरिसणमेयं,

इहरा सब्भावतो एते तिण्णि वि रासी अणंता दट्ठव्वा, एव कम्मयाइं वि तस्सहभावत्तणओ तुल्लसंखाइं भवंति, एवं ओहियाइं पंच सरीराइं भणियाइं. 'णेरइयाणं' भंते' त्यादि, वैशेषिकं णारगादीणं इयाणीं भण्णति, णारगाणं ओरालिया सरीरा बद्धेल्लया णत्थि, ओरालियसरीरजोग्गदव्वगहणाभावत्तणओ, णेरइयाणं वेउव्विया बद्धेल्लया जावंत एव नारका, ते पुण असंखेज्जा, असंखिज्जाहिं उस्सप्पिणिओसप्पिणीहिं कालपमाणं, खेत्तओ असंखिज्जाओ सेढीओ तासिं पदेसमेत्ता णारगा, आह—पतरंमि असंखिज्जाओ सेढीओ?, आयरिय आह—सयलपयरसेढीओ ताव ण होंति, जइ होंति तो पतरं चेव भणंतं, आह—तो ताओ सेढीओ किं देसूणपयरवत्तिणीओ होज्जा?, अद्धपतरवत्तिणीओ तिभागचउभागवत्तिणीओ होज्जा?, ताओणं सेढीओ पतरस्स असंखिज्जइभागो, एवं विसेसियरं परिसंखाणं कहियं होति, अहवा इदमन्नं विसेसियतरं, विक्खंभसूतीए परिसंखाणं भण्णति. तासिणं सेढीणं विक्खंभसूतीअंगुलपढमवग्गमूलं, बितियवग्गमूलं ततियं जाव असंखिज्जइमंत्ति, तम्हा अंगुलविक्खंभखित्तवत्तिणो सेढिरासिस्स जं पढमं वग्गमूलं बितिएण वग्गमूलेण पडुप्पाइज्जति एवतियाओ सेढीओ सूती, अहवा इदं साम(अ)ण्णेण पगारेण पमाणं भण्णति जहा—अहव्वणं अंगुलबितियवग्गमूलघणप्पमाणमित्ताओ सेढीओ, तस्सेव अंगुलप्पमाणखेत्तवत्तिणो सेढिरासिस्स जं बितियं वग्गमूलं तस्स जो घणो एवतियाओ सेढीओ विक्खंभसूती, तासिणं सेढीणं पदेसरासिप्पमाणमित्ता नारगा तस्स सरीराइं च, तेसिं पुण ठवणंगुलेणं णिदरिसणं, दो छप्पणाइं सेढिसताइं अंगुलबुद्धीए घिप्पति, तस्स पढमं वग्गमूलं सोलस, बितियं चत्तारि, ततियं दोण्णि, तं पढमं सोलसयं ततिएण चउक्कण वग्गमूलेण गुणियं चउसट्ठी जाता, बितियवग्गमूलस्स वि चउक्कस्स य घणो सो चेव चउसट्ठी भवति, एत्थ पुण गणियघणो अणुवत्तिओ भवति, जं बहुयं थोवेण गुणिज्जति, तेण दो पगारा भणिता, इहरा तिण्णि वि भवंति, इमो ततिओ पगारो—अंगुलबितियवग्गमूलं पढमवग्गमूलपडुप्पण्णं, एवंपि सा चेव चउसट्ठी भवति, एते सव्वे रासी सब्भावतो असंखिज्जा दट्ठव्वा, एयाइं नारगवेउव्वियाइं बद्धाइं, मुक्काइं जहोहिओरालियाइं, एवं सव्वसरीराइं मुक्काइं भणियव्वाइं वणस्सतितेयाकम्माइं मोत्तुं, देवनारगाणं तेयाकम्माइं

दुविहाइंपि सट्ठाणवेउव्वियसरिसातिं, सेसाणं वणस्सतिवज्जाणं सट्ठाणोरालियसरिसाइं इदाणीं जं जस्स न भणियं तं भणिहामि–असुरवेउव्विया बद्धेल्लया असंखिज्जातो सेढीओ पयरस्स असंखिज्जइभागो, तासिणं सेढीणं विक्खंभसूती य पढमवग्गमूलस्स संखिज्जइभागा, तस्स अंगुलविक्खंभखेत्तवत्तिणो सेढिरासिस्स जं पढमं वग्गमूलं, तत्थ जाओ सेढीओ तासिं संखिज्जइभागो, एवं नेरइएहिंतो असंखेज्जगुणहीणा विक्खंभसूती भवति, जम्हा महादंडएवि असंखिज्जगुणहीणा सव्वे चेव भवणवासी रयणप्पभापुढविनेरइएहिंतोवि, किमुत सव्वेहिंतो, एवं जाव थणियकुमाराणं, पुढविआऊतेऊसु (वेउव्व) उववज्ज कंट्ठा भाणियव्वा, वाउकाइयाणं वेउव्विया बद्धेल्लया असंखिज्जा, समए समए अवहीरमाणा पलिओवमस्स असंखिज्जइभागमित्तेणं कालेणं अवहीरंति, णो चेव णं अवहीयाइं सिता, सूत्रं, कहं पुण पलिओवमस्स असंखिज्जइभागसमयमित्ता भवंति ?, आयरियाह—वाउकाइया चउविहा सुहुमा पज्जत्ता अपज्जत्ता, बादरावि पज्जत्ता अपज्जत्तावि, तत्थ तिण्णि रासी पत्तेयमसंखिज्जलोगपदेसरासिमित्ता, जे पुण बादरा पज्जत्ता ते परं पयरासंखिज्जइभागमित्ता, तत्थ ताव तिण्हं रासीणं वेउव्वियलद्धी चेव नत्थि, बादरपज्जत्ताणंपि संखिज्जइभागमित्ताणं लद्धी अत्थि, ततो पलिओमामसंखिज्जभागो चेव, ते पवन्नाइं ?, तं न जुज्जति, (किं) कारणं ?, जेण सव्वेसु च लोकाकाशादिषु वलयादिषु वायवो विज्जंति, तम्हा अविउव्वियावि तं घेत्तव्वं, सहावो तेसिं वातियव्वं, वाताद्धायुरेतिकृत्वा, बेइंदियोरालिया बद्धेल्लया असंखिज्जा असंखिज्जाहिं ओसप्पिणिउस्सप्पिणीहिं कालपरिमाणं, तहेव खित्तओ असंखिज्जाओ सेढीओ तहेव पतरस्स असंखिज्जइभागो, केवलं विक्खंभसूतीए विसेसो, विक्खंभसूती असंखिज्जाओ जोयणकोडाकोडीओत्ति विसेसियतरं परिसंखाणं, अहवा इममण्णं विसेसियतरं असंखिज्जाइं सेढीवग्गमूलाइं, किं भणियं होति ?, एक्काए सेढीए जो पदेसरासी तस्स पढमं वग्गमूलं बितियं ततियं जाव असंखिज्जाइं वग्गमूलाइं जो पदेसरासी भवति तप्पमाणा विक्खंभसूई बेइंदियाणं, निदरिसणं—पणट्ठि सहस्साइं पंच य सयाइं छत्तीसाइं पदेसाणं, तीसे पढमवग्गमूलं वे सता छप्पणा, बितियं सोलस्स, ततियं चत्तारि, चउत्थं दोण्णि, एवमेताइं वग्गमूलाइं संकलियाइं ॥ ९१ ॥

दो सता अट्ठुत्तरा भवंति, एवइया पदेसरासी सेढीणं विक्खंभसूई, एते च सद्भावतो असंखिज्जया मूलरासी एसेयं२ घेत्तव्वा, इदाणीं इमा मग्गणा–किंपमाणाहिं पुण ओगाहणाहिं पूरइज्जमाणा बेइंदिया पयरं पूरिज्जंति? तत्तो आह सुत्तं. बेइंदियाणं ओरालियसरीरेहिं बद्धेल्लएहिं पतरं अवहीरति असंखिज्जाहिं उस्सप्पिणिओसप्पिणीहिं कालतो,' तं पुण पतरं अंगुलपयरासंखेज्जइभागमित्ताहिं सव्वं पूरिज्जति, तं पुण केवइएणं कालेणं पूरइज्जति धारेज्जति, (साहिज्जति) वा ?, भण्णति–असंखिज्जाहिं उस्सप्पिणिओसप्पिणीहिं, किं पमाणेण पुण खेत्तकालावहीरणं ?, भण्णति, 'अंगुलपयरस्स आवलियाए असंखिज्जइभागपलिभागेणं, जो सो अंगुलपयरस्स असंखिज्जइभागो एवइएहिं पलिभागेहिं अवहीरति, एस खेत्तावहारो, आह–असंखिज्जइभागगहणेण च्चेव सिद्धं किं पलिभागगहणेणं ?, भण्णति–एक्केक्कं बेइंदिय पलिइ भागो सो परिभागमेत्तेणं कालं भणियं अवगाहोत्ति, कालपलिभागो आवलियाए असंखिज्जइभागो, एएण आवलियाए असंखिज्जइभागमेत्तेणं कालपलिभागेणं एक्केके खित्तपलिभागे साहिज्जमाणे सव्वं लोगपयरं साहिज्जति खेत्तओ, कालतो असंखिज्जाहिं उस्सप्पिणिओसप्पिणीहिं, एवं बेइंदियओरालियाणं उभयमप्यभिहितं संखप्पमाणं ओगाहणपमाणं च, एवं तेइंदियचउरिंदियपंचिंदियतिरिक्खजोणियाणवि भाणियव्वाइं, पंचिंदियतिरियबद्धेल्लया असंखिज्जा असंखिज्जाहिं उस्सप्पिणिओस्सप्पिणीहिं कालओ, तहेव, खित्तओ असंखिज्जाओ सेढीओ, पयरस्स असंखिज्जइभागो विक्खंभसूती, णवरं अंगुलपढमवग्गमूलस्स असंखिज्जतिभागो सेसं जहा असुरकुमाराणं मणुयाणं ओरालिया बद्धेल्लया सिय संखिज्जा सिय असंखिज्जा, जहण्णपदे संखेज्जइभागो सेसं जहा असुरकुमाराणं, जहण्णपदं नाम जत्थ सव्वत्थोवा मणुस्सा भवंति, आह–किं एयं संमुच्छिमाणं गहणं अह तव्विरहियाणं ?, आयरिय आह—गब्भवक्कंतिया निय(च्च)कालमेव संखिज्जा परिमितक्षेत्रवर्त्तित्वात् महाकायत्वात् प्रत्येकशरीरत्वाच्च, तस्मात् सेतराणां ग्रहणं उक्कोसपदे, जहण्णपदे गब्भवक्कंतियाण चेव केवलाणं गहणं, किं कारणं ?, जेंण संमुच्छिमाणं चउवीसं मुहुत्ता अंतरं अंतोमुहुत्तं च ठिती, जहण्णपदे संखिज्जा, संखित्तत्तणएण ण णज्जति, कतरंमि संखिज्जपदे होज्जा ?, तेण विसेसं करेति, जहा–संखिज्जाओ कोडीओ, अहवा इदमण्णं विसेसियतरं परिसंखाणं वा ण

णिद्देसं पडुच्च वुच्चति, कहं?, एगूणतीस ठाणाइं, तेसिं सामितिकीए सन्नाए निद्देसं करोमि-जहा तिजमलपदस्स उवरिं चउजमलपदस्स हिट्ठा, किं भणितं होति?, अट्ठण्हं अट्ठण्हं ठाणाणं जमलपदंति सण्णा सामयिगी, तिण्णि जमलपदाइं समुदियाइं तिजमलपदं, अहवा ततियं जमलपदं तिजमलपदं, एयस्स तिजमलपदस्स उवरिमेसु ठाणेसु वट्टति, जं भणियं-चउवीसण्हं ठाणाणं उपरि वट्टति, चत्तारि जमलपदाइं चउजमलपदं, अहवा चउत्थं जमलपदं चउजमलपदं, किं च तं?, बत्तीसं ठाणाइं चउजमलपदं एयस्स चउजमलपदस्स हेट्ठा वट्टति मणुस्सा, [अन्नेहिंतिहिं ठाणेहिंतो पावंति,] जइ पुण बत्तीसं ठाणाइं पूरंताइं तो चउजमलपदस्स उवरिं भण्णति, जम्हा बत्तीसं ण पावति तम्हा हेट्ठा भण्णंति, [जदि] अहवा दोन्निर वग्गा जमलपदं भण्णति, छ वग्गा समुदिता तिजमलपदं, अहवा सत्तमठाणं चउत्थं जमलपदं चउजमलपदं, जेणं च छण्हं वग्गाणं उवरिं वट्टंति सत्तमठाणस्स च हेट्ठा तेणं तिजमलपदस्स उवरिं चउजमलपदस्स हेट्ठत्ति भण्णति, संखेज्जाओ कोडीओ ठाणविसेसेण नियामियाओ, इदाणीं विसेसितरं फुडं संखाणमेव निदरिसति जहा-अहव ण छट्ठ वग्गो पंचमवग्गपडुप्पणो, छ वग्गा उवठाविज्जंति तंजहा-एक्कस्स वग्गो एक्को, एस पुण वड्डीरहिओत्तिकाउं वग्गो चेव न भवति, तेण विण्ह वग्गो चत्तारि एस पढमो वग्गो, एयस्स वग्गो सोलस, एस बितियवग्गो, एयस्स वग्गो बेसता छप्पण्णा, एस ततिओ वग्गो, एयस्स वग्गो पणट्ठि सहस्साइं पंचसयाइं छत्तीसाइं एस चउत्थो वग्गो, एयस्स इमो वग्गो, तंजहा-चत्तारि कोडिसताओ अउणतीसं च कोडीओ अउणावण्णं च सयसहस्साइं सत्तट्ठिं च सहस्साइं दो य सयाइं छण्णउयाइं, इमा ठवणा-४२९४९६७२९६, एस पंचमो वग्गो, एयस्स गाहाओ—चत्तारि य कोडिसया अउणातीसं च होंति कोडीओ। अउणावण्णं लक्खा सत्तट्ठिं चेव य सहस्सा॥ १॥ दो य सया छन्नउया पंचमवग्गो समासओ होइ। एयस्स कओ वग्गो छट्ठो जो होइ तं वोच्छं॥ २॥ "एयस्स पंचमवग्गस्स इमो वग्गो होइ, तंजहा-इक्कं कोडाकोडी सतसहस्सा चउरासितिं च कोडाकोडिसहस्सा चत्तारि य सत्तट्ठा कोडाकोडिसया चोयालीसं च कोडिसयसहस्सा सत्त य कोडिसहस्सा तिन्नि य सत्तरा कोडिसया पंचाणउइं च सतसहस्सा एक्कावण्णं च सहस्सा छच्च सयासोलसुत्तरा, इमा ठवणा—१८४४६७४४०-

७३७०९५५१६१६, एस छट्ठो वग्गो, एयस्स गाहाओ, तंजहा—"लक्खं कोडाकोडी चउरासीई भवे सहस्साइं। चत्तारि सत्तट्ठा होंति सया कोडिकोडीणं ॥ १ ॥ चोयालीसलक्खाइं कोडीणं सत्त चेव य सहस्साइं। तिण्णि सया सत्तयरी कोडीणं होंति नायव्वा ॥ २ ॥ पंचाणउती लक्खा एक्कावण्णं भवे सहस्साइं। छसोलसुत्तरसया य एत्थ छट्ठो हवति वग्गो ॥ ३ ॥ एत्थ य पंचमछट्ठेहिं पओयणं, एस छट्ठो वग्गो पंचमेण वग्गेण पडुप्पाइज्जति, पडुप्पाइए समाणे जं होति एवइया जहण्णपतिया मणुस्सा हवंति, ते य इमे एवइया—७९२२८१६२५१४२६४३३७५९३५४३९५०३३६, एवमेताइं अउणतीसं ठाणाइं, एवइया जहण्णपइया मणुस्सा, छ तिण्णि२ सुण्णं पंचेव य नव य तिण्णि चत्तारि। पंचेव तिण्णि णव पंच सत्त तिण्णेव तिण्णेव ॥ १ ॥ चउ छ दो चउ एक्को पंच दु छक्केक्कगो य अट्ठेव। दो दो नव सत्तेव य ठाणाइं उवरि हुंताइं ॥ २ ॥ अहवा इमो पढमक्खरसंगहो त्ति 'छत्ति त्ति सु प ण ति च प ति ण प स ति ति च छ दु च ए प दुच्छ ए अ वे वि ण स पढमक्खरसन्नि(संग)या ठाणा ॥ १ ॥' एते पुण निरभिलप्पा कोडिहिं वा कोडाकोडीहिं चत्तिकाउं तेण पुव्व पुव्वंगेहिं परिसंखाणं कीरति, चउरासीइ सयसहस्साइ पुव्वंगं भण्णति, एयं एवतिएण चेव गुणियं पुव्वं भण्णति, तं च इमं—सत्तरिं कोडिसतसहस्साइं छप्पण्णं च कोडिसहस्साइं, एतेण भागो हीरति, ततो इदमागतं फलं भवति—एक्कारस पुव्वकोडाकोडीओ बावीसं च पुव्वकोडिसतसहस्साइ चउरासीइं च पुव्वकोडीसहस्साइ अट्ठ दसुत्तरा पुव्वकोडिसता एक्कासीतिं च पुव्वसयसहस्साइं पंचाणउतिं च पुव्वसहस्साइंत्ति, तिण्णि य छप्पणो पुव्वसया, एतं भागलद्धं भवति, तओ पुव्वेहिं भागं ण पयच्छति, पुव्वंगेहिं भागो हीरति, ततो इदमागतफलं भवति—एकवीसं पुव्वंगसतसहस्साइं सत्तरिं पुव्वंगसहस्साइं छच्च एगूणसट्ठाइं पुव्वंगसयाइं, ततो इदण्णं वेगलं भवति—तेसीतिमणुस्ससतसहस्साइं पण्णासं च मणुयसहस्साइं तिण्णि य छत्तीसा मणुस्ससता, एसा जहण्णपदियाणं मणुस्साणं संखा, एतेसिं गाहाओ—मणुयाण जहण्णपदे एक्कारस पुव्वकोडिकोडिओ। बावीस कोडिलक्खा कोडिसहस्सा य चुलसीई ॥ १ ॥ अट्ठेव य कोडिसया पुव्वाण दसुत्तरा तओ होंति। एक्कासीतिं लक्खा पंचाणउती-सहस्सा य ॥ २ ॥ छप्पण्णा तिण्णि सया पुव्वाणं पुव्ववण्णिया अण्णे। एत्तो पुव्वंगाइं इमाइं अहियाइं

भण्णाति ॥ ३ ॥ लक्खाइ एक्कवीसं पुव्वंगाण सत्तरिं सहस्सा य। छच्चेवेगूणट्ठा पुव्वंगाणं सता होति ॥ ४ ॥ तेसीति सतसहस्सा पण्णासं खलु भवे सहस्सा य। तिण्णि सया छत्तीसा पवतिया वेगला मणुया ॥ ५ ॥ एयं चेव य संखं पुण अण्णेण पगारेण भण्णति विसेसोवलंभनिमित्तं, तंजहा—'अहव ण छण्णउतिछेदणगदायी रासी' छन्नउति छेदं जो देति रासी सो छन्नउतिछेदयणगदायी, किं भणितं होति ?, जो रासी दोवारा छेदेण छिज्जमाणो २ छन्नउतिवारे छेदं देति, सकलरूपपज्जवसितो, तत्तिता वा जहण्णपतिया मणुस्सा, ततिया ओरालिया वा वद्धेल्लया, को पुण रासी छणउतिछेदणगदाई भवेज्जा ?, भण्णति—एस चेव छट्ठो वग्गो पंचमवग्गपडुप्पयो जत्तिओ भणितो एस छणउतिछेदणए देति, को पच्चतो ?, भण्णति—पढमो वग्गो छिज्जमाणो दो छेदणए देति, वितिओ चत्तारि, ततिओ अट्ठ, चउत्थो सोलस, पंचमो छत्तीसं, छट्ठो चउसट्ठी, एतेसिं पंचमछट्ठाणं वग्गाणं छेदणता मिलिया छन्नउति भवंति, कहं पुण ?, जम्हा जो जो वग्गो जेण वग्गेण गुणिज्जइ तेसिं दोण्हवि तत्थ छेयणा लब्भंति, जहा-पढमवग्गो बितिएण गुणिओ छेदणे छ देंति, बितिएण ततिओ गुणिओ बारस, ततिएण चउत्थो गुणिओ चउवीसं, चउत्थेण पंचमो गुणिओ अडयालीसं छेदणए देंति, एवं पंचमेण वि छट्ठो गुणिओ छन्नउति छेदणए देंति, एस पच्चओ, अहवा रूपं ठवेऊण तं छन्नउतिवारे दुगुणा दुगुणं कीरति, कतं समाणं जति पुव्वभणियपरिमाणं पावति तो छिज्जमाणंपि ते चेव छेदणए दाहितित्ति पच्चतो, एवं जहण्णपदमभिहितं, उक्कोसपदमियाणिं, तत्थ इमं सुत्तं—'उक्कोसपदमसंखिज्जा, असंखिज्जाहिं उस्सप्पिणिओसप्पिणीहिं कालओ, खेत्तओ रूवपक्खित्तेहिं मणुस्सेहिं सेढी अवहीरति,' किं भणियं होति ?, उक्कोसे पदे जे मणुस्सा भवंति तेसु एक्कम्मि मणुस्सरूवे पक्खित्ते समाणे तेहिं मणुस्सेहिं लोगसेढी अवहीरति, तीसे य सेढीए कालखेत्तेहिं अवहारो मग्गिज्जति, कालतो ताव असंखिज्जाहिं उस्सप्पिणिओसप्पिणीहिं, खित्तओ अंगुलपढमवग्गमूलं ततियवग्गमूलपडुप्पण्णं, किं भणियं होति ?, तीसे सेढीए अंगुलायतते खंडे जो पदेसरासी तस्स जं पढमं वग्गमूलं तं ततियवग्गमूलपदेसरासिणा पडुप्पातिज्जति, पडुप्पादिए जो पदेसरासी भवति एवइएहिं खंडेहिं सेढी अवहीरमाणा २ जाव निट्ठाति ताव मणुस्साऽवि अवहीरमाणा णिट्ठाति, आह—कहमेका सेढी एदहमेत्तेहिं खंडेहिं अवहीर-

माणा २ असंखेज्जाहिं उस्सप्पिणिओसप्पिणीहिं अवहीरति ?, आयरिया आह—खित्तादि सुहुमत्तणतो, सुत्ते य भणियं 'सुहुमो य होति कालो तत्तो सुहुमयरं हवति खित्तं। अंगुलसेढीमेत्ते उस्सप्पिणीओ असंखिज्जा ॥ १ ॥ वेउव्विया बद्धेल्लया समये२ अवहीरमाणा २ संखिज्जेणं कालेणं अवहीरंति, पठितसिद्धं, आहारगाइं जहा ओहियाइं, वाणमंतरवेउव्विया असंखिज्जाहिं उस्सप्पिणिओसप्पिणीहिं तहेव, खेत्तओ असंखिज्जाओ सेढीओ, सेढीणं विक्खंभसूती, वक्तव्येति वाक्यशेषः, कंठ्या नोक्ता, किं कारणं ?, पंचिंदियतिरियोरालियसिद्धत्तणओ, जम्हा महादंडए पंचिंदियतिरियणपुंसएहिंतो असंखिज्जगुणहीणा वाणमंतरा पढिज्जंति, एवं विक्खंभसूतीवि तेसिं तेहिंतो असंखिज्जगुणहीणा चेव भाणियव्वा, इदाणीं पलिभागो संखेज्जजोयणसतवग्गपलिभागो पयरस्स, जं संखिज्जजोयणसतवग्गमित्ते पलिभागे एक्केक्के वाणमंतरे ठविज्जंते पतरं पूरिज्जति, तम्मत्तपलिभागो ण चेव अवहीरंति, 'जोइसियाणं' इत्यादि, जोइसियाणं वेउव्विया बद्धेल्लया असंखिज्जा, असंखिज्जाहिं उस्सप्पिणिओसप्पिणीहिं अवहीरंति कालतो, खित्तओ असंखिज्जाओ सेढीओ पयरस्स असंखिज्जइभागोत्ति तहेव विसेसो, तेसिं णं सेढीणं विक्खंभसूई, वक्तव्येति शेषः, कण्ठ्या [न किंचातः] श्रूयते, जम्हा वाणमंतरेहिंतो जोइसिया संखिज्जगुणा पढिज्जंति, तम्हा विक्खंभसूई वि तेसिं तेहिंतो संखिज्जगुणा चेव भवति, णवरं पलिभागविसेसो, जहा बिछप्पण्णंगुलसयवग्गपलिभागो पयरस्स, एवइए पलिभागे ठविज्जमाणे एक्केको जोइसिओ सव्वं पयरं पूरिज्जति, तहेव सोहिज्जइ वि, जोइसियाणं वाणमंतरेहिंतो संखेज्जगुणहीणो पलिभागो संखिज्जगुणाब्भहिया सूई। 'वेमाणिय' इत्यादि, वेमाणियाणं वेउव्विया बद्धेल्लया असंखेज्जा कालओ तहेव, खेत्तओ असंखिज्जाओ सेढीओ ताओ णं सेढीओ पयरस्स असंखिज्जइभागो, तासि णं सेढीणं विक्खंभसूई अंगुलबितियवग्गमूलं ततियवग्गमूलपडुप्पण्णं, अहवा अंगुलततियवग्गमूलघणप्पमाणमेत्ताओ सेढीओ तहेव, अंगुलविक्खंभखेत्तवत्तिणो सेढीरासिस्स पढमं वग्गमूलं बितियं ततियं चउत्थं जाव असंखिज्जाइंत्ति, तेसिंपि जं बितियं वग्गमूलं ततियवग्गमूलसेढिप्पदेसरासिणा गुणिज्जति, गुणिए जं होति ततियाओ सेढीओ विक्खंभसूई भवति, ततियस्स वा वग्गमूलस्स जो घणो एवइयाओ सेढीओ विक्खंभसूई, णिदरिसणं तहेव, बेछप्पण्ण-

सतियमंगुलिं तस्स पढमवग्गमूलं सोलस, बितियं चत्तारि, ततियं दोण्णि, बितियं ततिएण गुणियं अट्ठ भवंति, ततियं बितिएण गुणियं ते चेव अट्ठ, ततियस्स वि जो घणो सोवि ते चेव अट्ठ, एवमेते सब्भावतो असंखिज्जा रासी दट्ठव्वा, एवमेयं वेमाणियप्पमाणं णेरइयप्पमाणतो असंखिज्जगुणहीणं भवति, किं कारणं?, जेण महादंडए वेमाणिया नेरइएहिंतो असंखिज्जगुणहीणा चेव पढिज्जंति, एतेहिंतो नेरइया असंखिज्जगुणत्ति, शेषं निपुणधिया परस्परव्यक्तिभूता अत्र चेदं (युक्तिमता सूत्रादेवेदं) भावनीयमिति ।

॥ प्रज्ञापनाप्रदेशव्याख्यायां द्वादशशरीरपदव्याख्या समाप्तेति ॥

साम्प्रतं त्रयोदशमारभ्यते, तस्य चायमभिसंबन्धः–इहानन्तरपदे औदारिकादिशरीरविभाग उक्तः, तानि पुनः शरीराणि तथापरिणामे सति भवन्तीत्यतः परिणामस्वरूपप्रतिपादनायेदमारभ्यते इह चेदमादिसूत्रं–'कतिविहे णं भंते!' "परिणामो ह्यर्थान्तरगमनं न च सर्वथा व्यवस्थानं । न च सर्वथा विनाशः परिणामस्तद्विदामिष्टः ॥ १ ॥ द्रव्यार्थस्य । सत्पर्यायेण नाशः प्रादुर्भावोऽसतो च पर्ययतः । द्रव्याणां परिणामः प्रोक्तः खलु पर्ययनयस्य ॥ २ ॥" दुविहे पण्णत्ते जीवपरिणामे य अजीवपरिणामे य, तत्र यो जीवपरिणामः स प्रायोगिकः, यः पुनरजीवपरिणामो वर्णादिः स वैश्रसिकः, तत्र जीवपरिणामो दशविधो गतिपरिणामादिः, गतिरेव परिणामो गतिपरिणामः, इंद्रियाण्येव परिणामः इन्द्रियपरिणामः, कषाय एव परिणामः कषायपरिणामः, लेश्या एव परिणामो लेश्यापरिणामः, योग एव परिणामः योगपरिणामः, उपयोग एव परिणामः उपयोगपरिणामः, ज्ञानमेव परिणामो ज्ञानपरिणामः, दर्शनमेव परिणामः दर्शनपरिणामः, चारित्रमेव परिणामः चारित्रपरिणामः, वेद एव परिणामो वेदपरिणामः, गमनं गतिः "अनेकार्था धांतव" इति न देशान्तरप्राप्तिलक्षणा, गतिनामकर्मोदयान्नारकादिर्या संज्ञा सा गतिर्निरुच्यते, तस्याश्च कारणं गतिनामोदयः, गतिपरिणामश्च आभवक्षयात्, इदानीं क्रमकारणमुच्यते, गतिपरिणामे सति इंद्रियपरिणामः, इन्द्रियपरिणामे च इष्टविषयसम्बन्धाद् रागद्वेषपरिणतिरिति कषायाः, कषायपरिणतिर्देशोनां पूर्वकोटिं भवति, यस्मादुक्तं लेश्यानां स्थितिनिरूपणाधिकारे लेश्याध्ययने शुक्ललेश्याया जघन्योत्कृष्टा स्थितिः–"मुहुत्तद्धं

तु जहण्णा, उक्कोस हवंति पुव्वकोडीओ। णवहिं वरिसेहिं ऊणा णायव्वा सुक्कलेसाए ॥ १ ॥" योगपरिणामे च सति लेश्यापरिणामः यस्मान्निरुद्धयोगस्य परिणामोऽपैति, यतः समुच्छिन्नक्रियं ध्यानमलेश्यस्य भवति, संसारिणां च योगपरिणतावुपयोगपरिणतिर्भवति अतो योगपरिणामानंतरमुपयोगपरिणामः, सति चोपयोगपरिणामे ज्ञानपरिणामः ज्ञानाज्ञानपरिणामे च सति सम्यग्मिथ्यापरिणतिः, सम्यग्दर्शनपरिणामे च चारित्रपरिणामः, स्त्र्यादिवेदपरिणामे चारित्रपरिणामः नतु चारित्रपरिणामे वेदवृत्तिः यस्मादवेदकस्यापि यथाख्यातचारित्रपरिणतिर्दृष्टा, एवमेते गत्यादिपरिणामविशेषा हेतुहेतुमद्भावेनोपदिष्टाः सामान्यतः, इदानीमुत्तरो ग्रन्थः संख्याभेदेन परिणामभेदेन चानुसरणीयः, 'अजीवपरिणामे दसविहे' बंधणपरिणामादितः, बंधनपरिणामस्य इदं लक्षणं "समणिद्धयाए बन्धो ण होति समलुक्खयाए वि ण होति। वेमाइयणिद्धलुक्खत्तणेण बंधो उ खंधाणं" ॥ १ ॥ एतदुक्तं भवति–समगुणस्निग्धस्य समगुणस्निग्धेन परमाण्वादिना बंधो न भवति, तथा समगुणरूक्षस्यापि, यदा पुनर्विषमा मात्रा तदा भवति बंधः, विषममात्रापि निरूपणार्थमुच्यते–"णिद्धस्स णिद्धेण दुयाहिएणं लुक्खस्स लुक्खेण दुयाहिएणं। णिद्धस्स लुक्खेण उवेति बंधो, जहण्णवज्जो विसमो समो वा ॥ १ ॥ यदा स्निग्धगुणस्य परमाण्वादेः स्निग्धगुणेनैव बंधो भवति तदा द्व्यधिकादिगुणेनैव, रूक्षगुणस्यापि रूक्षगुणेन द्व्यधिकादिगुणेन, यदा पुनः स्निग्धरूक्षयोर्बन्धस्तदा कथम् ? उच्यते–जघन्यगुणं वर्जयित्वा, जघन्यगुणमिति एकगुणस्निग्धं एकगुणरूक्षं च, शेषस्य द्विगुणस्निग्धस्य द्विगुणरूक्षादिना सर्वत्र बन्धो भवति, 'फुसमाणगतिपरिणामो' येन प्रयत्नविशेषात् क्षेत्रप्रदेशान् स्पृशन् गच्छतीति, 'अफुसमाणगतिपरिणामो' तु येनास्पृशन्नेव, न च सम्भाव्यते खल्वयं परिणामः गतिमद्द्रव्याणां प्रयत्नभेदोपलब्धेः, तथाहि अभ्रंकषहर्म्यतलगतविमुक्ताश्मप्रपातकालभेद उपलभ्यते, अनवरगतिप्रवृत्तत्वाच्च देशान्तरप्राप्तिकालभेदश्चेत्यतः सम्भाव्यते (न) अधिकृतपरिणाम इति, अथवा 'दीहगतिपरिणामे य हस्सगतिपरिणामे य' तत्थ दीहगतिपरिणामे इति विप्रकृष्टदेशान्तरप्राप्तिपरिणामः, ह्रस्वगतिपरिणामः, इति सन्निकृष्टदेशान्तरप्राप्तिपरिणामः, 'सुब्भिसद्देत्ति' शुभः शब्दः 'दुब्भिसद्देत्ति' दुर्भिशब्द इति शेषं गतार्थम् ॥

॥ प्रज्ञापनाप्रदेशव्याख्यायां त्रयोदशपरिणामपदव्याख्या समाप्तेति ॥

अधुना चतुर्दशं पदमारभ्यते, अस्य चायमभिसम्बन्धः-इहानन्तरपदे गत्यादिलक्षणजीवपरिणामः सामान्येनोक्तः, तत्र सामान्यस्य विशेषविषयत्वाद्विशेषतः स एव क्वचित् कश्चित् प्रतिपाद्यते, तत्रैकेन्द्रियाणामपि क्रोधादिकषायभावात् प्रधानबन्धहेतुत्वात् "सकषायत्वाज्जीवः कर्मणो योग्यान् पुद्गलानादत्ते" (तत्त्वा० अ० ८ सू० २) इति वचनादादावेव विशेषतः कषायपरिणामप्रतिपादनार्थमिदमारभ्यते, इह चेदमादिसूत्रं-'कइणं भंते! कसाया पण्णत्ता?' इत्यादि, कियन्तो भदन्त! कषायाः प्रज्ञप्ताः?, तत्र कषाया इति निरुक्तमुच्यते, "सुहदुक्खबहुसतीयं कम्मकखेत्तं कसंति ते जम्हा। कलुसंति जं च जीवं तेण कसायत्ति वुच्चंति ॥ १ ॥ अहवा-कम्मं कसं भवो वा कसमायो सिं जतो कसायातो। कसमाययंति व जतो गमयंति कसं कसायत्ति ॥ २ ॥ निर्वचनसूत्रं क्षुण्णार्थं, नेरइयाणमित्यादि प्रश्नः निर्वचनं-चत्तारि कषाया पण्णत्ता' इत्येतत् प्रवाहापेक्षया भावनीयं तत्कर्म्मपुद्गलप्रदेशाऽनुभवतो वेति, 'आतपइट्ठित' इति, आत्मन्येव प्रतिष्ठितः, एतदुक्तं भवति-यत् स्वयमाचरति तस्य ऐहिकं प्रत्यपायं दृष्ट्वा आत्मनः क्रुध्यतीत्यात्मप्रतिष्ठितः, परप्रतिष्ठितः यदा पर उदीरयति आक्रोशादिना तदा नैगमनयदर्शनेन परप्रतिष्ठित उच्यते, कथं? यथा सम्यग्दर्शनपरीक्षायामधिकरणानुयोगद्वारे आत्मसन्निधाने जीवे सम्यग्दर्शनं परसन्निधानेऽजीवे सम्यग्दर्शनमित्यष्टास्वपि भंगेषु भवति एवमिहापीति, उभयपतिट्ठिए आत्मपरप्रतिष्ठितः, अनुभयप्रतिष्ठित इति (न) आक्रोशादिकारणवशाद् (सापेक्षाणि निरपेक्षाणि च) कर्म्माणि फलविपाकेषु। सोपक्रमं च निरुपक्रमं च दृष्टं यथाऽऽयुष्कम् ॥ इति एवं तावदधिकरणभेदेन भेद उक्तः, अधुना सम्बन्धित्वेन भेद उच्यते, 'खेत्तं पडुच्च' इत्यादि, तत्र नारकाणां नारकक्षेत्रं प्रतीत्य तिरश्चां तिर्यक्क्षेत्रं मनुष्याणां मनुष्यक्षेत्रं देवानां देवक्षेत्रमिति, 'वत्थुं पडुच्चत्ति' वस्तु सचेतनमचेतनं वा शरीरं प्रतीत्य दुष्टसंस्थितं विरूपं वा, 'उपधिं पडुच्च' यद्यस्य उपकरणं, इदानीं सम्यग्दर्शनादिगुणघातित्वेन, 'अणंताणुबंधी'त्यादि अनन्तं संसारमनुबद्धुं शीलमस्येति अनन्तानुबंधी क्रोधः, तथा स्वल्पमपि प्रत्याख्यानमावृणोतीति अप्रत्याख्यानावरणः, [सर्व] प्रत्याख्यानावरणः-सर्वं प्रत्याख्यानमावृणोतीति प्रत्याख्यानावरणः, संज्वलयतीति संज्वलनः, उक्तं च तत्र "अनन्तान्यनुबध्नन्ति यतो जन्मानि भूतये। ततोऽनन्तानुबन्ध्याख्या क्रोधाद्येषु निदर्शिता ॥ १ ॥ नाल्पमप्यु-

त्सहेद्येषां, प्रत्याख्यानमिहोदयात्। अप्रत्याख्यानसंज्ञाऽतो, द्वितीयेषु निवेशिता ॥ २॥ सर्वसावद्यविरतिः, प्रत्याख्यानमुदाहृतम्। तदावरणसंज्ञाऽतस्तृतीयेषु निवेशिता ॥ ३ ॥ शब्दादीन् विषयान् प्राप्य, संज्वलन्ति यतो मुहुः। अतो संज्वलनीयाख्या, चतुर्थानामिहोच्यते ॥ ४ ॥ तेषामेव क्रोधादीनां निवृत्तिप्रतिभेद आख्यायते-'आभोगनिव्वत्तिएत्ति' जानन् रुष्यति, अणाभोगनिव्वत्तिए' अजानन् रुष्यति उपशान्त अनुदयावस्थः, अनुपशान्त इति उदयप्राप्तः, इदानीं फलभेदेन कालत्रयवर्तिना भेद उच्यते-'चउहिं ठाणेहिं कम्मं चिणिंसु' इत्यादि, [पापग्रहणात् घातिकर्म्मणां ग्रहणं, अथवा सर्वमेव हि कर्म्म पापमित्युच्यते,] तत्र चयनं नाम कषायपरिणतस्य कर्म्मपुद्गलोपादानमात्रं गृह्यते, उपचयो ग्रहणान्वितस्य अबाधाकालं मुक्त्वा उत्तरकालं ज्ञानावरणीयादिकर्म्मतया निषेकः, यस्मादुक्तं कर्म्मप्रकृतिसंग्रहणिकायां स्थितिबंधाधिकारे अबाधाकण्डके-"मोत्तूणं सगमवाहं पढमाइ ठितीए बहुतरं दव्वं। सेसे विसेसहीणं जावुक्कसंति सव्वासिं ॥ १ ॥" णाणावरणिज्जादिकम्माणं अप्पणो जाव अवाहा तिवाससहस्साइया तं अवाहाकालं मोत्तूणं णाणावरणिज्जादिकम्मतया पढमाए ठितीए बहुयं कम्मदलियं [निसिंचति, बंधिस्संति बंधग्रहणात् तदेव ज्ञानावरणादिकर्म्मतया,] ताव विसेसहीणं निसिंचति, तथा 'बंधिसु बंधंति बंधिस्संति' बन्धग्रहणात् तदेव ज्ञानावरणादिकर्म्मतया निषिक्तं पुनरपि कषायपरिणतिविशेषान्निकाच्यते, तद् बन्धशब्देन कालत्रयेऽपि निकाचितावस्थं दर्श्यते, तथा 'उदीरिंसु उदीरंति उदीरिस्संति' उदीरणा हि अनुदयप्राप्तं चिरेण आगामिना कालेन यद् वेदयितव्यं कर्म्मदलिकं तस्य विशिष्टनाध्यवसायविशेषेण करणेनाकृष्य उदये प्रक्षेपणमुदीरणा, सा च कषायपरिणतिविशेषादेव भवति, तथा वेदना कालत्रयेऽपि, वेदना तु कर्म्मण उपभोगोऽनुभवः तत्र वेदनं स्थितिक्षयादुदयप्राप्तस्य कर्म्मण उदीरणाकरणेन वा उदयभावमुपनीतस्य भवति, तथा 'णिज्जरिंसु' त्ति निर्ज्जरा नाम कर्म्मणोऽकर्म्मत्वभवनं, ततश्च आत्मप्रदेशेन सह संश्लिष्टस्य कर्मणः शातनं, तथा चोक्तं-"पुव्वकयकम्मसाडणं तु णिज्जरा" इति, ध्रुवोदयत्वात् क्रोधादिवेदनीयकर्म्मणां, तेनोच्यते णिज्जरिंसु ३, कोहकसाएणं माणकसाएणं मायाकसाएणं लोभकसाएणं इयं वा देशनिर्जरा पुनः चतुर्विंशतिदण्डकेऽपि भवति ॥

॥ प्रज्ञापनाप्रदेशव्याख्यायां चतुर्दशकषायपदव्याख्या समाप्तेति ॥

साम्प्रतं पंचदशमारभ्यते, अस्य चायमभिसम्बन्धः, इहानन्तरपदे प्रधानबन्धहेतुत्वाद्विशेषतः कषायपरिणाम उक्तः, तदनन्तरमिन्द्रियवतामेव लेश्यादिसद्भावाद् विशेषतः इन्द्रियपरिणामनिरूपणायेदमभिधीयते, तत्रेन्द्रियपदस्य प्रथमोद्देशके इन्द्रियाणां संस्थानाद्यर्थसंग्रहार्थमिदं गाथाद्वयं-'संठाणं बाहल्लं पोहत्तं कतिपदेस अवगाढे । अप्पाबहु पुट्ठ पविट्ठ विसय अणगार आहारे ॥ १ ॥ अद्दाय असीय मणी दुद्ध पाणा तेल्ल फाणिय वसा य । कंबल थूणा थिग्गले दीवोदहि लोगऽलोगे य ॥२॥' तत्र संस्थानाद्यर्थप्रश्नव्याकरणात्मो ग्रन्थप्रबन्धः-'कति णं भंते ! इंदिया' इत्यादि, तानि पुनरिन्द्रियाणि सत्यपीन्द्रियसामान्ये द्रव्येन्द्रियभावेन्द्रियविशेषतोऽधिगन्तव्यानि, यस्मादुक्तं संग्रहकारेण-"निर्वृत्युपकरणे द्रव्येन्द्रियं, लब्ध्युपयोगौ भावेन्द्रिय"मिति (तत्त्वा. अ. २ सू. १७-१८) तत्र निर्वृत्तिर्नाम मनुष्यगतौ मनुष्यादिजातौ तिर्यग्गतौ च गवादिजातौ २, अंगोपाङ्गनिर्वर्त्तितानीन्द्रियद्वाराणि कर्म्मविशेषसंस्कृताः शरीरप्रदेशाः, उपकरणं नाम स्पर्शादिज्ञानावरणीयकर्म्मक्षयोपशमानयनसाधकतमः करणविशेषः यस्मादुपक्रियते तेनात्मनः क्षयोपशमतया स्पर्शादीनामत उपकरणमित्युच्यते, लब्ध्युपयोगौ भावेन्द्रियं, लब्धिरुपयोगमेव भावेन्द्रियं, तत्र लब्धिर्नाम गतिजात्यादिनामकर्म्मोदयजनित उदयो लब्धिरुच्यते, यस्मादेकेन्द्रियजातिनामकर्म्मोदयादेकेन्द्रियादिर्भवति, तदावरणीयकर्म्मक्षयोपजनिता च, इह तु क्षयोपशमो लब्धिरुच्यते, सा च पंचविधा, तद्यथा स्पर्शनेन्द्रियलब्धिर्जिह्वेन्द्रियलब्धिः घ्राणेन्द्रियलब्धिः चक्षुरिन्द्रियलब्धिः श्रोत्रेन्द्रियलब्धिरिति, उपयोगस्तु स्पर्शनेन्द्रियादिष्वर्थेषु भवति, उपयोगः परिधानमायोगस्तद्भावपरिणाम इत्यर्थः । एषां च सत्यां निर्वृत्तावुपकरणोपयोगौ भवतः, सत्या च लब्धौ निर्वृत्युपकरणोपयोगा भवंति, एवं विभागे प्रदर्शिते उपकरणेन्द्रियाश्रयाणि प्रश्नव्याकरणानि, तद्यथा 'सोइंदिएणं भंते ! किं संठिए पण्णत्ते ?' इत्यादि, संस्थानमाकारो, बाहल्यं बहलता रुन्दतेत्यर्थः, पुहुत्तं पृथुता विस्तीर्णतेत्यर्थः, अत्राह-यदि अंगुलस्यासंख्येयभागो बाहल्यं स्पर्शनेन्द्रियस्य ततः कथमायुधाद्यभिघाते अन्तर्वेदनानुभव इति ? उच्यते, आत्मा शरीरेणैव वेदयति दुःखात्मिकां वेदनां नापीन्द्रियेण, ज्वरशूलादिवेदनावत्, शीतादिस्पर्शनं तु सर्वेवृत्तित्वच एव भवति, तत्र पानकादिपाने अंतः शीतस्पर्शग्रहणं कथं ? उच्यते, सर्वप्रदेशपर्यन्तवर्तित्वात् त्वचः अभ्यन्तरतोऽपि शुषिरस्योपरित्वग-

स्त्येव, शेषं गतार्थं, 'जाव पविट्ठाइं सुणेति' तत्र प्रवेशो मुखे नासिकायां कर्णविले वा भवन्ति, इन्द्रियविषयाधिकारे अयमपि प्रश्नः अणगारस्स णं भंते इत्यादि, भावित आत्मा ज्ञानदर्शनचारित्रैस्तपोविशेषैश्च येन स भावितात्मा तस्य चरमाः शैलेशीकालान्त्य-समये निर्जरापुद्गलाः अपगतकर्म्मभावास्तेषां, 'अणत्तं' अन्यत्वं द्वयोरनगारयोः सम्बन्धिनोः ये पुद्गलाः, नानात्वं वर्णादिकृतं एकस्यैव 'ओमत्तं' ऊनता, तुच्छत्तं निस्सारता, गुरुलघुत्वे प्रतीते, कः पुनरस्य प्रश्नस्यावकाशः? उच्यते, यस्मादुक्तं स्पृष्टान्येव शब्दादिद्रव्याणि शृणोतीत्यादि, सर्वलोकस्पर्शित्वाच्चैषां निर्जरापुद्गलानां स्पर्शनप्रवेशने स्त इत्यतः प्रश्नः, छद्मस्थग्रहणं केवलिव्युदासार्थं स्यात्, केवली सर्वैरेवात्मशरीरप्रदेशैर्जानाति पश्यति च, उक्तं च "सव्वतो जाणति केवली सव्वतो पासति" तथा चोक्तं "समन्तसर्वाक्षगुणं निरक्ष" मिति, छद्मस्थः पुनरङ्गोपाङ्गनामकर्म्मविशेषसंस्कृतैरेवेन्द्रियद्वारैर्जानाति पश्यति च, अतः छद्मस्थग्रहणं, तथा निर्वचनं "देवेऽवि य णं अत्थेगइए० जाणति पासति" इति, यस्माद्देवानां मनुष्येभ्यः पटुतराणीन्द्रियाणि भवन्ति, अतो देवोऽपि न (सर्वो) जानाति न पश्यति च, किमुत मनुष्य इति, सर्वलोकस्पर्शित्वाच्च निर्जरापुद्गलानामपि प्रश्नः, 'णेरइयाणं भंते!' इत्यादि गतार्थं, मनुष्यप्रश्ने 'सन्निभूता असन्निभूता' इति, इह संज्ञिग्रहणादवधिज्ञानी गृह्यते यस्य ते कार्मणशरीरपुद्गला विषयः, 'एवामेवासण्णिया मायिमिच्छादिट्ठी उववण्णा' इति जाव उवरिमगेवेज्ञा, यद्यप्यारातीयेषु कल्पेषु ग्रैवेयकेषु च सम्यग्दृष्टयः सन्ति, तथापि तेषां कार्म्मणशरीरपुद्गला न विषयः, अमायिसम्मदिट्ठी उववण्णया अणुत्तरा ते कहं जाणंति फासंति वा? उच्यते, उक्तमवधिज्ञानविषयाधिकारे "संखिज्जं कम्मदव्वे लोगे थोवूणगं पलिय" मिति, कार्मणशरीरद्रव्याणि पश्यन् क्षेत्रतो लोकस्य संख्येयान् भागान् पश्यति, अनुत्तराश्च सम्पूर्णलोकनालीं पश्यन्तीत्युक्तं, अत्थेगतिया वेमाणिया जाणंति पासंति आहारेंति, सर्वत्र चाहारयन्तीति ओजाहारो गृह्यते, यस्मादुक्तं "सरीरेणोजाहारो तयायफासेण लोमआहारो। पक्खेवाहारो पुण कावलीओ होति नायव्वो ॥ १ ॥" इति, इन्द्रियविषयाधिकार एवायं प्रश्नः 'अद्दायं पेहमाण' इत्यादि, 'अद्दायमिति' आत्मशब्देन शरीरमभिधीयते, पलिभागः प्रतिविम्बप्रायत्वात् पुद्गलानां भासुरद्रव्ये आदर्शे प्रतिबिम्बं संक्रान्तं पश्यति, यस्मादुक्तं "सामा उदिया छाया अभासुरगता णिसिं

तु कालाभा। सा चेव भासुरगता संदेहवण्णा मुणेयव्वा ॥ १ ॥ जे आरिसस्स सन्तो देहावयवा भवंति संकंता। तेसिं तत्थुवलद्धी पगासजोगा ण इतरेसिं ॥ २ ॥" यथा सर्वमेव हि ऐन्द्रियकं स्थूलद्रव्यं चयापचयधर्मकं रश्मिवच्च भवति, यतश्चादर्शादिषु छाया स्थूलस्य दृश्यते, अवगाढरश्मिनः (ततः) स्थूलद्रव्यस्य कस्यचिद्दर्शनं भवति, न चान्तरितं दृश्यति किंचित् अतिदूरस्थं वा, अतः 'पलिभागं' प्रतिबिम्बं 'पेहति' पश्यतीत्यर्थः, अणगारस्स भावियप्पणो चरिमा निज्जरापोग्गला छउमत्थो न जाणति ण पासतीति च योऽयं प्रतिषेधो इन्द्रियविषयस्य असावुद्देशकपरिसमाप्तेरनुवर्त्तयितव्यः, सर्वत्र चैतान् अर्थान् छद्मस्थमनुष्यो जानाति पश्यतीति वक्तव्यं, प्रतिषेद्धव्यं च अर्थात्, कथं? यस्मात् सर्वेऽमी कम्बलशाटकादिप्रश्ना अतीन्द्रियार्थविषयाः, यथैव निर्जरा-पुद्गलाः छद्मस्थस्येन्द्रियविषयो न भवतीति प्रतिषिद्धं, संज्ञीभूतस्य मनुष्यस्योपयुक्तस्य वैमानिकस्य च परस्परोपपन्नस्योपयुक्तस्य विषय इति प्रदर्शितं अतीन्द्रियार्थत्वात्, अतीन्द्रियं केवलस्यैव विषय इति सामर्थ्याद् गम्यते, अन्यथा इन्द्रियविषयाधिकारे एतेषां प्रश्नानामनवकाश एव, कम्बलसाटकेत्यादि, कंबलसाटकं कंबल एव, 'आगासथिग्गलं' लोकः महतो बहिराकाशस्य पटस्येव विततस्य, 'फुड' इति व्याप्तः, पुढविकाइयादीहिं सुहुमेहिं सव्वलोगपरियावण्णेहिं फुडे 'तसकाएणं' सिअ फुडे सिया णो फुडे, जदा केवली समुग्घायगतो तदा तसकाएणं फुडे, जदा णो अत्थि तदा न फुडे, शेषं गतार्थम्।

॥ इतीन्द्रियपदे प्रथमोद्देशकः १५-१ ॥



द्वितीयोद्देशकस्यामी अर्थाधिकारास्तद्यथा "इंदियउवचय णिव्वत्तणा य समया भवे असंखिज्जा। लद्धी उवओगद्धा अप्पाबहुया विसेसहिया ॥ १ ॥ ओगाहणा अवाए ईहा तह वंजणोग्गहे चेव। दव्विंदिय भाविंदिय तीता बद्धा पुरक्खडिया ॥ २ ॥" श्रोत्रेन्द्रिया-दियोग्यपुद्गलग्रहणं तदुपचयः, कति समया इन्द्रियपर्याप्तिः? कतिसमयगृहीतानामिन्द्रिययोग्यानामिन्द्रियपर्याप्तानामिन्द्रियाणां,

ततो निर्वर्त्तना यो यस्येन्द्रियस्योपकारः इंदियोवओगद्धा यावन्ति कालमुपयुक्त आस्ते, ओगाहणा अवग्रह इत्यर्थः, शेषं ग्रन्थत एवानुसरणीयं, नवरं पुढविकाइयआउकाइयवणस्सइकाइयाणं दव्विंदिया पुरेक्खडा अट्ठ वा णव वा भवंति, जम्हा एते अणंतरं उव्वट्टित्ता मणुस्सेसु उववज्जंति सिज्झंति य, तेण दव्विंदिया मणुस्सभवसंबंधिणो अट्ठ, यदि पुण ते चेव अणंतरं उव्वट्टित्ता पुणरवि तेसु चेव पुढविकाइयादिसु उववज्जंति, ततो उव्वट्टित्ता मणुस्सेसु उववण्णा सिज्झंति तदा णव, एवं उवउज्जिय भाणियव्वं, तेउवाउबेइंदियतेइंदियचउरिंदियाणं पुरेक्खडा नव, कहं ? ततो उव्वट्टित्ता पुढविआउवणस्सईसु उववण्णा समाणा ततो उव्वट्टित्ता मणुस्सेसु उववज्जंति सिज्झंति य तेण णव, मणुस्साणं मणुस्सातीता अणंता, अद्धा सिय संखिज्जा सिय असंखिज्जा, कहं ? पुच्छा समए जइ संमुच्छिममणुस्सा णत्थि ततो संखिज्जा, कहं पुण णत्थि ?, जेण संमुच्छिममणुस्साणं विरहो चउवीसमुहुत्तादि अंतरं भणियं, जदा पुण अत्थि तदा असंखिज्जा, विजयादिसु द्विरुत्पन्नोऽनन्तर भव एव सिध्यति, शेषं गतार्थम् ॥ इति द्वितीयोद्देशकः ॥

॥ प्रज्ञापनाप्रदेशव्याख्यायां पंचदशपदस्य व्याख्या समाप्तेति ॥



अधुना षोडशमारभ्यते अस्य चायमभिसम्बन्धः, इहानन्तरपदे प्रधानबन्धहेतुत्वादिन्द्रियवतामेव लेश्यादिसद्भावाद् विशेषतः इन्द्रियपरिणाम उक्तस्तदनन्तरं परिणामस्यैव प्रयोगपरिणामविशेषप्रतिपादनायेदमारभ्यते, इह चेदमादिसूत्रम्—'कतिविहे णं भंते ! पयोगे पण्णत्ते ?' इत्यादि, कति प्रकारो भदन्त ! प्रयोगः ? योजनं योगः परिस्पन्दः आत्मनः क्रियापरिणामः समाधानं आत्मव्यापार इत्यर्थः, अथवा युज्यन्तेऽनेन क्रियापरिणामाभिमुखेन साम्परायिकैर्यापथकर्म्मणा वा आत्मेति योगाः, गौतम ! 'पण्णरसविहे' इत्यादि निर्वचनं, तत्र सत्यार्थालोचननिबन्धनं मनः सत्यं तस्य प्रयोगो व्यापारः सत्यमनःप्रयोगः एवं शेषेष्वपि मनःप्रयोगादिषु भावनीयं, यावत् औदारिकशरीरकायप्रयोगः, इहौदारिकशरीरमेव पुद्गलस्कन्धसमुदायरूपत्वात् उपचीयमानत्वात् कायः औदारिक-

साम्प्रतं सप्तदशमारभ्यते–अस्य चायमभिसंबंधः, इहानन्तरपदे परिणामसामान्याद् विशेषतः प्रयोगपरिणाम उक्तः, तदनन्तरं लेश्यापरिणामविशेषप्रतिपादनार्थमिदमारभ्यतेः, इह च प्रथमोद्देशोक्तार्थसंग्रहार्थं इयं गाथा–'आहार समसरीरा उस्सासे कम्मवण्ण लेसासु । समवेदण समकिरिया समाउया चेव बोद्धव्वा ॥ १ ॥' अथ किमर्थं लेश्यापरिणामविशेषाधिकारेऽमीषामर्थानामुपन्यासः ? उच्यते, उक्तं च प्रयोगपदे–"कतिविहे णं भंते ! गतिप्पवाए इति ? गोयमा ! पंचविहे पण्णत्ते तंजहा–पयोगगती ततगती बंधणछेदणगती उववायगती विहायोगती, तत्थ जा सा उववायगती सा तिविहा–खित्तोववायगती," तत्र नारकादिभवत्वेनोपप(त्प)न्नानां जीवानामुपपातसमयात् प्रभृति आहाराद्यर्थसंभवोऽवश्यं भावीत्युपन्यासः, 'णेरइयाणं भंते ! सव्वे समाहारा' इत्यादि, 'जाव समाउया' अत्र आहच्चेति–कादाचिदाहत्य वा, नारकाधिकार एव पुव्वोववण्णया अप्पकम्मतरा इत्यस्य भावना–नेरइयाउयणिरयगतिअसातावेयणिज्जाणि पडुच्च जेणेव पुव्वोववण्णयाणं बहुणिज्जिन्नं अप्पं चिट्ठति तेण पुव्वोववण्णगा णेरइया अप्पकम्मतरा, पच्छोववण्णा महाकम्मतरा, ताणि चेव पडुच्च जेण बहुं चिट्ठति विसेसविसेसियतरं च, इमं सुत्तं ण सामण्णविसयं व्यभिचारसंभवात्, तथा च पच्छोववण्णोवि जहण्णादिट्ठितिओ पुव्वोववण्णेणवि उक्कोसठितिपणं णियमेण अप्पकम्मथरे भवति, असण्णिभूयाण सण्णिभूयाण य सेसकम्मठितिजहण्णुक्कोसादिविसेसभावाओत्ति, तम्हा समठितिया वि ठितिय नारगविसेसविसयमेयंति । 'वण्ण' पुव्वोववण्णा णेरइया विशुद्धवन्नयरा, विशुद्धतरवर्णा इत्यर्थः, कहं ?, जण्णं णेरइयाणं अप्पसत्थवण्णणामकम्मस्स असुभो तिव्वाणुभावुदयो भवावेक्खो, जम्हा भणितं कालभवखेत्तवेक्खो उदओ सविवाग अविवागो इति, जइवि आऊणि भवविवागाणि तहावि (असुभो) तिव्वाणुभावुदयो (भवावेक्खो) अधुवोदयत्ताओ य पुव्वोववण्णएहिं उवक्कमेणेव बहुं निज्जरिओत्ति, पोग्गलविपाकं वण्णनाम पुव्वोववण्णा तेण विरुद्धवण्णतरा, पच्छोववण्णा जेण न णिज्जरियं तेण अविसुद्धवण्णतरत्ति, एतंपि विसेसविसयमेव, एवं चेव सेसाणि वि जहत्थं समतीए भाणियव्वाणि, लेसासु पुव्वोववण्णा विसुद्धलेसा, कहं ? जेण तेसिं अप्पसत्थकम्मलेसाणं किण्हनीलकाऊणं असुभो तिव्वाणुभागुदओ भवावेक्खो जातिविपाकलेसाकम्मं तहावि जोगपरिणामो लेस्सा इति विग्गहेवि कम्मतिय-

कालजोगो अत्थित्ति तेण विसुद्धलेसा । पच्छोववण्णेहिं ण णिज्जरिओ तेण अविसुद्धलेसा । वेदणाए सन्निभूता इति, कहं ? जेण असण्णिणो नेरइयतिरिक्खमणुयदेवेसु सव्वेसु वि अत्थि, जेण भणियं "कतिविहे णं भंते ! असन्निआउए ? गोयमा ! चउविहे असन्निआउए पं० तं० नेरइयअसन्निआउए तिरिक्खजोणिअसन्निआउए मणुस्सअसन्निआउए देवअसन्निआउए, तत्थ देवनारगअसन्नि-आउयस्स जहण्णेणं दसवाससहस्साइं ठिई, उक्कोसेणं पलिओवमस्स असंखिज्जइभागो, तिरियमणुयअसन्निआउय(स्स) जहण्णेणं अंतोमुहुत्तं, उक्कोसेणं पलिओवमस्स असंखिज्जइभागो," तत्थ जे असण्णी नेरइया ते अप्पवेयणा, जे सण्णी ते महावेयणा । क्रियासु 'जे य ते सम्मद्दिट्ठी तेसिं चत्तारि किरिया कज्जंति' चतस्रः क्रियाः प्रवर्त्तते कर्म्मबन्धहेतुभूताश्चेष्टा इत्यर्थः, तद्यथा—आरंभिका 'आरंभो उद्दवओ', तत् कृतं साम्परायिकं कर्म्म परिग्रहत्वात् क्वचित् मूर्च्छासद्भावात्, मायाप्रत्यया शाठ्यभावात्, अप्रत्याख्यानक्रिया विरतिपरिणामाभावात् 'णियइयाउ'त्ति नियता—अवश्यंभावात्, सम्यग्दृष्टीनां त्वनियताः, संयतादिषु व्यभिचारात्, मिथ्यादर्शनप्र-त्यया मिथ्यात्वपरिणामहेतुकी, शेषं गतार्थं, यावदसुरकुमाराधिकारे, 'जे ते पुव्वोववण्णगा ते णं महाकम्मतरा' कहं ? छम्मासावसे-साउय परभवियाउय बंधए पडुच्च, जम्हा ते तिरिक्खेसु मणुस्सेसु वा उववज्जंति, तिरिक्खेसु उववज्जमाणा कयाइ एगिंदिएसु पुढविकाइयआउकाइयवणस्सइकाइएसु उववज्जंति, पंचिंदियतिरिक्खेसु वा, मणुस्सेसु उववज्जमाणा कम्मभूमयगब्भवक्कंतियमणुस्सेसु उववज्जंति, मणुस्सजोगाओ पगडीओ बंधंति; तेणं एगंततिरियमणुयजोगाओ पगडीओ पडुच्च पुव्वोववण्णगा महाकम्मतरा पच्छो-ववन्नगा अप्पकम्मतरा, जेण ताओ चेव उववण्णया बंधंति, एयंपि विसेसविसयमेव दट्ठव्वं, अण्णहा तिरियमणुयजोग्गपयडिबंधे सत्यपि पुव्वोववण्णगा[न]पच्छोववण्णगोवि उक्कोसठितीए अहिणवउप्पण्णे अणंतसंसारिए य महाकम्मतरे चेव भवति, तेण समठि-तीयादिसु, असुरकुमारविसेसविसयमेयंति, तत्थ वि बद्धपरभवियाउयो चेव पुव्वोववन्नगो घेप्पति, अबद्धाउयथेवकालं, तहेव उववण्णगोत्ति, वण्णे—पुव्वोववण्णा(अ)विसुद्धवण्णतरा कहं ? जेण एतेसिं भवावेक्खाए चेवऽणएहिं ण (सुहो तिव्वाणुभावुदओ सो य पुव्वोववण्णेहिं बहु) णिज्जरितो तेण(अ)विसुद्धवण्णा । लेसादि, पुव्वोववण्णा अविसुद्धलेसा, कहं ? जेण एतेसिं भवावेक्खाए

कण्हादिलेसाणं चउण्हं उवरिमाणं लेसाट्ठाणाण विसुद्धतराणं अणुभावुदओत्ति, सो य पुव्वोववण्णएहिं बहू णिज्जरिओत्ति तेण अविसुद्धलेस्सा, पच्छोववण्णएहिं ण णिज्जरितो तेण विसुद्धलेसा, देवनेरइयाणं च लेसापरिणामुदओ उपपातसमयात् प्रभृति आभवक्षयाद् भवति, तथा च तृतीयलेश्योद्देशके वक्ष्यति 'से णूणं भंते! कण्हलेस्से नेरइए कण्हलेसेसु नेरइएसु उववज्जति, कण्हलेस्से उव्वट्टति? जल्लेसे उववज्जइ तल्लेसे उव्वट्टतित्ति?, एतदुक्तं भवति पंचिंदियतिरिक्खजोणिया मणुस्सा वा नेरइएसु उववज्जमाणा तिरियमणुयाउएसु खीणेसु णेरइयाउए पडिसंवेएमाणो विग्गहेवि णारग एव लब्भति, ऋजुसूत्रनयदर्शनेन तस्य च कण्हादिलेसातो पुव्वभवाउए अंतोमुहुत्तसेसए वट्टमाणस्स लब्भति, यस्मादुक्तं-"अंतमुहुत्तंमि गए अंतमुहुत्तंमि सेसए चेव। लेसाहिं परिणताहिं जीवा वच्चंति परलोगं ॥ १ ॥" तथा च लेसज्झयणे णेरईयाणं कण्हादिलेसाणं जहण्णुक्कोसिया इमा ठिती भणिता-"दस वाससहस्साइं काऊए जहण्णिया ठिती होति। उक्कोसा तिण्णुदही पलियस्स असंखभागं च ॥ १ ॥ नीलाए जहण्णठिती तिण्णुदहि असंखभागपलियं च। दस उदही उक्कोसा पलियस्स असंखभागं च ॥ २ ॥ कण्हाए जहण्णठिती दस उदही असंखभागपलियं च। तेत्तीससागराइं मुहुत्तऽहियाइं च उक्कोसा ॥ ३ ॥ एसा नेरइयाणं लेसाण ठिई उ वन्निया इणमो। तेण परं वोच्छामि तिरियाण मणुस्सदेवाणं ॥ ४ ॥ अंतोमुहुत्तमद्धा लेसाण ठिई जहिं जहिं जा उ। तिरियाण नराणं वा वज्जित्ता केवलं लेसं ॥ ५ ॥" एतदुक्तं भवति-तिरियमणुयाणं जा जस्स लेसा अत्थि तेसिं अंतोमुहुत्तमेव ठिती, तत्थवि मणुस्साणं सजोगिकेवलीणं इमा ठिती-"मुहुत्तद्धं य जहण्णा उक्कोसा होति पुव्वकोडी उ। णवहिं वरिसेहिं ऊणा णायव्वा सुक्कलेसाए ॥ १ ॥ एसा तिरियनराणं लेसाण ठिती उ वन्निया होति। तेण परं वोच्छामि लेसाण ठितिं तु देवाणं ॥ २ ॥ दस वाससहस्साइं कण्हाइ ठिती जहण्णिया होति। पल्लासंखियभागो उक्कोसो होति नायव्वो ॥ ३ ॥ जा कण्हाइ ठिती खलु उक्कोसा चेव समयमब्भहिया। नीलाइ जहण्णेणं पलियासंखं च उक्कोसा ॥ ४ ॥ जा णीलाइ ठिती खलु उक्कोसा चेव समयमब्भहिया। काऊइ जहण्णेणं पलिआसंखं च उक्कोसा ॥ ५ ॥ तेण परं वोच्छामि तेउलेस्सं जहा सुरगणाणं। भवणवइवाणमंतरजोइसवेमाणियाणं च ॥ ६ ॥ दस वाससहस्साइं तेऊय ठिती

जहण्णिया होइ। उक्कोसा दोण्णुदही पलियस्स असंखभागं च ॥७॥ जा तेऊए ठिती खलु उक्कोसा चेव समयमब्भहिया। पम्हाइ जहन्नेणं दस मुहुत्तहियाइं उक्कोसा ॥८॥ जा पम्हाइ ठिई खलु उक्कोसा चेव समयमब्भहिया। सुक्काए जहण्णेणं तेत्तीसुक्कोसमब्भहिया ॥९॥" वेदणा जहा णेरइया, तत्थवि असण्णिणो लब्भंतित्ति, पुढविकाइयाणं कहं अप्पसरीरमहासरीरत्तं जेण पुढविकाइयाणं सरीरोगाहणा अंगुलस्स असंखिज्जइभागो भणिओ?, उच्यते, सत्यमेतत्, तथा अस्त्येवाल्पमहत्त्वं शरीरेभ्यो, जेण पज्जवपदे पुढविकाइए पुढविकाइयस्स ओगाहणाए चउट्ठाणवडिए, अतोऽस्त्यल्पमहत्त्वं, शेषं गतार्थं, जाव जे ते अपमत्तसंजता तेसिं एगा मायावत्तिया किरिया कज्जति समुद्देसणादिसु, अण्णहा पसुव्व णो मातिट्ठाणभावतो, पमत्ताण आरंभिया य मायावत्तिया य, वस्तुतः प्रमत्तयोगस्यारम्भत्वात् शेषं गतार्थं, जाव जोतिसियवेदणाए मायिमिच्छद्दिट्ठी अमायिसम्मदिट्ठीत्ति, सण्णिभूता असण्णिभूता इति न भणितं, किं कारणं? जेण तेसु असण्णी णत्थि, कहं? जेण असण्णिदेवाउयस्स उक्कोसा ठितीय पलिओवमस्स असंखिज्जइभागो, जोइसियाणं जहण्णिया ठिती पलिओवमट्ठभागो, वेमाणियाणं पुण जहण्णिया पलिओवमं, तेण तेसु असण्णी णत्थि, 'सलेसाणं भंते! नेरइया' इत्यादि, गतार्थं जाव तेउलेसा, असुरकुमारा वेदणाए सण्णिभूता असण्णिभूता इति ण भण्णति, किं कारणं? जेण तेउलेसा असण्णी णत्थि, उक्ताः प्रथमोद्देशकोक्ताः खल्वाहारादयोऽर्थाः। प० १७-१ ॥ अधुना। द्वितीयोद्देशकः-'सलेसाणं भंते! नेरइया' इत्यादि, इह तु ता एव चिन्त्यंते, कति लेश्या इति, तत्र "लिशि संश्लेषणे" इत्यस्य धातोर्लेशनं लेश्या, उक्तं च-"ताः कृष्णनीलकापोततैजसीपद्मशुक्लनामानः। श्लेष इव वर्णबंधस्य कर्मबंधस्थितिविधात्र्यः ॥ १ ॥" योगपरिणामश्च लेश्या, कथं पुनर्योगपरिणामो लेश्या? यस्मात् सयोगिकेवली शुक्ललेश्यापरिणामेन विहृत्य अन्तर्मुहूर्त्तशेषे योगनिरोधं करोति, तत अयोगित्वं प्राप्नोति, अतोऽवगम्यते योगपरिणामो लेश्या इति। स पुनर्योगः शरीरनामकर्म्मपरिणतिविशेषः, यस्मादुक्तं-कर्म्म हि कार्मणस्य कारणमन्येषां च शरीराणामिति, तस्मादौदारिकादिशरीरयुक्तस्यात्मनो वीर्यपरिणतिविशेषः काययोगः, तथौदारिकवैक्रियाहारकशरीरव्यापाराहृतवाग्द्रव्यसमूहसाचिव्याज्जीवव्यापारो यस्स वाग्योगः, तथा चौदारिकादिशरीरव्यापारमनोवीर्यपरिणतिसमूहसाचिव्याज्जीवव्यापारो

यस्स मनोयोग इति, यथैव कायादिकरणयुक्तस्यात्मनो वीर्यपरिणतिर्योग उच्यते, तथैव लेश्यापीति, इतश्च शरीरनामकर्म्मपरिणतिविशेषो लेश्या, यस्मादुक्तं उत्तराध्ययनेषु–“लेसज्झयणं पवक्खामि आणुपुव्विं सुणेह मे। छण्हंपि कम्मलेसाणं अणुभावं जहक्कमं ॥१॥ णामाणि वण्णरसगंधफासपरिणामविलक्खणं ठाणं। ठितिं गतिं च आउं लेस्साणं तु सुणेह मे ॥ २ ॥” एते चार्था लेश्याध्ययनत एवाधिगन्तव्याः, केचिदिहैव लेश्यापदे नामवर्णरसगन्धस्पर्शपरिणामसंस्थानाख्याः, शेषं कण्ठ्य, नवरं पंचिंदियतिरिक्खेसु दस अप्पाबहुगा–तं० “ओहिय पणिंदिय १ संमुच्छिमा २ य गब्भतिरिक्खइत्थीओ ३। संमुच्छगब्भतिरिया ४ मुच्छिमतिरिक्खी य ५ गब्भम्मि ६ ॥१॥ समुच्छिम ७ गब्भइत्थी ८ पणिंदितिरिगित्थीगा ९ य ओहित्थी १०। दस अप्पबहुगभेदा तिरियाणं होंति नायव्वा ॥२॥” शेषं सूत्रसिद्धं यावत् उद्देशकपरिसमाप्तिरिति। प० १७–२ ॥ इदानीं तृतीयोद्देशकः तस्यादिसूत्रम्—‘नेरइए णं भंते! नेरइएसु उववज्जती’त्यादि, द्वितीयोद्देशके नारकादीनां लेश्यापरिसंख्यानमल्पबहुत्वं महर्द्धिकत्वं चोक्तं, इह चेदं चिन्त्यते–नारकादीनां स्वा स्वा लेश्याः किमुपपातक्षेत्रोपपन्नानामेव उत विग्रहेऽपि संतीति अस्यार्थस्य प्रतिपादनार्थं प्राक् तावन्नयान्तरमाश्रित्य नारकादिव्यपदेशं पृच्छति–‘णेरइए णं भंते! णेरइएसु उववज्जइ’ इत्यादि, कथं पुनर्नारकादिरेव नारकादिषूपपद्यते? उच्यते यस्मान्नारकादिभवोपग्राहकमायुरेव, अतो नारकाद्यायुः प्रथमसमयसंवेदन एव नारकादिव्यपदेशो भवति ऋजुसूत्रनयदर्शनेन, यस्मादुक्तं नयविद्भिः ऋजुसूत्रस्वरूपनिरूपणं कुर्वद्भिः “पलालं न दहत्यग्निर्भिद्यते न घटः क्वचित्। न(ना)शून्ये निर्गमोऽस्तीह, न च शून्यं प्रविश्यते ॥१॥ नारकव्यतिरिक्तश्च, नरके नोपपद्यते। नरकान्नारकश्चास्य, न कश्चिद्विप्रमुच्यते ॥ २॥” इत्यादि, एवं उव्वट्टणाएवि ऋजुसूत्रनयदर्शनेनैवोक्तं–‘अणेरइए उव्वट्टइ’ इत्यादि, ‘से णूणं भंते! कण्हलेसे नेरइए’ इत्यादि, कहं कण्हलेसे उववज्जति कण्हलेसे उव्व० जल्लेसे उववज्जइ तल्लेसे उव्वट्टति? उच्यते, तिरिक्खजोणिओ मणुस्सो वा बद्धाउओ णेरइयत्ताए उववज्जिउकामो तिरियमणुस्साउए अंतमुहुत्तसेसे कण्हलेसादिपरिणामं परिणमति, ततो तेणेव परिणामेण णेरइयाउयं संवेदति, अतो कण्हादिलेसेसु उववज्जति, उव्वट्टति कण्हादिलेसे कहं? जेण तेसिं कण्हादिलेसापरिणामो आभवक्खया भवति, तेण तल्लेसे उव्वट्टति, असुरकुमारादीनामपि इयमेवो-

एएत्तिः, एवं सर्वदेवानां । तिरियमणुस्साणं पुण अंतोमुहुत्तिओ लेसापरिणामो, तेण कदाइ जल्लेसे उववज्जति तल्लेसे उव्वट्टति, कदाइ लेस्संतरपरिणामं परिणते उव्वट्टति, कण्हलेसे नेरइए कण्हलेस्सगाइं दव्वाइं गिण्हित्ता कालं करोति तदा णीललेसापरिणतो उववज्जति जल्लेसा, नेरइयं पणिहाए प्रतीत्य तदपेक्षया किं प्रमाणक्षेत्रं पश्यति?, शेषं गतार्थं । प० १७-३ ॥ अत्र चेयमधिकारगाथा—"परिणामवन्नरसगंधसुइअप्पसत्थसंकिलिट्ठुण्हा । गतिपरिणामपदेसोगाढवग्गणठाणाणमप्पबहुं ॥१॥" विषमपदव्याख्या—'से णूणं भंते! कण्हलेस्सा नीललेसं पप्प तारूवत्ताए' इत्यादि, "जल्लेसाइं दव्वाइं परियाइत्ता कालं करेति तल्लेसे उववज्जति"त्ति वयणातो कारणमेव कार्यं भवत्युपचाराद् उक्तं कण्हलेसा नीललेसं पप्प तारूवत्ताए परिणमतीति, एवं काउतेउपम्हसुक्काणं उपर्युपरि ताद्रूप्यतेत्यादि, तथा च दृष्टान्तः—से जहा णामए खीरए दूसिं पप्प तारूवत्ताए, नीललेश्यारूपादिभावं-प्रतिपद्यत इति, एवं तावद् भवसंक्रान्ति प्रतीत्य उक्तं । यदा पुनस्तिर्यङ्मनुष्यो वा स्वस्मिन्नेव भवे वर्त्तमानः कृष्णलेश्यापरिणतो नीलादिलेश्याभावं परिणमति, नीललेश्यापरिणतो वा कृष्णादिलेश्यादिभावं परिणमति, तत्रायं दृष्टान्तः—से जहा नामए वेरुलियमणी सिया किण्हसुत्तए वा जाव सुक्किलसुत्तए वा आइए आविद्ध इत्यर्थः, तासुत्तत्ताए परिणमए । कः पुनर्यो दृष्टान्तदार्ष्टान्तिकयोरर्थयोः प्रतिविशेषः? उच्यते—यथा पूर्वदृष्टान्ते क्षीरतक्रगता रूपादयोऽन्योऽन्यावयवाविभागतः परिणम्यपरिणामकभावेन वर्त्तंते, नैवमिह, किंत्वेकदेशसंसर्गात् वैडूर्यमणेश्च स्वास्थ्यात् कृष्णादिसूत्रताद्रूप्यताऽनुमीयते तथा दार्ष्टान्तिकयोरपि पूर्वकार्यकारणभावोऽनुमीयते, कृष्णादिलेश्याद्रव्याण्यधिकृत्यानुभावश्च, इह तु संसर्गमात्रं द्रव्याण्यधिकृत्य प्रदेशसंक्रममात्रं गृह्यते, नत्वनुभावसंक्रमः, तथा चेदं प्रदेशसंक्रमणलक्षणं—"जं दलियमन्नपगतिं निज्जइ सो संकमो पदेसस्स"त्ति । अनुभावसंक्रमस्य त्विदं लक्षणं—"तत्थट्ठपदं ,उव्वट्टिया व ओवट्टिया व अविभागा । अणुभागसंकमो एस अन्नपगतिं णिया वावि ॥ १ ॥" एतदुक्तं भवति—सुभासुभाणं पगडीणं सुभासुभो अणुभावो, सुभाणं सुभो विसोहीए उव्वट्टिज्जत्ति, कड्ढाविज्जतित्ति भणियं, असुभाण असुभो संकिलेसेण उव्वट्टिज्जति, सुभाणं सुभो संकिलेसेण ओवट्टिज्जति नासिज्जतित्ति भणितं, असुभाणं असुभो विसोहीए ओवट्टिज्जति, एस अणुभावसंकमो; अहवा अण्णपगतिं णिया वाइत्ति अण्णपगतिअणुभावपादणेणंति

भणियं होति, अस्मिंश्चोद्देशके प्रायशः कृष्णादिलेश्यापरिणामयोग्यद्रव्यगत एव विचारः, तथाचोत्तरग्रन्थः रूपादिनिरूपणात्मकद्रव्यगत एव कृष्णादिद्रव्ये न तथाभूतभावो भवति अतस्तान्येव द्रव्याणि लेश्या अभिधीयन्ते कृष्णादिलेश्यापरिणामकारणत्वात् कृष्णादिलेश्या एवेति, कारणं च कार्यादभिन्नमिति पृच्छति, 'कण्हलेसाणं भंते! केरिसया वण्णेण'मित्यादि, अन्यथा हि कण्हलेस्सा दव्वा णं भंते! केरिसया वण्णेणमित्येव वक्तव्यं स्यात्, शेषं गतार्थं, वण्णाहिकारे जो एत्थ कोइलच्छदो सो तिलकंटतो भण्णति, उव्वत्ततो(उच्चंतगो) दंतरागो भण्णति, वरपुरिसो वासुदेवो भण्णति, हीनमध्यमोत्तमास्त्रयः, पुनरपि हीने हीनादयस्त्रय इत्यादि, उत्पन्नविकल्पत्रयत्रिभेदतया बहुविधता वाच्यां। प्रदेशचिंतायां तद्योग्यपरमाणवः प्रदेशा इति। अवगाहचिन्तायां-प्रदेशाः-क्षेत्रप्रदेशा इति। वर्गणाः कृष्णलेश्यादियोग्यद्रव्यवर्गणा एव गृह्यंते औदारिकादिवर्गणावत्, एताश्च वर्णादिभेदेन समानजातीयानेकसद्भावादनन्ता इति। स्थानचिंतायां तारतम्येन विचित्राध्यवसायनिबन्धनानि कृष्णादिद्रव्यवृन्दान्येव गृह्यन्ते, अन्यथा इहैव प्रदेशार्थचिन्तायामनन्तगुणत्वमुक्तमयुक्तं स्यात्, असंख्येयत्वं च, तथाविधैकपरिणामनिबन्धनानामनन्तद्रव्याणामप्येकाध्यवसायहेतुत्वेनैकत्वभावादिति, अत्र बहुवक्तव्यं तत्तु नोच्यते, अवचूर्णिकामात्रत्वात् प्रारम्भस्य। इह जहण्णलेसाट्ठाणपरिणामकारणभूता दव्वा चेव जहण्णलेसट्ठाणसद्देण भण्णंति, ते य सट्ठाणपरिणामगुणभेदओ असंखिज्जा भवंति, एत्थ निदरिसणं, जहा फलिहमणिस्स अलत्तरागवसेण रत्तत्ता जा भवति सा जहण्णरत्तगुणालत्तगवसेण जहण्णा, एवमेगगुणवड्डीए जहण्णाए चेव रत्तत्ताए असंखिज्जा ठाणा हवंति, ते य ववहारतो थोवगुणत्तिकाउं जहण्णगा चेव भवति, एवम[प्य]प्पणो वि लेस्सादव्वोवहाणवसतो परिणामविसेसा भावियव्वत्ति, उक्तं च "कृष्णादिद्रव्यसाचिव्यात् परिणामोऽयमात्मनः। स्फटिकस्येव तत्रायं, लेश्याशब्दः प्रयुज्यते ॥ १ ॥" एवं उक्कोसगावि भाणियव्वा, एत्थ जदप्पभिति एकगुणाइ अब्भहियावि दव्वा जहण्णट्ठाणजोगा होंति, ते पडुच्च पढमं कण्हलेसानीलादिसु दव्वट्ठाए चिंतनं, एवं उक्कोसगाणवि जहण्णुक्कोसगाणवि, एत्थ य दव्वगतगुणतारतम्मभेदे सत्यपि तारतम्येनानेकगुणकलितैरपि लेश्याद्रव्यैरात्मन एकत्वविशिष्टोऽध्यवसायः क्रियते, अन्यथा द्रव्यगुणानामानंत्यादनंतानि स्थानानि स्युरिति सूक्ष्मधिया

भावनीयं, इत्यलं प्रसङ्गेन । १७-४ ॥ 'से णूणं भंते! कण्हलेस्सा नीललेसा पप्प णो तारूवत्ताए' इत्यादि, कः पुनरस्य सम्बन्धः, उक्त-मनन्तरोद्देशके असंखिज्जा गुणा इति, कण्हलेसाए ठाणा, तत्र अल्पबहुत्वे थोवा जहन्नया काउलेसट्ठाणा दव्वट्ठयाए, जहन्नया नीललेसट्ठाणा असंखिज्जगुणा इति, एवं उत्तरोत्तरा असंखिज्जगुणा, तत्थ यदा जीवो जहण्णएसु काउलेसाठाणेसु वट्टति ताणि य नीललेसाठाणाणं प्रत्यासन्नानीति प्राप्तिमात्रं गृह्यते, न तु परिणम्यपरिणामकभावः वैडूर्यमणिनीलादिसूत्रकदृष्टान्तात् आकारभाव-मात्रं गृह्यते, आकार एव भावः आकारभावः, मात्रशब्दस्यावधारणात्मकत्वात् पलिभागभावमायाए वा से सिया इति प्रतिबिम्बमात्रं, तत्थ गता 'उक्कोसत्ति (ओसक्कइ), जम्हा कण्हलेसाए जहण्णियाए हेट्ठा अन्नलेसा नत्थि, तेण तत्थ गता चेव उक्कोसतित्ति भणितं, मज्झमिस्सियाओ तत्थ गता ओसक्कति, कहं? जेण णीलाए हिट्ठा कण्हलेसाए अत्थि तेण ओसक्कत्ति, उवरिंपि काऊ अत्थि तेण उस्सक्कत्ति, एवं सेसयाओवि, सुक्कलेसाए उवरिं अण्णा लेसा णत्थि तेण ओसक्कत्ति चेव भाणियव्वं ॥ १७-५ ॥ षष्ठोद्देशकस्तु ग्रन्थ एवानुसरणीयः ॥ १७-६ ॥

॥ प्रज्ञापनाप्रदेशव्याख्यायां सप्तदशपदव्याख्या समाप्तेति ॥



अधुना अष्टादशमारभ्यते, अस्य चायमभिसम्बन्धः-इहानन्तरपदे परिणामसाम्याद्विशेषतो लेश्यापरिणाम उक्तस्तदनन्तरं गति-परिणामविशेषकायस्थितिपरिणामप्रतिपादनार्थमिदमारभ्यते, इह चेदमधिकारगाथाद्वयं-'जीव गतिंदिय काए जोगे वेदे कसायलेसा य । भासगपरित्त पज्जत्त सुहुम सण्णी भवत्थि चरिमे य । एतेसिं तु पदाणं सम्मत्तणाणदंसण संजम उवओग आहारे ॥ १ ॥ कायठिती होति णायव्वा ॥ २ ॥' आह-कायस्थितिरिति कः शब्दार्थः इति?, उच्यते, कायो हि विवक्षितसामान्यविशेषरूपो जीवकाय एव तस्मिन् स्थितिः, एतदुक्तं भवति-यस्य वस्तुनः येन पर्यायेणादिष्टस्याव्यवच्छेदेन भवनं सा कायस्थितिरुच्यते, यथा

'जीवे णं भंते!' इत्यादि तत्र "जीव् प्राणधारणे" जीवनं जीवः, जीवनपर्यायेणादिष्टस्य जीवस्य जीवनपर्यायः सर्वाद्धां, यत आयुष्क-कर्म्मपुद्गलानुभवनं संसारिणां जीवनमुच्यते द्रव्यप्राणानधिकृत्येदमुक्तं, मुक्तानां ज्ञानादयस्तु भावप्राणाः, मुक्तोऽपि जीवति स तैरिति, अतः संसार्यवस्थायां मुक्तावस्थायां च सर्वत्र जीवनमस्तीति सर्वाद्धाम्, इदानीं तस्यैव जीवस्य नारकादिपर्यायैरादिष्टस्य तैरेव पर्यायैरव्यवच्छेदेन भवनं वर्त्तनं यत्, तद् ग्रन्थत एवानुसरणीयमिति, यश्च विशेषः स उच्यते, सेन्द्रिय इति लब्धीन्द्रियं प्रतीत्य, यस्माद् विग्रहगताविन्द्रियपर्याप्त्या अपर्याप्तस्य लब्धींद्रियमस्त्येव, अतः सेन्द्रिय इत्युक्तं सूत्रे, अन्यथा यदीन्द्रियपर्याप्त्या-पर्याप्तस्यैव सेन्द्रिय उच्यते ततो विग्रहगतौ उपपातक्षेत्रप्राप्तस्य वा इन्द्रियपर्याप्त्या अपर्याप्तस्य सेन्द्रियत्वं न स्यात्, ततश्च 'सेंदिए णं भंते! सेंदिए कालतो केवचिर'मित्यस्य प्रश्नस्य यन्निर्वचनं तदनर्थकं स्यात्, तथा 'सकाइए णं भंते!' इत्यादि, इहापि सकायिक इति कार्म्मणशरीरमधिकृत्योक्तं, अन्यथा शरीरपर्याप्त्या अपर्याप्तस्य विग्रहगतौ च वर्त्तमानस्य सकायिकत्वं न स्यात्, तथाचास्मिन् प्रश्ने निर्वचनमनर्थकं स्यात्, 'सजोगीण'मित्यादि, अत्रापि कार्मणशरीरकाययोगमेवाधिकृत्य सयोगिप्रश्नः, पुद्गलपरावर्त्त इति, अट्ठविहं पोग्गलगहणं जीवस्स ओरालियवेउव्वियआहारगतेयभासाआणापाणुमणकम्मइयत्तणेण, पुच्छाकाले य जं भवग्गहणं तं अवहिं काऊण, ततो जदा सव्वपुग्गला परमाणुप्रभृतयः ओरालियादिसरीरबंधजोगत्तणमावण्णा एगिंदियादिभावे वट्टमाणेण परिणामिया तदा पोग्गलपरियट्टेति भण्णति, अवद्धमिति अर्द्धस्य समीपे अपार्द्धं देसूणमिति किंचिदूनमर्द्धं, मणोयोगो एगं समयं, कहं?, मणयोगे खंधे पडुच्च ओरालियादिकायजोगेण जीवव्यापारो पढमे समये चेव उवरमति मरति वा तत्थ एगसमयं, अंतोमुहुत्तं गहण-निसग्गे करेंतस्स अंतोमुहुत्तिओ, एवं वइजोगोवि, पढमसमये कायजोगेण गहियाणं भासादव्वाणं बितियसमए वइजोएण णिसग्गं काऊण उवरमंतस्स मरंतस्स वा एगसमइओ लब्भति, अंतोमुहुत्तं गहणनिसग्गा करेंतस्स अंतोमुहुत्तिओ, भासालद्धियस्स वइजोगो लब्भतित्ति। उक्कोसेणं वणस्सइकालो, वणस्सइकाइएसु काययोग एव केवलोत्ति, ततो बेइंदियादिसु उववण्णस्स वइजोगोवि अत्थि सादीए सपज्जवसिए। सवेदए जहण्णेणं अंतोमुहुत्तं, कहं? भण्णति उवसामतो तिविहं वि वेदं उवसामित्ता अनुभावतः अवेदको

भूत्वा पुनरपि प्रतिपतने सवेदकत्वं प्राप्तः, ततस्तत्क्षणादेव उपशमकश्रेणीं प्रतिपद्य मोहनीयमुपशामयत्यन्तर्मुहूर्त्तेनेति, अतो अंतर्मुहूर्त्तेनेति, अत्र कैश्चिदतिगहनत्वात् प्रस्तुतस्य भ्रान्त्या लिखितं किलोपशमश्रेण्यनन्तरं क्षपकश्रेणीं प्रतिपद्यत इति, एतदपकर्णयितव्यं, अत्र विरुद्धत्वाद्, उक्तं च सम्यक्त्वादिनिरूपणायां कल्पाध्ययने—"सम्मत्तम्मि उ लद्धे पलियपुहुत्तेण सावओ होज्जा। चरणोवसमखयाणं सागरसंखंतरा होंति ॥१॥ एवं अप्परिवडिए सम्मत्ते देवमणुयजम्मेसु। अन्नतरसेढिवज्जं एगभवेणं च सव्वाइं ॥२॥" तथाऽन्येनाप्युक्तं—"मोहोपशम एकस्मिन् भवे द्विः स्यादसन्ततः। यस्मिन् भवे उपशमः क्षयो मोहस्य तत्र न ॥१॥" उक्कोसेणं दसुत्तरं पलिओवमसतं पुव्वकोडीपुहुत्तमब्भहियं, कहं? इत्थी उवसमसेढिं पडिवण्णा तिविहंपि वेदं उवसामित्ता अवेदकत्वं प्राप्य प्रतिपतिता स्त्रीवेदप्रथमसमयसंवेदनकाल एव कालं कृत्वा देवेषूपपद्यते, तत्र च पुंवेद एव भवति, नान्यः, तथा चोक्तं—"उवसमसम्मत्तद्धा, अंतो आउक्खयां धुवं देवो। तिसु आउगेसु बद्धेसु जेण सेढिं न आरुहति ॥१॥" उक्कोसेण पुण ईसाणे कप्पे पणपण्णपलिओवमाउगासु अपरिग्गहियदेवीसु अणंतरं दो वारे उववज्जमाणाए दसुत्तरं पलिओवमसतं भवति, इत्थिभवेहि य कईहिंपि पुव्वकोडिपुहुत्तमब्भहियं, ण जतो असंखेज्जवासाउया उक्कोसठितीं पावति, एवं सेसेसुवि भावियव्वं, णवरं अट्ठारसपलियाइं ईसाणे चेव नवपलिओवमायुगासु परिग्गहियदेवीसु उववज्जमाणीए, पलिओवमसतं सोहम्मे अपरिग्गहियासु, चोद्दस उ तंसि चेव परिग्गहियासु, पलिओवमपुहुत्तं देवकुरादिसु। पुरिसवेओ जहण्णेणं अंतोमुहुत्तं, कहं? अण्णवेदेहिंतो पुरिसेसु उववज्जिऊण अंतोमुहुत्तं जीविऊण पुणोवि अन्नवेदगेसु चेव उववज्जमाणोत्ति, अन्ये तु पुरिसो उवसंतवेदो अंतोमुहुत्तं कालं काऊण देवेसु उववन्नो पुणोवि पुरिसवेदओ चेवत्ति व्याचक्षते तदभिप्रायं त्वतिगम्भीरत्वान्न विद्मः, उक्कोसं कंठं, णपुंसगवेदओ जहण्णेणं एगं समयं, पडिवज्जमाणो एगसमयमवेदगो होऊणमतो, उक्कोसेण अंतोमुहुत्तं ततो परं नियमेन परिवडणे वेदभावओत्ति। 'कोहकसाई जहण्णेण अंतोमुहुत्त'मित्यादि, विशिष्टमुपयोगोदयमधिकृत्येदं भावनीयं, लोभकसायी जहण्णेणं एक्कं समयं, कहं? जो उवसमसेढीपज्जवसाणे उवसंतवीतरागो होऊण परिवडंतो लोभाणुपढमसमयसंवेदणे चेव कालं करेइ तस्य किल तदनन्तरं सव्वे चेव कसाया जुगवमेवोदयं

गच्छंति, ण तदा लोभकसाय एव केवलोत्ति एवं गुरवो व्याचक्षते, आह यद्येवं क्रोधादिष्वपि कस्मादेवमेव न भवति ? उच्यते तेषां हि यथौघत एवान्तर्मुहूर्त्तकः प्रारम्भे उपशमकालः एवं प्रतिपततोऽपि युगपदेवारंभो, मरणेऽपि तद्भावादेवेत्यर्थः । लेश्याधिकारे— 'कण्हलेसा उक्कोसेणं तेत्तीसं सागरोवमाइं अंतोमुहुत्तमब्भहियाइं' अधः सप्तमपृथिव्यामुत्पद्यमानस्योद्वर्त्तमानस्यापि किंचित् कालभावात्, "जल्लेसे उववज्जति तल्लेसे उव्वट्टतित्ति" वचनाद् । एवं णीललेसादि पंचमपुढविआदिपत्थडे, काउलेस्सा ततियपुढविपढमपयरेति, तेऊलेस्सा ईसाणे, पम्हलेस्सा बंभलोए, सुक्कलेसा अणुत्तरेसु, 'सम्मद्दिट्ठी सादीए अपज्जवसिए' खाइयसम्मत्तं पडुच्च, सादीए सपज्जवसिते, पुण खओवसमियादि पडुच्च, तं च उक्कोसओ छावट्ठिं सागरोवमाइं सातिरेगाइं कहं ? "दोवारे विजयादिसु गयस्स तिण्णच्चुते अहव ताइं । अतिरेगं नरभवियं णाणाजीवाण सव्वद्धं ॥१॥" ओहिणाणी जहण्णेणं एगं समयं', कहं ? जया विभंगनाणी संमत्तं पडिवज्जति तस्स पढमसमये तं चेव विभंगं ओहिणाणं भवति, तम्मि समए तस्स परिवडति जदा तदा एक्कं समयं, मणपज्जवणाणी जहण्णेणं एक्कं समयं, संजयस्स अप्पमत्तद्धाए वट्टमाणस्स मणपज्जवं समुप्पण्णं उप्पत्तिसमयं कालं करेंतस्स परिवडितं । 'ओहिदंसणी दो छावट्ठीओ सातिरेगाओ', कहं ? विभंगणाणी तिरिक्खो मणुस्सो वा अहे सत्तमाए उववण्णो तेत्तीससागरोवमठिती, ततो तत्थुव्वट्टणकालासण्णे सम्मत्तं पाविय पुणोवि परिचयइ य अपरिवडिएण चेव विभंगेण पुव्वकोडिआउएसु तिरिक्खेसु जाओ, पुणरवि अपरिवडियविभंगो चेव अहेसत्तमाए उववण्णो, तत्थ तेत्तीससागरोवमट्ठितीतो, तओ पुणोवि उव्वट्टणकाले स सम्मत्तं पाविय पुणोवि परिचयइ, अपरिवडिएण चेव विभंगेण पुव्वकोडिआउएसु तिरिक्खेसु जाओ, आह किं सम्मत्तं पडिवज्जति ? उच्यते, जतो विभंगस्स थोवा ठिती, भणियं च—"विभंगणाणी जहण्णेणं एक्कं समयं, उक्कोसेणं तेत्तीसं सागरोवमाइं देसूणपुव्वकोडीए अब्भहियाइं"ति, ततो अपरिवडियविभंगो मणुस्सत्तं पाविय संजमं लहित्ता विजयादिसु दोवारे उववज्जमाणस्स दुतिया छावट्ठी भवति, दंसणं च विभंगोहीण जओ तुल्लमेव, अतो दो छावट्ठी सातिरेगाओ । केचिदेवं व्याचक्षते, इह च अविग्रहेणाधः सप्तमपृथिव्यास्तिर्यक्षु उत्पादयितव्यः, विग्रहे विभङ्गस्य प्रतिषिद्धत्वाद्, वक्ष्यति च 'विभंगणाणी पंचिंदियतिरिक्खजोणिया

मणुस्सा य", आहारगा णो आहारगस्सि। अवसेसेसु जीवादिभंगो, गुरवस्तु व्याचक्षते, किं नः सप्तमनरकपृथिवीनिवासिनारकादिपरिकल्पनया ? सामान्येनैव नारकतिर्यङ्नरामरभवेषु पर्यटतः खल्ववधिविभंगावेतावंतं कालं भवत इति, तत ऊर्ध्वमपवर्ग इति। संजए एक्कं समयं, चरित्तपरिणामसमए चेव कालं करेंतस्स, सव्वसावज्जपरिवज्जणपरिणामस्स य एकसामायिकस्य भावात्। संजतासंजते जहण्णेणं अंतोमुहुत्तं, दुविहतिविहाइपडिवत्तिउवओगस्स नियमा एवान्तर्मुहूर्त्तिकत्वात्। सजोगिभवत्थकेवलिअणाहारए अजहण्णमणुक्कोसेणं तिण्णि समया, कहं? समवहतस्य कैवलिनः, उक्तं च—"प्रथमे समये दंडं कपाटमथ चोत्तरे तथा समये। मंथानमथ तृतीये लोकव्यापी चतुर्थे तु ॥ १ ॥ संहरति पंचमे त्वंतराणि मंथानमथ पुनः षष्ठे। सप्तमके तु कपाटं संहरति ततोऽष्टमे दंडम् ॥ २ ॥ औदारिकप्रयोक्ता प्रथमाष्टमसमययोरसाविष्टः। मिश्रौदारिकयोक्ता सप्तमषष्ठद्वितीयेषु ॥ ३ ॥ कार्म्मणशरीरयोगी चतुर्थके पंचमे तृतीये च। समयत्रयेऽपि तस्मिन् भवत्यनाहारको नियमात् ॥ ४ ॥" अत्र गुरवो व्याचक्षते—मंथानसमये बहिः प्रदेशे निर्गमादनाहारकः सर्वपरिशातसमयवद्वैग्रहिकः, षष्ठे तु मंथानोपसंहरणसमये आहारकः, अतः प्रदेशप्रदेशाः सर्वथा तत्र युज्यमानाः इत्यस्मादेव गम्यते देशतोऽपि स्वावगाहनातः प्रदेशोऽयमनाहारकः। अभासए सादीए सपज्जवसिए अंतोमुहुत्तं एगिंदिओ अभासओ, बेइंदियाइएसु भासएसु उववण्णे अंतोमुहुत्तं जीविऊण य पुणरवि एगिंदिओ। चरिमे अणादीए सपज्जवसिए, भव्वव्व, अचरिमे अणादीए अपज्जवसिए, अभव्वव्व, सादीए अपज्जवसिए सिद्धे तस्य सिद्धत्वेनाचरमत्वात् न हि स सिद्धो विद्यते यस्मिन् सति पुनरपरो न भविष्यति ॥

॥ प्रज्ञापनाप्रदेशव्याख्यायामष्टादशपदव्याख्या समाप्तेति ॥



एकोनविंशतितमं तु निगदसिद्धमेव, नवरं सम्यग्मिथ्यादृष्ट्या प्रतिपद्यमान एव, न तु प्रतिपतन्तः "सम्मा मिच्छं न उण मीसंति वयणाओ" (?) ॥ प० १९ ॥

साम्प्रतं विंशतितममारभ्यते । अस्य चायमभिसंबंधः—इहानन्तरपदे सम्यक्त्वपरिणामः प्रतिपादितः, इह तु परिणामस्य गतिपरिणामविशेषा एवान्तक्रियेति तत् प्रतिपादनार्थमिदमारभ्यते, इह चेदमादिसूत्रं-'जीवे णं भंते अंतकिरियं करिज्जा' इत्यादि, तत्र अमनमन्तः अवसानं, कस्य ? कर्म्मणः, तस्य तस्मिन् वा क्रिया अन्तक्रिया, कर्म्मान्तकरणं मोक्ष इत्यर्थः, "कृत्स्नकर्म्मक्षयो मोक्ष" इति वचनात्, शेषं पुनः प्रायः सूत्रसिद्धमेव यावत् 'रयणप्पभापुढविनेरइए णं भंते !० अणंतरं उव्वट्टित्ता तित्थगरत्तं लभेजा ?' इत्यादि, अनंतरागता विवक्षितभवानन्तरभवस्था उच्यंते, तथा स्त्रीणां विंशतिर्बहुतरप्रव्रजनात्, 'जस्स णं नेरइयस्स तित्थगरना-मगोत्ताइं कम्माइं बद्धाइ'ति-बन्धमात्रं, पुट्ठाइं, निधत्तानि-उद्वर्त्तनापवर्त्तनकरणवर्जशेषकरणायोग्यत्वेन व्यवस्थापितानीत्यर्थः, कडाइंति-निकाचितानि सर्वकरणायोग्यत्वे व्यवस्थापितानि, पट्ठवियाइंति मनुष्यगतिपंचेन्द्रियजातित्रसबादरपर्याप्तसुभगादेययशःकीर्तिनामकर्म्म-सहोदयत्वेन व्यवस्थापितानीत्यर्थः, 'णिविट्ठाइं'ति तीव्रानुभावतया, अभिसमन्वागतानीति-उदयाभिमुखीभूतानि, 'उदिण्णाइं' विपक्कानि शेषं ग्रन्थत एवानुसरणीयं, यावत् 'अह भंते !' इत्यादि तत्रासंजतभव्यद्रव्यदेवा के ? उच्यंते, असंयताः—चारित्रपरिणामशून्याः, भव्याः—देवत्वयोग्याः, अत एव द्रव्यदेवा इति, समासश्चैवं असंयताश्च ते भव्यद्रव्यदेवाश्चेति, तत्रैते असंयतसम्यग्दृष्टयः किलेत्येके, यतः किलोक्तं-"अणुव्वमहव्वएहि य बालतवोऽकामनिज्जराए य । देवाउयं निबंधति सम्मदिट्ठी य जो जीवो ॥ १ ॥" एतच्चायुक्तं, यतोऽमीषामुत्कृष्टत उपरिमग्रैवेयकेषु उपपात उक्तः, सम्यग्दृष्टीनां तु देशविरतानामपि न तत्र विद्यते, देशविरतश्रावकाणामप्यच्युताद् ऊर्ध्वमगमनात्, [सम्यग्दृष्टीनां तु देशे] नाप्येते निह्नवास्तेषामिहैव भेदेनाभिधानात्, तस्मान् मिथ्यादृष्टय एव भव्याभव्यभेदाः श्रमणगुणधारिणः अखिलसामाचार्यनुष्ठानयुक्ता द्रव्यलिङ्गधारिणो गृह्यन्ते, तेऽप्यखिलकेवलक्रियाप्रभावत एवोपरिग्रैवेयकेषूत्पद्यन्त इति, असंयताश्च सत्यप्यनुष्ठाने चारित्रपरिणामशून्यत्वात् । अविराधितसंयमाः—प्रव्रज्याकालादारभ्याभग्नचारित्रपरिणामाः, स्वल्प-

मत्यादिसंभवेऽप्यनाचरितोपघाता इत्यर्थः, अन्यथा पीठादीनामनुत्तरसुरेषूपपाताभावः स्यात् । विराधितसंयमाः प्रतिपक्षतो भावनीयाः । अविराधितसंयमासंयमाः—प्रतिपत्तिकालादारभ्याखंडितदेशविरतिपरिणामाः श्रावकाः, इतरे प्रतिपक्षतो वेदितव्या इति । असंज्ञिनो ये अकामनिर्जरादिभ्यो देवेषूपपद्यंते । तापसाः परिशटितपत्राद्युपभोगिनः । कंदर्पिकाः—व्यवहारतश्चरणवंत एव कन्दर्पकौकुच्यादि कुर्वन्ति, उक्तं च "कंदप्पे कुक्कुइए दवसीले यावि हासणकरे य । विम्हावितो य परं कंदप्पं भावणं कुणइ ॥ १ ॥ कहकहकहस्सहसणं कंदप्पो अनिहुया य संलावा । कंदप्पकहाकहणं कंदप्पुवएस संसा य ॥ २ ॥ भमुहणयणाइएहिं वयणेहि अ तेहिं तेहिं तह चिट्ठं । कुणइ जह कुक्कुअं चिअ हसइ परो अप्पणा अहसं ॥ ३ ॥ वाया कुक्कुइओ पुण तं जंपइ जेण हस्सए अन्नो । णाणाविहजीवरुते कुव्वति मुहतूरए चेव ॥ ४ ॥ भासति दुतं २ गच्छए य दप्पिअव्व गोविसो सरए । सव्वदवद्दवकारी फुट्टति व ट्ठिओ वि दप्पेणं ॥ ५ ॥ वेसवयणेहि हासं जणयंतो अप्पणो परेसिं च । अह हासणोत्ति भण्णति घयणोव्व छले णियच्छंतो ॥ ६ ॥ सुरजालमादिएहिं तु विम्हयं कुणति तव्विहजणस्स । तेसु न विम्हयइ सयं आहट्टकुहेडगेसुं च ॥ ७ ॥ जो संजतोवि एयासु अप्पसत्थासु भावणं कुणति (वट्टइ कहंचि) । सो तव्विहेसु गच्छति सुरेसु भइओ चरणहीणो ॥ ८ ॥" चरकपरिव्राजकाः—धाटिभिक्षोपजीवित्रिदण्डिनः, किल्बिषिकाः—व्यवहारतश्चरणवंत एव ये ज्ञानाद्यवर्णवादिनः, उक्तं च—"णाणस्स केवलीणं धम्मायरियाण सव्वसाहूणं । माई अवण्णवादी किव्विसियं भावणं कुणति ॥ १ ॥ काया वया य ते च्चिय ते चेव पमाय अप्पमादा य । मोक्खाहिगारिगाणं जोइसजोणीहिं किं कज्जं ? ॥ २ ॥ एगंतरमुप्पादे अण्णोण्णावरणता दुवेण्हंपि । केवलदंसणणाणाणमेगकाले य एगत्तं ॥ ३ ॥ जच्चादीहिं अवण्णं विहसति वट्टइ नया वि उववाए । अहितो छिद्दप्पेही पगासवाती अणणुकूलो ॥ ४ ॥ अविसहणातुरियगती अणाणुवित्ती य अवि गुरूणंपि । खणमेत्तपीतिरोसा गिहिवच्छलगा य संचइया ॥ ५ ॥ गूहति आतभावं घामति गुणे परस्स संतेऽवि । चोरो व्व सव्वसंकी गूढायारो वितहभासी ॥ ६ ॥ तिर्यञ्चो—गवाश्वादयो देशविरतिप्रभावतो भावनीया इति । आजीविकाः—पाखंडिकविशेषाः, गोशालमतानुसारिण इत्येके, आजीवंति वा येऽविवेकतो लब्धिपूजाख्यात्यादिभिस्तपश्चरणादीति ।

आभियोगिकाय इहाभियुंजते विद्यादिभिरिति। स्वलिङ्गिनस्तु व्यापन्नदर्शना णिण्हवा इति। णेरइयादीणं असण्णिआउयस्स अप्पबहुत्तं आउगस्स दीहहस्सते पडुच्च, शेषं सुगमम्।

॥ प्रज्ञापनाप्रदेशव्याख्यायां विंशतितमपदव्याख्या समाप्तेति ॥

साम्प्रतं एकविंशतितममारभ्यते, अस्य चायमभिसम्बन्धः, इहानन्तरपदे गतिपरिणामविशेषः [illegible] उक्तः, इहापि गतिपरिणामविशेष एव शरीर[illegible] [illegible]ति, तत्रेह संग्रहगाथा—"[illegible]सरीरओगाहणप्पबहुं ॥ १ ॥" तत्र 'कइ णं भंते! सरीरा' इत्यादि "[illegible] सूत्रसिद्धं यावत् आहारगसरीरस्स जहण्णेणं देसूणा रयणी' तथाविधप्रयत्नविशेषतस्तथारम्भकद्रव्यविशेषतश्च प्रारम्भकालेऽप्युक्तप्रमाणभावात्, शेषं सुगमं यावत् 'जीवस्स णं भंते मारणंतियसमुग्घाएणं समोहयस्स तेयगसरीरस्स के महालिया सरीरोगाहणा पण्णत्ता? गोयमा! सरीरप्पमाणमित्ता विक्खंभबाहल्लेणं' तत्थ विक्खंभो उरोदरवित्थरो, बाहल्लं उदरपिठिथौल्लत्तणं, आयामेणंति आयामो-दैर्घ्यं, 'जहण्णेणं अंगुलस्स असंखिज्जइभागं' आसण्णे उववज्जमाणस्स घिप्पइ, 'उक्कोसेणं लोगंताओ लोगंतं' अहोलोगंताओ उड्ढलोगंते उववज्जमाणस्स, अयं च एगिंदियाण चेव भवति सुहुमबादराणं, न सेसाणंति। 'बेइंदियस्स तिरियलोगातो लोगंतो' कहं? जेण एगिंदिएसु वि समंतातो उववज्जति, बेइंदियस्स तिरियलोगाओत्ति, अण्णहा उड्ढलोगा अहोलोगतो एकदेसभावेवि ते संति चेव 'णेरइयाणं आयामेणं जहण्णेणं सातिरेगं जोयणसहस्सं' कहं? नरकगत्याः (कादुद्धृत्य) पातालकुड्यं भिंदेत्ता मच्छेसु पातालातो वा मच्छस्स नरगेसु उववज्जमाणस्स, अन्ये तु व्याचक्षते-नारकाणां योजनसहस्रं, कहं? सीमंतको नाम नरकः सर्वोपरिवर्ती वज्रमयो योजनसहस्रबाहुल्यकुड्यः, इतो योजनसहस्रमवगाह्य तत्र ये नारका मत्स्या भवितु-

कामास्ते तदासन्नसमुद्घातगतास्तत्र सहस्रं लभते, भवणवतिवाणमंतरजोइसियसोहम्मीसाणाणं य जघन्यतोऽङ्गुलस्यासंख्येयभागः, कथं? एतेसिं एगिंदिएसु उववातो अत्थित्ति, तेन ते स्वाभरणेष्वङ्गदादिषु कुण्डलादिषु वा ये मणयः पद्मरागादयः तेषु गृद्धा मूर्च्छितास्तदध्यवसितास्तेष्वाभरणकादिषु पृथिवीकायिकत्वेनोत्पद्यन्ते, इह तु पूज्याः खल्वेवं भावार्थमतिवर्णयंति–यथोपपातदेशगतजीवप्रदेशापेक्षयैतदुच्यते, कुतः? मणेः तदुपपातक्षेत्रस्य वा तच्छरीरविष्कंभबाहुल्यायोगात्, न च तत्र गतोऽपि तत्र संघातमधिकृत्य तदाहारकस्तदा भवति, तदा विष्कंभं बाहुल्यं चोपसंहृत्य सर्वात्मना तत्र प्रतिष्ठो भवतीति, अयं च स्वाभरणादावुत्पद्यमान एव द्रष्टव्य इति, स्थापना। अहे जाव तच्चा पुढवीति, तत्र गता एव म्रियन्त इति, तिरियं सयंभूरमणस्स बाहिरिल्ले वेदियंते जे पुढविकाइया तेसु उववज्जमाणस्स, उड्ढं इसीपब्भाराए पुढविकाइयत्तणेण, सनत्कुमारदेवस्य जघन्यतः अंगुलस्यासंख्येयभागः, कथं? ते एकेन्द्रियेषु विकलेन्द्रियेषु वा नोत्पद्यन्ते यत्र पंचेंद्रियतिर्यङ्मनुष्यास्तत्रोत्पत्तव्यमिति, पुष्करिण्यादिषु लवणे, महापातालकलशप्रेषु [illegible]तत्त्वेनोत्पत्तिः, पूर्वसम्बन्धिनीं वा स्त्रियं परिष्वज्य मृतस्य इहागतस्य लभ्यते, उत्कृष्टतः अधोधर्म्मः, तत्र मत्स्यादिषूत्पद्यते, तिर्यक् स्वयम्भूरमणे मत्स्यादिष्वेव, ऊर्ध्वं यावदुक्त [illegible] द्वितीयत्रिभागो वायूदकयोरुत्सरणापसरण- [illegible]त्रिभागतस्य, न तत्र वाप्यादिषु मत्स्यादय इतीहैव तिर्यङ्मनुष्येषूत्पत्तिः, एवं यावत् सहस्रारदेवस्य, आनतादिदेवा मनुष्येष्वेवोत्पद्यन्ते, तत्राङ्गुलासंख्येभागः, कथं? उच्यते, इह पूर्वसम्बन्धिनीं मनुष्यस्त्रियं मनुष्येणोपभुक्तामुपलभ्यासन्नमृत्युत्वाद्विपरीतस्वभावत्वात्, सत्त्वचरितवैचित्र्यात् कर्मगतेरचिंत्यत्वात् कामवृत्तेर्मलिनत्वाद्, उक्तं च "सत्त्वानां चरितं चित्रमचिन्त्या कर्म्मणां गतिः। मलिनानत (नत्वं च) कामानां, वृत्तिः पर्यन्तदारुणा ॥ १ ॥" इत्यतः [illegible]चित्तामेव परि[धज्ज]ष्वज्य (परिभुज्य) तद्वाच्यप्रदेशे स्वावाच्यं प्रक्षिप्य मृतस्य सतस्तस्या एव गर्भे मनुष्यत्वेनोत्पद्यमानस्य लभ्यत इति, जेण भणियं–"मणुस्सवीए णं भंते! कालतो केवच्चिरं? गो० जहण्णेणं अंतोमुहुत्तं उक्कोसेणं बारस मुहुत्ता" तेन द्वादशमुहूर्ताभ्यन्तरे उपभुक्तां तां परिष्वज्य मृतस्य तत्रैवोत्पत्तिर्मनुष्यत्वेन, एवं

यावदच्युतदेवस्य अधस्तिर्यक् कंठोक्तं। ग्रैवेयकादयो वन्दनाद्यपि तत्रस्था एव कुर्वन्ति तेन इहानागमनादंगुलासंख्येयभागासंभव इति। शेषं सुगमं यावत् ओरालियसरीरस्स पोग्गला चिज्जंति णिव्वाघाएणं छद्दिसंति, जत्थ ओरालियसरीरिणो जीवस्य छसुवि दिसासु पोग्गलाणं संभवो अत्थि, वाघाएणं सिय तिदिसिं चउदिसिं पंचदिसिं चेति, सुहुमनिओयजीवाणं लोगंते अवगाहणं जत्थ उड्ढं लोगागासं णत्थि, तिरियंपि पुव्वेण णत्थि, उत्तरेण णत्थि, अहे दक्खिणेणं अवरेण वि अत्थि, तत्थ तिदिसिं, जत्थ उत्तरेण तत्थ चउदिसिं, जत्थ पुव्वेण अत्थि तत्थ पंचदिसिं, अयं व्याघातः लोकान्ते स्थितस्य। शेषं सुगमं यावत् तेयाकम्माणं च ओरालियसरीरजहण्णोगाहणाओ विसेसाहिया, कहं? मारणंतियसमुग्घाएणं समोहतस्स पुव्वसरीराओ अन्नं सरीरं गिण्हंतस्स जहण्णावगाहेऽवि तदंतरालं तदपि व्याप्तमिति विशेषाधिकाः, शेषं गतार्थम्॥

॥ प्रज्ञापनाप्रदेशव्याख्यायामेकविंशतितमपदव्याख्या समाप्तेति ॥



साम्प्रतं द्वाविंशतितममारभ्यते, अस्य चायमभिसम्बन्धः, इहानन्तरपदे गतिपरिणामविशेष एवेति कृत्वा शरीरावगाहनादि चिन्तितं, इह नारकादिपरिणामेन परिणतानां जीवानां प्राणातिपातादिक्रियाविशेषश्चिन्त्यत इति, इह चेदमादिसूत्रम्—'कति णं भंते! किरियाओ' इत्यादि, तत्र करणं क्रिया, कर्म्मनिबन्धना चेष्टेत्यर्थः सा च पंचधा, तंजहा–काइया इत्यादि, तत्र चीयत इति कायः, काय एव कायेन वा निर्वृत्ता कायिकी, तथाऽधिक्रियते नारकादिष्वात्माऽनेनेत्यधिकरणं देहादि तस्मिन् भवा तेन वा निर्वृत्ता आधिकरणकी, तथा प्रद्वेषो–मत्सरः कर्म्मबन्धहेतुरकुशलो जीवपरिणाम इत्यर्थः तस्मिन् भवा तेन वा निर्वृत्ता प्राद्वेषिकी, तथा परितापनं परितापः पीडाकरणमित्यर्थः तस्मिन् भवा तेन वा निर्वृत्ता पारितापनिकी, तथा प्राणातिपातक्रिया, इहेन्द्रियप्राणादयः

प्राणास्तेषामतिपातो-विनाशः प्राणातिपातस्तस्मात् क्रियेति समासः, तत्र कायिकी द्विभेदा, तद्यथा-अणुवरयाकाइया य दुप्पउत्त-
काइया य, तत्र नोपरतोऽनुपरतः, दुष्प्रयुक्तश्चासौ कायश्चेति तस्मिन् भवा तेन वा निर्वृत्ता दुष्प्रयुक्तकायिकी, इयं प्रमत्तसंयतस्यापि
भवति, प्रमादे सति कायदुष्प्रयोगनियमात्। तथा अधिकरणिक्यपि द्विभेदा, तद्यथा-संजोयणाधिकरणिया य णिव्वत्तणाधिकरणिया
य, तत्र संयोजनं हलगरविषकूटयंत्रादीनां, तदेव संसारहेतुत्वादधिकरणमिति-समासः पूर्ववत्, इयमप्यनन्तरसंयोजयितुर्भवतीति,
एवं अक्षरगमनिका स्वबुद्ध्यैव कार्या, तथा निवर्त्तनं असिशक्तिकुन्ततोमरादीनामिति, पंचविधस्य वा शरीरस्य, तथा प्राद्वेषिकी
त्रिविधा, तद्यथा-'जे णं अप्पणो वा परस्स वा तदुभयस्स वा असुभं मणं पहारेइत्ति' यः कश्चित् णमिति वाक्यालङ्कारे, आत्मनः-
स्वस्य वा, परस्य वा-अन्यस्य वा, तदुभयस्य वा-स्वपरोभयस्य अशुभं-अकुशलं मनः-अन्तःकरणं प्रधारयति-प्रकर्षेण धारयति
प्रधारयति करोतीत्यर्थः, अत्रैके व्याचक्षते-आत्मन उपरि तथा परस्य तदुभयस्येति, तथाचात्मन एवोपरि कस्मिंश्चिदाचरिते सति
विपाकदारुणे संवृत्ते अविवेकतः अकुशलं मनः प्रधारयति, एवं परस्य तदुभयस्य चेति भावनीयं, अथवा 'जेणं' ति येन विशेषेणा-
त्मनः परस्य तदुभयस्य वा अकुशलं मनः प्रद्वेषहेतुत्वादिति, नैतदेवं, वीतरागादिचेष्टाया निरवधत्वादनुमत्यभावात्, सावद्यचेष्टातश्च
सा भवति, संसाराभिनन्दिनः आत्मा प्राद्वेषिक्येव वस्तुतो वेदितव्या इति, बह्वत्र वक्तव्यं तत्तु नोच्यते ग्रन्थविस्तरभयादिति।
पारितापनिकी त्रिविधा, तद्यथा-जेणं अप्पणो वेत्यादि, असातां दुःखरूपां वेदनामुदीरयति। आह-एवं सति लोचाकरणतपोऽनुष्ठा-
नाकरणप्रसंगः, नैतदेवं, विपाकहेतत्वेन चिकित्साकरणवल्लोचकरणादेरसातत्वानुपपत्तेः अशक्यकरणप्रतिषेधाच्च। उक्तं च-"सो हु
तवो कायव्वो, जेण मणो मंगुलं न चिंतेइ। जेण न इंदियहाणी, जेण य जोगा ण हायंति ॥ १ ॥" तथा प्राणातिपातक्रिया त्रिविधा
तद्यथा-जेणमित्यादि, जीविताद् व्यपरोपयति-जीविताद् भ्रंशयतीत्यर्थः, अत एवाकारणे अकालमरणमपि निषिद्धमिति। शेषं सूत्रसिद्धं
यावत् 'अत्थिणं भंते! जीवाण' मित्यादि, इह विषयविषयिभावश्चिन्त्यते, तत्र विषयः षट् कायाः, विषयिणी प्राणातिपातक्रिया।
आहैवं वक्तव्यं-अस्ति जीवेऽपि प्राणातिपातक्रिया?, हंतः अस्ति, हंत संप्रेषणप्रत्यवधारणविवा(षा)देषु इह तु प्रत्यवधारणे,

यद्यस्ति क्वास्ति? षट्सु जीवनिकायेषु इति, किमुच्यते कञ्जतीति उच्यते अनतीतनयाभिप्रायात्मकोऽयं प्रश्नः कतमोऽत्र नयोऽयमध्यवस्य पृच्छति? उच्यते ऋजुसूत्रः, यस्माद् ऋजुसूत्रस्य हिंसापरिणतिकाल एव प्राणातिपातक्रिया, नान्यथापरिणतस्य, एवं च सूत्रोक्तं–"आता चेव अहिंसा आया हिंसत्ति णिच्छओ एस" त्ति, आत्मैव हिंसापरिणतेः हिंसेत्युच्यते, अतः क्रियमाणैव क्रिया, नान्यथा, एवं सर्वत्र भावनीयं, नवरं विषयः "पढमंमि सव्वजीवा वीए चरिमे य सव्वदव्वाइं। सेसा महव्वया खलु तदेक्कदेसेण दव्वाणं ॥ १ ॥" शेषं सूत्रसिद्धं यावत्–'जीवे णं भंते! पाणाइवाएणं कति कम्मपगडीओ बंधती'त्यादि, अत्र सप्तविधबन्धकः आयुर्वर्ज्यः अष्टविधबन्धकाः सहायुषा, एत्थं जहेव सुत्तं सत्तविहबंधकावि अट्ठविहबंधगावि, तत्रायुर्बन्धाध्यवसानसहिता अट्ठविहबन्धकाः, तद्विरहात् सप्तविधबन्धका इति, यस्मादन्तर्मुहूर्तमायुर्बन्धो भवति शेषाश्च मूलप्रकृतयः प्रतिक्षणं बध्यन्त इति, एतच्च द्रव्यार्थनयदर्शनेनाविरतिं प्रत्युक्तं, इतरथा हि ध्रुवबंधित्वात् ज्ञानावरणादिप्रकृतीनां विग्रहगतावपि बन्धोऽस्ति मूलप्रकृतिं प्रति, न तु हिंसादिपरिणतिकाल एव गृह्यते। शेषं सूत्रसिद्धं यावत् जीवाणं भंते! णाणावरणिज्जं कम्मं बंधमाणा कति किरिया' इत्यादि, कः अस्याभिसम्बन्धः?, उक्तं जीवाः प्राणातिपातेन सप्तविधं वा अष्टविधं वा कर्म्म बध्नाति, इह तु तमेव प्राणातिपातं ज्ञानावरणीयादि कर्म्म बध्नन् जीवः कतिभिः क्रियाभिः संप्रा(मा)पयतीति, किंच कार्येण ज्ञानावरणीयकर्म्माख्येन कारणस्य प्राणातिपाताख्यस्य निवृत्तिभेदाः प्रदर्श्यन्ते, तद्भेदाच्च बन्धविशेषोऽपीति, तथा चोक्तं–"तिसृभिश्चतसृभिरथ पंचभिश्च हिंसा समाप्यते क्रमशः। बन्धोऽस्य विशिष्टः स्यात् योगप्रद्वेषसामान्यं(साम्यं चेत्) ॥ १ ॥" चेति, कार्यकारणव्यवस्था च आपेक्षाकृता, यथा प्राणातिपातः कारणं बन्धस्य तथा बन्धोऽपि संसारकारणमिति, निवृत्तिभेदं दर्शयति 'सिय तिकिरिए' इत्यादि, काइयअधिकरणीयपाओसियाहिं तिकिरिए, काइयअधिकरणीयपाओसियपारियावणियाहिं चउकिरिए, काइयअधिकरणीयपाओसियपारियावणियपाणाइवायकिरियाहिं पंचकिरिए, शेषं निगदसिद्धं, 'जीवे णं भंते! जीवाओ कइकिरिए' इत्यादि, अथ कोऽस्य सम्बन्धः?, उच्यते, न केवलं वर्त्तमानभववर्तिनो जीवस्य ज्ञानावरणीयादिकर्म्मबंधभेदप्ररूपणायां कायिक्यादिक्रियाविशेषेण प्राणातिपातभेदः प्रदर्श्यते,

किरिए, तत्रेयमुपपत्तिः, यस्माद् भवनवास्यादयो देवाः तृतीयां पृथिवीं गता गमिष्यन्ति च उक्तं ते पुनः कथं गता गमिष्यन्तीति? पुव्वसंगइयस्स वेदणमुवसामणताए, पूर्ववैरिणो वा वेदनोदीरणार्थं तत्र गता नारकैर्व्यथ्यंत इत्यप्यन्तकाल एव कथंचित् संभवमात्रमेतदिति । सिय अकिरिए तत्थ कहं ? जस्स सरीरे एकदेसेणं अभिघातादिसंभवो णत्थि, तं पडुच्च भण्णति सिय अकिरिय इति । अत्र पर आह–नारकस्य कथं द्वीन्द्रियादिभ्यः कायिक्यादिक्रियाः ? उच्यते, यस्मात् पूर्वभवशरीरं न व्युत्सृष्टं, जाव तं शरीरं जीवेणं निव्वत्तियं तब्भावं ण छड्डेत्ति ताव तत् पूर्वभावप्रज्ञापनीयस्य (मते) तस्यैवेति व्यपदिश्यते, "घृतघटन्यायेन," अतस्तेन शरीरेण एकदेशेन अस्थ्यादिना योऽन्यः प्राणातिपातं करोति, ततः पूर्वनिर्वर्त्तितशरीरजीवोऽपि कायिक्यादिक्रियाभिर्योज्यते, अव्युत्सृष्टाधिकरणत्वात्, यतो न केवलं कायिकीचेष्टात एव, अव्यापारादपि भवति, अधिकरणत्वात् कायस्य अधिकरणिकी च, प्राद्वेषिकी तु कथं? यदा तु तमेव जीवशरीरैकदेशमभिघातादिसमर्थं अन्यः प्राणातिपातोद्यतो दृष्ट्वा तस्मिन् घात्ये द्वीन्द्रियादौ समुत्पन्नक्रोधादिकारणः, अभिघातादिसमर्थं च पारितापनिकी प्राणातिपातक्रिया च शेषं निगदसिद्धं यावत् 'जस्स ण' मित्यादि, इदानीं कायिक्यादीनां एकजीवाश्रयाणां परस्परं अविनाभावित्वं चिन्त्यते 'जस्स णं कायिकी'त्यादि, इह कायिकीक्रिया प्राणातिपातनिर्वर्त्तनसमर्था प्रतिविशिष्टौदारिकादिकायाश्रयैव गृह्यते, न कार्म्मणशरीराश्रया, अत आद्यानां तिसृणां क्रियाणां परस्परतो नियम्यनियामकभावः, कथं? कायस्याधिकरणत्वात् काये सति अधिकरणकी भवति, काये च सति प्रद्वेषः स्फुटलिंगो भवति रूक्षवक्त्रादिना, तथाचोक्तं "रूक्षयति रुष्यतो ननु वक्त्रं स्निह्यति च रज्यतः पुंसः । औदारिकोऽपि देहो भाववशात् परिणमत्येवम् ॥ १ ॥" इति परितापनस्यानियमः कथं? यद्यसौ घात्यो मृगादिः घातकेन धनुषा क्षिप्तेन विध्यते ततस्तस्य परितापनं मरणं वा भवति नान्यथा, ततोऽनियमः, शेषं प्रकटार्थं यावत् 'समयं ण' मिति कालग्रहणं 'जं देसपदेसमि'ति क्षेत्रग्रहणं यथा चैताः, कायिक्यादिक्रियाः ज्ञानावरणीयादिकर्म्मबन्धकारणं, तथैव एताः संसारकारणमिति पृच्छति, न केवलं कारण एव कार्यमुपचर्यते, किन्तु कारणेष्वपि कार्योपचारो भवतीति, आह च–'कति णं भंते! आयोजियाओ किरियाओ' इत्यादि, आयोजयंति आत्मानं संसार

किन्तु अतीतभवकायसम्बन्धिकायादिक्रियाविशेषेणापि प्राणातिपातादि, भमंतेहिं सव्वजीवेहिं तेसु तेसु ठाणेसु शरीरायुधादिणो विप्पमुत्ता, तेहिं सत्थं(त्थाइ)भूएहिं यदा कस्सदि स्वतः परतो वा परियावणादयो भवंति तदा तस्सामिणो भवंतरमतस्सवि तदनिवृत्तत्वात् किरिया संभवंति, व्युत्सृष्टेषु तु निवृत्तस्य न भवंति, एत्थ उदाहरणं—

वसंतपुरे नगरे. अजियसेणस्स रण्णो परिचारगा दुवे कुलपुत्तगा, तत्थेगो समणसड्ढो, इयरो मिच्छादिट्ठी, अन्नया रयणीए रन्नो निस्साए ससंभम तूरंताणं तेसिं घोडगारूढाणं खग्गा पसढा(णट्ठा)सड्ढेण मग्गियं, जणकोलाहलओ य, नट्ठं, इयरेण हसियं—किमन्नं न होही ? सड्ढेण अहिगरणंतिकट्टु वोसिरियं, इयरे खग्गाते खग्गा वंदिग्गहसाहसिगेहिं लद्धा, गहिओ य णेहिं रायवल्लहो पलायमाणो वावाइओ य, ततो आरक्खिगेहिं गहिऊण रायसमीवं नीता, कुपितो राया, पुच्छियं चणेण—कस्स तुब्भे ? तेहिं भणियं—अणाहा, कलंचिय कप्पडिया, एत्थ अम्ह खग्गा, कहिं लद्धित्ति पुच्छिए भणियं—पडियत्ति, तओ सामरिसेणं रण्णा भणियं—गवेसह तुरियं मम अणवादवेरियाणं ईसरपुत्ताणं महापमत्ताणं केसिं इमे खग्गेत्ति ?, तओ तेहिं निउणं गवेसिऊण विण्णत्तं रण्णो—सामि ! सुण गुणचंदवालचंदाणंति, ततो रण्णो पिहं पिहं सद्दावेऊण भणिता—लेह नियखग्गे, एक्केण गहियं, पुच्छितो रण्णा—कहं पुण ते णट्ठं ?, तेण कहियं, कीस न गविट्ठं ?, भणति, सामि ! तुज्झ पसाएण एद्दहमेत्तंपि गवेसामि ?, सड्ढो ण इच्छति, रण्णा पुच्छितो—कीस न गिण्हसि ?, तेण भणितं—सामि ! अम्हाणमेस ट्ठिइ चेव नत्थि जमेवं एडि(गेण्ह)ज्जति, अहिगरणत्तणतो, संभमे य मग्गंतेणवि न य लद्धंति वोसिरियं, अतो ण कप्पति मे गिण्हिउं, ततो रण्णा पमादकारी अणुसासिओ, इयरो विप्पमुक्को, एस दिट्ठंतो, इमो य से अत्थोवणतो, जहा—सो पमायगब्भेण अवोसिरणदोसेण अवराहं पत्तो एवं जीवोवि जम्मंतरब्भत्थंपि देहाउधादि अवोसिरंतो अणुमतिभावतो पावेइ दोसं, श्रूयते च जातिस्मरणादिना विज्ञाय पूर्वदेहमतिमोहात् सुरनदीं प्रत्यस्थिशकलानि नयंतीत्यलं विस्तरेण।

'जीवे णं भंते जीवातो' इत्यादि, तत्र नारकादेवान् प्रति चतुष्क्रिया एव, "अनपवर्त्यायुषो नारका देवान्" इति वचनात्, औदारिकशरीरिणः संख्येयवर्षायुषः प्रति पंचापि क्रियाभेदाः संति, तेऽपवर्त्त्यायुष इति, जत्थ नेरइयदेवाओ पंच(चउ)—

इत्यायोजिकाः, शेषं पूर्ववदेव । न केवलं षट् कायादयः प्राणातिपातादिक्रियाहेतव एव, किंतु तद्विरमणे विवक्षितहेतवोऽपि भवन्तीत्यतः पृच्छति-'अत्थि णं भंते ! जीवाणं पाणाइवायवेरमणे कज्जइ ? हंता कज्जइ' इत्यादि, एवं 'जाव मिच्छादंसणसल्लवेरमणे णं तथा पाणाइवायविरयस्स बंधो अस्ति नास्तीति पृच्छति-'पाणाइवाय(विरए)वेरमणे णं भंते ! जीवे कति कम्मपगडीओ बंधती'त्यादि, आह—कथं पुनर्विरतस्य बंधः ? कोऽभिप्रायः ? यदि विरतिर्बन्धहेतुः स्यात्ततो निर्मोक्षप्रसङ्गः, यच्चोक्तम्-"सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्ग" इत्येतद्धीयते, उच्यते, न विरतिर्बन्धहेतुः, किंतु विरतस्य कषाययोगा बन्धकारणं देवायुष्कादीनां शुभप्रकृतीनां, तथा चोक्तं "तहारूवं णं भंते ! समणं वा माहणं वा पज्जुवासमाणस्स किंफला पज्जुवासणा ? सवणफला' इत्यादि, जति णं भंते ! तहारूवस्स समणस्स वा २ पज्जुवासणा सवणफला तं चेव, किंपत्तियण्णं भंते ! देवा देवलोएसु उववज्जंति ? कम्मसंगियाए अज्जो ! देवा देवलोएसु उववज्जंति, पुव्वतवसंजमेणं, सामाइयछेओवट्ठावणियपरिहारविसुद्धीयाइसु कसाया संभवंतीति, अतो विरतो बंधति । आरंभिया प्रमत्तसंजमस्स, कहं ? उच्यते यस्मादुक्तं-" संरंभो संकप्पो परितावकरो भवे समारंभो । आरंभो उद्दवओ सुद्धणयाणं तु सव्वेसिं ॥ १ ॥" तस्य च संज्वलनकषायोदयात् प्रमत्तत्वं, प्रमत्तत्वाच्च सांपरायिकबन्धः । मायावत्तिया अप्रमत्त-संयतस्य कथं ? उच्यते-प्रवचनोड्डाहप्रच्छादनार्थं वल्लीकरणसमुद्देशादिषु, तत्प्रत्ययबन्धः ईर्यापथः । शेषाः कण्ठ्याः । प्राणातिपात-विरताः संयतमनुष्या एव, ते च सप्तविधबंधका आयुर्बन्धरहिताः, आयुष्कसहिता अष्टविधबंधकाः, षड्विधबंधका उभयश्रेणिप्रतिपन्नाः मोहायुर्बन्धरहिताः, एकविधबन्धका उपशान्तक्षीणकषायसयोगिकेवलिनः सद्वेद्यबन्धं प्रति, एतेषु यत्रैकवचनं तत्रोपयुज्य वक्तव्यं । अल्पबहुत्वाधिकारे-सव्वथोवाओ मिच्छादंसणवत्तियाओ, कथ ? मिथ्यादृष्टीनामेवेति । अपच्चक्खाणकिरियाओ विसेसाहियाओ, येन असंयतस्स चेव मिच्छादृष्टेश्चेति, अतो विशेषाधिकाः, पारिग्रहिकी विशेषाधिका, येन देशविरतानां पूर्वेषांश्च, आरम्भिकी विशेषा-धिका, येन प्रमत्तसंयतस्यापि भवति पूर्वेषां च, मायाप्रत्ययिकी विशेषाधिका, येनाप्रमत्तसंयतस्यापि भवति पूर्वेषां च मिथ्या-दृष्टिप्रभृतीनामिति ॥

॥ प्रज्ञापनाप्रदेशव्याख्यायां द्वाविंशतितमपदव्याख्या समाप्तेति ॥

साम्प्रतं त्रयोविंशतितममारभ्यते, अस्य चायमभिसम्बन्धः—इहानन्तरपदे नारकादिगतिपरिणामपरिणतानां जीवानां प्राणातिपातादिक्रियाविशेषश्चिन्तितः, इह पुनः कर्म्मबन्धादिपरिणामविशेषश्चिन्त्यत इति । इह चेयमधिकारद्वारगाथा—"कति पगडी कह बंधति कतिहिवि ठाणेहिं बंधए जीवो । कति वेदेइ य पगडी अणुभावो कतिविहो कस्स ॥ १ ॥" 'कति णं भंते ! कम्मपगडीओ' इत्यादि, आह—उक्तमेव क्रियापदे कति प्रकृतय इति—इह तु किमर्थं प्रकृतिसंख्याऽर्थः प्रश्नः?, उच्यते, अस्त्यत्र विशेषः—तत्रोक्तं ज्ञानावरणीयादि कर्म्म बध्नन् जीवः कतिभिः क्रियाभिर्युज्यते ?, क्रियाश्च प्राणातिपातहेतवः, प्राणातिपातश्च बाह्यं ज्ञानावरणीयादि-कर्म्मबंधकारणं, कर्म्मबन्धः कार्यं; इह तु ज्ञानावरणीयादिकर्म्मबन्ध एवान्तरं कर्म्मबन्धकारणमित्ययं विशेषः । तथाचोक्तं "पुव्वभणितं तु जं भण्णती पुणो तत्थ कारणं अत्थि । पडिसेह अणुण्णा वा कारण(हेउ)विसेसोपलंभो वा ॥ १ ॥" बंधविशेषप्रतिपादनार्थं, न केवलं कायिकी क्रिया साम्परायिकबन्धस्य कारणं, ईर्यापथबंधस्य च । ज्ञानावरणीयादि पुनः साम्परायिकस्यैव, क्षीणावरणस्य केवलिनः कायक्रियानिमित्त ईर्यापथबंध एव । वाङ्मनोयोगावपि काययोगविशेष एव । अथ कोऽयं ज्ञानावरणीयादि-कर्म्मक्रमनियमः?, उच्यते, यस्मात् ज्ञानस्वतन्त्र आत्मा, तस्य ज्ञानस्वतन्त्रस्य आत्मनः स्वभावोपघाति ज्ञान(नावरणं)दर्शनावरणं च । ज्ञानदर्शनावरणयोः कथं प्राक् पश्चाद्वा ?, उच्यते, यस्माच्छुभाशुभप्रकृतीनां शुभाशुभानुभावबन्धकाले साकारोपयुक्तस्य एकद्वित्रिचतुःस्थानिकरसविशेषनिवर्त्तनयोग्यान्यध्यवसायस्थानानि लभ्यन्ते, अनाकारोपयुक्तस्य शुभाशुभप्रकृतीनां शुभाशुभानुभाव (बन्धकाले) द्विस्थानिकरसनिवर्त्तकान्येव, साकारोपयोगश्च ज्ञानमित्यतो ज्ञानावरणं प्रथमं, तथाचोक्तं कर्म्मप्रकृतिसंग्रहणिकायाम्—"अणगारप्पाउग्गा विठाणगया उ दुविहपगडीणं । सागारा सव्वत्थवि" त्ति, एतदुक्तं भवति—जीवस्स संकिलेसपरिणयस्स विसोहियापरिणयस्स वा अणगारोवउत्तस्स सुभासुभपगडीणं सुभासुभदुट्ठाणियरसनिवत्तियाणि चेव अज्झवसाणठाणाणि लब्भंति, 'दुविहपगडीणं' सुभाणं असुभाणं च 'सागारा सव्वत्थवी'ति सागारोवउत्तस्स सुभासुभपगडीणं सुभासुभएगठाणियदुट्ठाणियतिट्ठाणियचउट्ठाणियरसनिव्वत्तयाणि सव्वत्थ अज्झवसाणाणि लब्भंति । ततो वेद्यं, यस्मात् सर्वमेव हि कर्म्म अनुभवकाले सुख-

दुःखवेदनारूपेणाभिव्यज्यते। तत्र ज्ञानावरणविपाकः सुखदुःखरूपः, कथं ?, यस्मात् उक्तं "सब्भावस्स परिन्नाणं परतो य सुहित्तणं। पंचिंदियवसत्तं च पज्जत्तं दुक्खकारणं ॥ १ ॥" सुखरूपस्तु व्याबाधाभावश्च सर्वज्ञत्वे न भवति परमसुखी व्याबाधाभावस्तु स्वस्थस्य, न तु सुखं। मोहनीयविपाकोऽपि सुखादिरूपः। देवमनुष्यायुषः सुखरूपः, शेषस्तु दुःखरूपः। तथा शुभनामकर्म्मविपाकः सुखरूपः, अशुभनामकर्म्मविपाको दुःखरूपः। गोत्रविपाकः उच्चैर्गोत्रं सुखरूपः, नीचैर्गोत्रं दुःखरूपः। विघ्नविपाको दानादि, दानं स्थानव्ययात् सुखरूपं, अस्थानव्ययाच्चौरादिकात् प्रत्यपायानुभवाद् दुःखरूपः, इच्छितद्रव्यलाभात् सुखं तद्विपरीताद्दुःखं, (इष्टाहारादेः सुखं अन्यथाभूतात् दुःखं), अभीष्टवस्त्रालंकाराद्युपभोगात् सुखं, तद्विपरीताद्दुखं, बलसम्पन्नात् सुखं तद्धीनत्वाद्दुःखमिति। ततो मोहनीयं, यस्माद् इष्टानिष्टविषयसंबंधात् सुखदुखे, ते च रागद्वेषाभ्यां भवतः, रागद्वेषौ मोहनीयमिति, तत आयुष्कं, बह्वारम्भादीनां मोहनीयोदयात्। ततो नाम, नरकाद्यायुष्कसहोदयत्वान्नारकादिगतिनामादीनां। ततश्च गोत्रं, नारकादिभवाश्रयाभिव्यंग्यत्वात्। ततो विघ्नं, उच्चैःकुलोत्पन्नस्य दानलाभादिभिरभिव्यज्यते रा(ग)जप्रभृतीनां, नीचैःकुलोत्पन्नस्य तु विपर्यय इति। एवमेतेषां क्रम उक्तः। तत्र ज्ञानावरणीयमिति, ज्ञानमाव्रियते येन कर्म्मणा करणेऽनीयरि ज्ञानावरणीयं विशेषावधारणमित्यर्थः। दर्शनावरणीयं सामान्यावबोधस्य। तथा वेद्यत इति कर्म्मणि अनीयरि वेदनीयं। मुह्यतेऽनेन मोहनीयं, सर्वत्र अनीयर्। तथा इण् गतौ एति याति चेत्यायुः, औणादिक उस् जनेरुसीति एतेर्णिच्चेति वृद्धिः। 'णमः प्रह्वत्वे' गत्यादीन् शुभाशुभान् नमयतीति नाम। गूयत इति गोत्रं। अन्तरायो-विघ्नः, अन्तराये भवं अन्तरायिकं। शेषमुत्तानार्थं। यावत् 'कहण्णं भंते ! जीवे अट्ठकम्मपगडीओ बंधती'त्यादि, अत्र निर्वचनं 'गोयमा ! णाणावरणिज्जस्से'त्यादि, ज्ञानावरणीयस्य कर्मण उदयेन, किं ?, दर्शनावरणीयं कर्म्म निर्गच्छति, निश्चयेन गच्छति निर्गच्छति विशिष्टोदयापन्नमासादयतीत्यर्थः। तथा दर्शनावरणीयस्य कर्म्मण उदयेन दर्शनमोहनीयं कर्म्म निर्गच्छति, विपाकावस्थं करोतीत्यर्थः, अस्यैवोदयेन मिथ्यात्वं निर्गच्छति, ततश्च मिथ्यात्वेन उदीर्णेन एवं खलु जीवोऽष्टकर्म्मप्रकृतीर्बध्नाति, खलुशब्दः प्रायोवृत्त्यर्थप्रदर्शनार्थः, प्रायस्तावदेवमन्यथा सम्यग्दृष्टिरपि कश्चिद्

बध्नात्येव, कश्चिन्न बध्नातीत्यपि, सूक्ष्मसंपरायादिरिति । एतदुक्तं भवति पूर्वकर्म्मपरिणामादुत्तरकर्म्मारम्भः, यथा बीजादेवांकुरमूलपर्णादीनामिति । ज्ञानावरणीयमुत्कर्षप्राप्तं दर्शनावरणीयं प्रपद्यते, दृश्यन्ते च शून्यवादिकुवादिनः कुज्ञानवासिता विपरीतं पश्यन्त इति भावनीयं । शेषं सुगमं । यावत् 'जीवे णं बद्धस्से'त्यादि, नवरं 'वीरिओवग्गहिएहिं'ति जीववीर्योपगृही'तैरिति, तत्र जीवेण बद्धस्सेति रागद्वेषार्द्रत्वात् स्वामवस्थां प्रापितस्य, कर्म्मतया परिणतस्येत्यर्थः । 'पुट्ठस्स' आत्मप्रदेशैः सह श्लिष्टस्य । 'बद्धपासपुट्ठस्से'ति आवेष्टनपरिवेष्टनतया । संचितस्याबाधाकालातिक्रान्तस्योत्तरकालं निषक्तस्येत्यर्थः । चितस्य-बद्धस्य प्रदेशतया । उपचितस्य संक्रमणादिकरणायोग्यत्वेन व्यवस्थापितस्येत्यर्थः । इदानीं क्रमं दर्शयति-'आवागपत्तस्स'इत्यादि, आवागपत्तस्स प्रथमपाकाभिमुखं प्रथमं तत् कर्म्म, ततो विपाकः, ततः पाकफलनिष्पत्तिः, ततः स्वरूपाभिव्यक्तिरुदयः, अत्र त्रपुष्याः फलमुदाहरणं, यथा त्रपुषीफलस्य पुष्पदौर्हृदादि तत्सदृश आपाकः, आङ्शब्दः आदिकर्म्मणि यथा आरब्धमिति । तस्यैव यदा वृंतसंबद्धमेव नालं, काठिन्यश्यामादिगुणपरिणतं तत्सदृशो विपाकः । तदेव यदा आयत्तवृत्तादिना संस्थानविशेषेण परिणतं तत्सदृशं फलं । तदेव यदा तद्बीजकाठिन्यादिना पाकेन परिणतं तत्सदृशं उदयः । तत् पुनर्जीवेन कथं निबद्धमिति, तत आह-'जीवेण कयस्स' जीव उपयोगस्वाभाव्याद्रागादिपरिणत्या करोति, नान्यथा, किन्तु कर्म्मबन्धनबद्ध एव, तथाचोक्तं-"जीवस्तु कर्म्मबन्धनबद्धो वीरस्य भगवतः कर्ता । संतत्याऽनाद्यं च तदिष्टं कर्म्मात्मनः कर्तुं ॥ १ ॥"रिति । निर्वर्त्तितमिति, यदपि बन्धकालेऽविशिष्टज्ञानावरणीयादिकर्म्मयोगपुद्गलग्रहणं करोति तथाऽप्यनाभोगिकेन वीर्येण ज्ञानावरणादितया यद् व्यवस्थापनं तन्निर्वर्त्तितमित्युच्यते, रसादिसप्तधातुतया व्यवस्थापनं आहारस्येव । परिणामितमिति, विशेषप्रत्ययैः प्रद्वेषनिह्नवादिभिः बीजमिवाङ्कुरत्वेन । स्वयमुदीर्यते अतिप्रकर्षान्निरपेक्षं, परेणोदीर्यते यत् सापेक्षं । 'गतिं प्राप्य' नारकादिर्गतिः, तत्र असातोदयो यथा नारकाणां तीव्रो न तथा तिर्यगादीनां । 'स्थितिं प्राप्य', तत्रापि स्थितिप्रकर्षाः, 'भवं प्राप्य', यथा सत्यपि देवभवत्वे सामानिकत्वाभियोग्यत्वादिर्विशेषः, अयं परनिरपेक्ष उदयो गत्यादिः । 'पोग्गलं पप्प' पोग्गलपरिणामं च पप्प'त्ति, अयं सापेक्षः, तत्र

पुद्गलः–काष्ठलोष्टादिलक्षणः परिणामश्चाभ्यवहृतस्य वातादिलक्षण इति । तत्र निर्वचनं 'दसविह'मित्यादि, सोतावरणेत्यादि, श्रोत्रावरण इत्यनेन निर्वृत्युपकरणे द्रव्येन्द्रियं गृह्यते । तद्विज्ञानावरणा इति, लब्ध्युपयोगौ भावेन्द्रियं गृह्यते । एवं सर्वत्र । एकेन्द्रियाणां चतुर्णामावरणं, द्वीन्द्रियाणां त्रयाणामावरणं, त्रीन्द्रियाणां द्वयोः, चतुरिन्द्रियाणामेकस्य, निर्वृत्युपकरणेन्द्रिययोः प्राप्तयोरपि कुष्ठादिव्याधिभिरुपहतत्वात् तद्विज्ञानानुपलब्धिः, जात्यन्धजातिबधिरादीनां वा । 'जं वेदेति पोग्गले वा' वेदयतीति यदा सम्बन्धमुपयाति काष्ठादिना अभिघातजननसमर्थेन पुद्गलैर्वा, तदभिघातादिजनितेन मूर्च्छादिना तदा ज्ञानपरिणत्युपघातः । 'पोग्गलपरिणामं चे'ति, अत्र वेदयतीति आहारितस्य वातिकपैत्तिकश्लेष्मिकभोजनस्योत्तरकालं रसादिना परिणमितस्य वातादीनां धातूनामुदयात् ज्ञानपरिणत्युपघाताः । तथा 'विस्ससा वा पोग्गलपरिणाम'मिति विश्रसापरिणामं शीतोष्णातपादिकं प्राप्य, तत्सम्बन्धाच्चेन्द्रियोपघातस्तदुपघाताच्च ज्ञानपरिणत्युपघातः, 'जाणियव्वं ण जाणती'ति ज्ञातव्यमैन्द्रियकमपि सद्वस्तु ज्ञानपरिणतेः प्रतिहत्वान्न जानाति, अयं सापेक्षो विपाकः, निरपेक्षस्य तु अयं सूत्रालापः–तेसिं वा उदएणं' तेषामिति ज्ञानावरणीयादिकर्म्माणु-भावविशेषाणां । 'जाणितुकामे ण जाणति'त्ति, ज्ञानपरिणामेन परिणंतुमिच्छतो विज्ञानपरिणत्युपघातः । 'जाणित्तावि ण याणति'त्ति प्राक् ज्ञात्वापि पुनर्न जानीते तेषामेवोदयात्, तथा च अपरिणतिविपरिणत्योर्हेतुर्हि तदावरणमिष्टमिति । उक्तं च–"सापेक्षाणि च निरपेक्षाणि च कर्म्माणि फलविपाकेषु । सोपक्रमं च निरुपक्रमं च कष्टं यथाऽऽयुष्कं ॥ १ ॥" तत्र सापेक्षाणां वातिकपैत्तिकश्लेष्मिक-भोजनशीतोष्णवर्षवातादीनर्थानपेक्ष्य, न तु सुखदुःखक्रोधादिपरिणामः । 'उच्छन्नणाणी यावि भवति'त्ति, ज्ञानज्ञानिनोरभेदात् प्रच्छादितज्ञान्यपि भवति । शेषं सुगमं । यावन्निद्देत्यादि, तत्र निद्रादीनां स्वरूपं–"सुहपडिबोहो णिद्दा दुहपडिबोहा य निद्दनिद्दा य । पयला होति ठियस्स उ पयलपयला य चंकमओ ॥ १ ॥ थीणगिद्धी पुण अतिसंकिलिट्ठकम्माणुवेयणे होति । महणिद्दा दिण-चिंतियवावारपसाहणी पायं ॥ २ ॥" चक्षुर्दर्शनावरणं–चक्षुःसामान्योपयोगावरणमित्यर्थः, एवं शेषेष्वपि भावनीयं ।' जं वेयति पोग्गलं वा' मृदुशयनीयादि, 'पोग्गले वा' मृदुशयनीयगन्धरूपगंडोपधानादीन्, 'पोग्गलपरिणामं वा' माहिषदध्याद्यभ्यवहारपरिणाम-

मित्यर्थः, 'वीससा वा पोग्गलाणं परिणामं' वर्षास्वभ्रसंभृतनभोरूपं धारानिपातादिरूपं वा, 'तेसिं वा उदएणं' दर्शनावरणीय-कर्म्मानुभावविशेषाणां विपाकेन, 'पासियव्वं न पासतीत्यादि पूर्ववत्, नवरं दर्शनाभिलापः। शेषं सुगमं। यावत् 'मणुण्णा सद्दा' इत्यादि, तत्थ मणुण्णा आगंतुका वेणुवीणादिशब्दा गृह्यन्ते, आत्मीया अन्येके, एवं रूपादिष्वपि भावनीयं, इहैतज्जन्यसातावेद-नीयोदया तु भवइत्ति। मनोसुहता-सुखितं मनः, वइसुहता-आह्लादनीया वाक्, 'जं वेदेति पोग्गलं वा' स्रक्चन्दनादि, 'पोग्गले वा' बहुए तंबोलमादिए, 'पोग्गलपरिणामं वा' देशकालवयोऽवस्थानुरूपाहारपरिणामं, 'वीससा वा पोग्गलाणं परिणामं' कालेऽभिल-षितं शीतोष्णादिवेदनाप्रतीकाररूपं, 'तेसिं वा उदएणं' सातावेदनीयकर्म्मपुद्गलविशेषाणां विपाकेन, शेषं प्रकटार्थं यावत् 'वइ-दुहिया' नवरं प्रतिपक्षतो भावनीयं, 'वेदेति पोग्गलं वा' विषशस्त्रकंटकादि, 'पोग्गले वा ते चेव बहू 'पोग्गलपरिणामं वा' अपथ्याहारपरिणामं, वीससा वा पोग्गलाणं अकालेऽनिष्टशीतोष्णादिपरिणामं, 'तेसिं वा उदएणं' सातावेदणिज्जकम्मंसाणं विवागे-णंति। शेषमुत्तानार्थम्। यावत् 'सम्मत्तवेयणिज्जे' इत्यादि, सम्यक्त्ववेदनीयं नाम यदिह वेद्यमानं प्रशमादिपरिणामं करोतीति। मिथ्यात्ववेदनीयं तु विपरीतप्रशमादिपरिणामं। सम्यग्मिथ्यात्ववेदनीयं मिश्रं। कषायवेदनीयं क्रोधादिपरिणामं। नोकषायवेदनीयं हास्यादिपरिणाममिति। 'जं वेदेति पोग्गलं वा पोग्गले वा' पडिमा साहुमादीए, 'पोग्गलपरिणामं वा' देशाद्यनुरूपाहारपरिणामं कर्म्मपुद्गलविशेषोपादानसमर्थमिति भावार्थः, श्रूयते च लोके फलादिभक्षणपरिणामात् देहाधिक्यादि 'वीससा वा पोग्गलाणं परिणामं' अभ्रविकारादिलक्षणं, तथाच दृष्ट्वा भावयति-"आयुः सरिज्जलधरप्रतिमं नराणां, सम्पत्तयः कुसुमितद्रुमसारतुल्याः। स्वप्नोपभोगसदृशा विषयोपभोगाः, संकल्पमात्ररमणीयमिदं हि सर्वम् ॥ १ ॥" अन्यद्वा प्रशमादिपरिणामनिबन्धनमिति, 'तेसिं वा उदएण, मित्यादि, क्षुण्णार्थं यावत् परं णेरइयाउए इत्यादि. अत्र 'जं वेएति पोग्गलं वा' शस्त्राद्यायुष्कापवर्त्तनसमर्थं, 'पोग्गले वा बहुए पोग्गलपरिणामं वा' विषान्नादिपरिणामं 'वीससा वा पोग्गलाणं परिणामं' शीतादिकमेवायुरपवर्त्तनक्षमं, शेषं सूत्रसिद्धं यावत् 'इट्ठा सद्दा' इत्यादि एते चात्मीया एव परिगृह्यन्ते, नामकर्म्मविपाकित्वात्, तंत्रीस्वनाद्युत्पादिता इति चैके, न चेदमति-

शोभमन्यकर्म्मोदयनिर्वर्त्यत्वात् तेषामिति। इष्टा गतिर्मत्तवारणानुकारिणी, शिविकाद्यारोहणतश्चैके। इष्टा स्थितिः सहजा, सिंहासनादौ चान्ये। इष्टं लावण्यं छायाविशेषलक्षणं, कुंकुमाद्यनुलेपनजमपरे। 'इट्ठा जसो कित्ति'त्ति, अत्र यशःकीर्त्योरयं विशेषः "दानपुण्यफला कीर्तिः, पराक्रमकृतं यश" इति, 'इट्ठे उट्ठाणकम्मबलवीरियपुरिसक्कारपरक्कमे' तत्रोत्थानं-देहचेष्टाविशेषः, कर्म्म-आरेचनभ्रमणादि, बलं-शारीरसामर्थ्यविशेषः, वीर्यं तु जीवप्रभवः, पुरुषकारः-अभिमानविशेषः सचेष्ट एव, निष्पादितस्वविषयः पराक्रम इति। अन्ये तु व्याचक्षते-उट्ठाणं-डिंडिकादीनां त्रिपादारूढानां यन्नयनं, कर्म्म-हलादिसम्बन्धनं कृष्यादि, बलं-हलादिव्यायामजं शरीरं, पराभिभवजास्तु वीर्यपुरुषकारपराक्रमा इति, एतच्च नातीव संगतमुक्तन्यायादिति। 'इट्ठस्सरता' वल्लभस्वरता, तत्र इष्टा सदा इति सामान्योक्तावियं विशेषोक्तिस्तदन्यबहु(तम)सत्त्वापेक्षाऽवगन्तव्येति। 'कंतस्सरता' तत्र कान्ताः-कमनीयाः, सामान्यतोऽभिलषणीयाः इत्यर्थः 'पियस्सरता' भूयो भूयोऽभिलषणीयः प्रियः, 'मणुण्णस्सरता' तत्रोपरतवाचोऽपि प्रीतः श्रोतृस्मृतिजनको मनोज्ञः, 'जं वेदेति पोग्गलं वा' वीणावर्णकगन्धताम्बूलपट्टशिबिकासिंहासनकुंकुमदानगजयोगगुलिकादि, 'पोग्गलपरिणामं वा' ब्राह्मयाद्याहारपरिणामं, 'वीससा वा पोग्गलाणं परिणामं' शुभजलदादिकं 'तेसिं वा उदएण'मित्यादि सूत्रसिद्धं, एतदेव विपरीतमशुभस्य भावनीयमिति। गोत्रचिन्तायां 'जातिविसिट्ठते'त्यादि, तत्र जात्यादयः प्रकटार्थाः। 'जं वेदेति पोग्गलं वा' यतो बाह्यद्रव्यसम्बन्धान्नीचकुलोत्पन्नोऽपि राजादिविशिष्टपुरुषसंपरिग्रहाद्वा जात्यादिसंपन्न इव मान्यो भवति, बलमपि लकुटादिभ्रमणात्, रूपं प्रतिविशेषालंकारसम्बन्धात्, तपस्तु गिरिकूटाद्यारोहणेनातापनां कुर्वतः, श्रुतं तु मनोज्ञसुदेशसम्बन्धात्, 'पोग्गले वा' बहुए, 'पोग्गलपरिणामं वा' दिव्यफलाहारपरिणामं, 'वीससा पोग्गलाणं' आकस्मिकाभिहितजलदागमादिसंवादलक्षणा, 'तेसिं वा उदएण'मित्यादि, सूत्रसिद्धं। एतदेव विपरीतं नीचैर्गोत्रस्य। अन्तरायचिन्तायां 'दाणंतराय' इत्यादि, तत्र दानान्तरायं यदुदयात् सति विभवे सत्सु च पात्रेषु जानँश्च वस्त्वसारतां दत्तस्य फलविशेषान्नोत्सहते दातुमिति। लाभान्तरायं यदुदयात् सत्यर्थित्वे सति च प्रसिद्धे तद्द्रव्यसमन्विते दातरि याञ्चाकुशलो याचन्नपि न लभत इति। भोगान्तरायं यदुदयात् सति विशिष्टाहारादौ असति वैराग्यजे प्रत्याख्यानपरिणामे

कार्पण्यात् नोत्सहते भोक्तुमिति। उपभोगान्तरायं एवमेव भावनीयं, नवरं भोगोपभोगयोरयं विशेषः–सकृद् भुज्यत इति भोगः, पुनः पुनः भुज्यत इति उपभोग इति, उक्तं च–"सति भुज्जतित्ति भोगो सो पुण आहारपुप्फमाईओ। उवभोगो पुणो पुण उवभुज्जति वत्थविलयादी ॥ १ ॥" त्यादि। वीर्यान्तरायं यदुदयात् सति बलवति शरीरे विद्यमाने साध्ये–प्रयोजने हीनसत्त्वदोषान्न प्रवर्त्तेत इत्यादि। 'जं वेदेति पोग्गलं वा' प्रतिविशिष्टरत्नादिसम्बन्धात्तद्विषय एव दानान्तरायोदयः। सन्धिछेदनोपकरणसम्बन्धात् लाभान्तरायः। यत्कर्मोदयात् विशिष्टाहारादिसम्बन्धादन(र्घा)र्थार्थसम्बन्धाद् लोभतो वा भोगान्तरायकर्म्मोदयोऽपि भावनीयः। एवमुपभोगान्तरायकर्म्मोदयोऽपि भावनीयः। तथा बाह्यद्रव्याभिघाताद् वीर्योपघातदर्शनाद् वीर्यान्तराय इति। 'पोग्गले वा बहुए पोग्गलपरिणामं वा' तथाविधद्रव्याहारपरिणाममिति। वीससा पोग्गलाणं परिणामं' चित्रं शीतादिलक्षणं, तथा च शीताद्यभिभवादपि न दानादिभाव इति भावनीयं। 'तेसिं वा उदएण'मित्यादि, गतार्थं यावदुद्देशपरिसमाप्तेरिति। उक्तो ज्ञानावरणादीनामनुभावः, इदानीमुत्तरप्रकृतिविभाग उच्यते, तत्र विशेषपरिज्ञानार्थः प्रश्नः 'कति णं भंते!' इत्यादि, प्रश्ननिर्वचनसूत्रार्थः पूर्ववत्, तत्र शब्दादेरर्थस्य आभिमुख्येन नियतो–निश्चितो बोधः अभिनिबोधो स एवाभिनिबोधिकं तच्च तत् ज्ञानं च आभिनिबोधिकज्ञानं तस्यावरणमाभिनिबोधिकज्ञानावरणं। श्रृणोती'ति श्रुतं, तदेव ज्ञानं तस्यावरणं श्रुतज्ञानावरणं। अवधीयते तेनास्मिन्नित्यवधिः–मर्यादा यस्मात्तया द्रव्यक्षेत्रकालभावा परस्परनिबद्धा मर्यादया ज्ञायन्ते तस्मादवधिः, स एव ज्ञानं अवधिज्ञानं तस्यावरणं अवधिज्ञानावरणं, परि–सर्वतो भावे, अवनं–गमनं मनसि मनसो वा पर्यवाः, तेषां तेषु वा ज्ञानं मनःपर्यवज्ञानं तस्यावरणं मनःपर्यवज्ञानावरणं। केवलस्य–कृत्स्नस्य–सम्पूर्णस्य द्रव्यादेर्ज्ञेयस्य ज्ञानं केवलज्ञानं तस्यावरणं केवलज्ञानावरणं। दर्शनावरणीयं निद्रादि, तत्र निद्रापञ्चकं प्राप्ताया दर्शनलब्धेरुपघातं करोति, सुखावप्रबोधात्मिका निद्रा, दुःखप्रबोधात्मिका निद्रानिद्रा, तिष्ठतः प्रचला, चंक्रमतः प्रचलाप्रचला, स्त्यानर्द्धिः–उदयाद्वासुदेवार्द्धबलसदृशो भवति। चक्षुरिन्द्रियेण श्रुतज्ञानावरणीयं क्षयोपशमं नीत्वा सामान्यार्थावबोधः चक्षुर्दर्शनं, शेषैरिन्द्रियैर्मनसा च सामान्यार्थावबोधोऽचक्षुर्दर्शनं, अवधिज्ञानस्य सामान्यार्थावबोधः अवधिदर्शनं, केवलस्य

सामान्यार्थावबोधः केवलदर्शनमिति । वेद्यं सातमसातं वा यस्योदयात् शारीरं मानसं वा सुखं वेदयते तत् सातं, तद्विपरीतमसातं । मोहो द्विविधः–दर्शनमोहश्चारित्रमोहश्च, दर्शनमोहनीयं बन्धं प्रति एकविधं, सत्कर्मतया त्रिविधं–सम्यक्त्वं मिथ्यात्वं सम्यग्मिथ्यात्वमिति । चारित्रमोहनीयं–कषाया नोकषायाश्च, तत्र कषायाः षोडश संयोजनादयः, "संयोजयंति यन्नरमनन्तसंख्यैर्भवैः कषायास्ते । संयोजनताऽनन्तानुबंधिता चाप्यतस्तेषां ॥ १ ॥" इह सर्वप्रत्याख्यानं देशप्रत्याख्यानं वा न येषामुदये लभ्यते ते भवन्त्यप्रत्याख्यानिनः, सर्वनिषेधवचनोऽयं नञ् । आवृण्वन्ति प्रत्याख्यानं स्वल्पमपि येन जीवस्य तेन प्रत्याख्यानं न लभ्यत इति प्रत्याख्यानावरणाः । आह–न येषामुदये प्रत्याख्यानमस्तीति नञ् प्रतिषेधात् अप्रत्याख्यानाः, इहापि चावरणशब्दात् प्रत्याख्यानप्रतिषेध इति क एषां प्रतिविशेषः?, उच्यते, ननूक्तं तत्र नञ् सर्वनिषेधवचनत्वात् सर्वप्रत्याख्यानविघातिनस्ते, इह पुनराङ् मर्यादायां ईषदर्थे च वर्त्तत इति न सर्वनिषेधः, किं तर्हि? सर्वविरतेरेव निषेधो गम्यते, न देशविरतेरिति, तथा चोक्तं–"सर्वं प्रत्याख्यानं येनावृण्वन्ति तदभिलषतोऽपि । तेन प्रत्याख्यानावरणास्ते निर्विशेषोक्त्या ॥ १ ॥ तत्राङ् मर्यादायां तावद्विरतिप्रत्याख्यानावरणा न देशविरतेरिति, प्रत्याख्यानावरणाः, ईषदर्थेऽपि प्रत्याख्यानस्य ईषद् वरणाः प्रत्याख्यानावरणाः, यतो देशतः प्रत्याख्यानेऽपि नास्त्येव भूयसीनां विरतिरतस्तत् सम्बन्धिनीमीषद् विरता आवृण्वन्तीति तन्मात्रावरणाः । आह–किमेते विद्यमानमावृण्वन्ति प्रत्याख्यानमुताविद्यमानमिति?, उच्यते, नासतः खरविषाणस्येवावरणमस्तीत्यतो नाविद्यमानं, न च विद्यमानं अभव्यादीनामपि सविरमणप्रसंगात्, परिशेषात् प्रत्याख्यानपरिणतेरावरणाः प्रत्याख्यानावरणाः, परिणतिशब्दलोपात् । ईषत् परीषहादिसंपाते ज्वलनाः संज्वलनाः, संशब्दस्य ईषदर्थत्वात्, तथा च–"संज्वलयन्ति यतिं यत् संविग्नं सर्वपापविरतमपि । तस्मात् संज्वलना इत्यप्रशमकरा निरुच्यन्ते ॥ १ ॥" आद्यकषायत्रयविकल्पानुवर्त्तित्वान्नोकषायाः, यतः क्षीणेषु द्वादशसु तेषामभावः, ते च हास्यादयः, हास्योदयात् सनिमित्तमनिमित्तं वा हसति, शोकोदयात् परिदेवनादि, रतिः प्रीतिर्बाह्याभ्यन्तरेषु वस्तुषु, एतेष्वेव अप्रीतिररतिः, भयं–त्रासः चेतनाचेतनेषु वस्तुषु, व्यलीकता–जुगुप्सा, स्त्रियाः स्त्रीवेदोदयात् पुरुषाभिलाषः, पुंसश्च पुंवेदोदयात्

कयभिलाषः, नपुंसकस्य नपुंसकवेदोदयात् स्त्रीपुंसाभिलाषिता । आयुष्कं नारकादिचतुर्विधं। गतिनाम-गतिपर्यायेणात्मा गतिनामकर्म्मोदयात् आभिमुख्येन परिणतो गच्छतीति गतिः, सा चतुर्विधेत्यादि । समानजातीयं यत् सामान्यं सा जातिः, यथा एकेन्द्रियत्वं सर्व्वैकेन्द्रियाणां सामान्यं जातिः। एवं सर्वत्र । ननु च स्पर्शनेन्द्रियावरणक्षयोपशमसद्भावादेकेन्द्रियो भवति, नाम च औदयिको भावः, कथमेकेन्द्रियत्वं घटते?, सत्यमेतत्, तथापि यद्यस्य जातिनाम न स्यात्तत एकेन्द्रिय इति सञ्ज्ञां न लभते, तस्मात् सञ्ज्ञाकारणं यत् कर्म्म तन्नामेत्युच्यते, तच्चैकेन्द्रियजातिनामादि पंचविधं। शीर्यत इति शरीरं, तच्चौदारिकादि पंचविधं, तत्र उदारं-प्रधानं तीर्थकरगणधरशरीराणि प्रतीत्य, ओरालमपि च विस्तरालं विशालमिति, यस्मात् समधिकयोजनसहस्रप्रमाणं, ओरालमिति वा स्वल्पप्रदेशोपचितत्वाच्च भेण्डवत् तद्योग्यपुद्गलग्रहणकारणं यत् कर्म्म, तत् औदारिकशरीरनाम पुद्गलविपाकि । एवं सर्वत्र । विविधा विशिष्टा वा क्रिया विक्रिया। आह्रियते दयादिकारणानुद्दिश्य गृह्यत इत्यर्थः, कार्यपरिसमाप्तेश्च पुनर्मुच्यते याचितोपस्कारवत्। तेजोगुणोपेतद्रव्यसमर्थं तैजसमुष्णगुणं, तदेव यदोत्तरलब्धिरुत्पद्यते तदा निसृजति, गोशालवत्, यस्योत्तरगुणलब्धिर्नास्ति तस्याहारपाचनं। सर्वकर्म्माधारभूतं कार्मणं, यथा कुंडं वदरादीनां, सर्वकर्मप्रसवसमर्थं वा, यथा वीजमङ्कुरादीनां। पुद्गलरचनाविशेषः संघातः, तेषामेवौदारिकादियोग्यानां पुद्गलानां गृहीतानां यस्य कर्म्मण उदयात् शरीरं घनीभवति तत् संघातनाम पुद्गलविपाकि, तच्चौदारिकादिभेदेन पंचविधं । बध्यतेऽनेनेति बन्धनं, तत् पुनः सर्वात्मप्रदेशगृहीतानां गृह्यमाणानां च पुद्गलानां सम्बन्धजनकं अन्यशरीरपुद्गलैर्वा सह सम्बन्धो यस्य कर्म्मण उदयाद् भवति तत् बंधननामेत्युच्यते, विद्यते तत् कर्म्म यन्निमित्तं द्वयादिसंयोगापत्तिर्भवति, यथा काष्ठद्वयभेदैकत्वकरणे जतु कारणं, औदारिकादिशरीरभेदवत्तदपि पंचविधं । संस्थानमाकृतिः, तथैव गृहीतसंघातितदेहपुद्गलेषु संस्थितिविशेषो यस्य कर्म्मण उदयाद् भवति, तत् संस्थाननाम षड्विधं समचतुरस्रादि । मानोन्मानप्रमाणानि अनतिरिक्तान्यङ्गोपाङ्गानि च यस्मिन् शरीरसंस्थाने तत् संस्थानं समचतुरस्रं । नाभित उपरि सर्वावयवाः चतुरस्रलक्षणाविसंवादिनः अधस्तु तदनुरूपं न भवति तत् न्यग्रोधं । नाभितोऽधः सर्वावयवाः सम-

चतुरस्रलक्षणाविसंवादिनः, उपरि तु तदनुरूपं न भवति तत् साति(दि)। ग्रीवा हस्तपादौ च [आदि]लक्षणयुक्ताः, संक्षिप्तविकृतमध्यं कोष्ठं कुब्जलक्षणयुक्तं कोष्ठं ग्रीवाद्युपरि हस्तपादौ [वाद्य]लक्षणहीना वामनं। कुब्जमेतद्विपरीतं। हस्तपादाद्यवयवाः प्रायः प्रमाण-विसंवादिनस्तद् हुण्डमित्युच्यते। "तुल्लं वित्थरबहुलं उस्सेहबहुलं च मडहकोट्ठं च। हेट्ठिल्लकायमडहं सव्वत्थ असंठियं हुंडं ॥१॥" अंगानि-हस्तपादादीनि, उपाङ्गानि-अङ्गुल्यादीनि अङ्गोपाङ्गानि च श्रोत्रघ्राणादीनि यस्य कर्म्मण उदयान्निर्वर्त्यन्ते तदङ्गोपाङ्गनाम। मर्कटबन्धस्थानीयमुभयोः पार्श्वयोरस्थि नाराचं, ऋषभः-पट्टः, वज्रं-कीलिका, वज्रं च ऋषभश्च नाराचं च यत्रास्ति तद् वज्रर्षभ-नाराचं संहननं, मर्कटपट्टकीलिकारचनायुक्तः प्रथमोऽस्थिबन्धः, मर्कटकीलिकाभ्यो द्वितीयः, मर्कटसंयुक्तस्तृतीयः, मर्कटैकदेशबन्धेन द्वितीयपार्श्वे कीलिकासम्बन्धश्चतुर्थः अंगुलि(अस्थि)द्वयस्य युक्तस्य मध्ये कीलिकैव दत्ता कीलिकासंहननं, अस्थीनि चर्म्मणा निकाचितानि केवलमेवेति असंप्राप्तसम्बन्धं सेवार्त्तं, नित्यं परिशीलनामाकांक्षति स्नेहपानादि, एवंविधास्थिसंघातकारणं संहनननाम, औदारिकविशेषविषयमेव। वर्ण्णनाम-औदारिकवैक्रियादिषु शरीरेषु यस्योदयात् कृष्णादिवर्णनिर्वृत्तिर्भवतीति। गन्धनाम-तेष्वेव शरीरावयवेषु सुगन्धता दुर्गन्धता वा यस्य कर्मण उदयात्। रसनाम-तेष्वेव शरीरावयवेषु तिक्तादिरसविशेषः यस्योदयात् तत् रसनाम। तेष्वेवावयवेषु कक्खडादिस्पर्शविशेषो यदुदयात् तत् स्पर्शनामाष्टविधं। आणुपुव्वी-परिवाडी आकाशश्रेणीनां यदुदये गमनं जीवस्य भवति विग्रहगतौ तदानुपूर्वीनाम, नारकादिचतुर्विधं। शरीरसम्बन्धादगुरुलघु आत्मानं नामयति शरीरं न गुरू नापि लघ्वेति तदगुरुलघु। उपघातनाम-यदुदयात् उपहन्यते। पराघातनाम-यत् परान् आहंति। उच्छ्वासनाम-यदुदयादुच्छ्वास-निश्वासनिर्वृत्तिर्भवति। आतपनाम-पृथिवीकाये आदित्यमण्डलादौ। उद्योतनाम-अनुष्णः प्रकाशः खद्योतरत्नादिषु, न पुनरग्ने-स्तस्योष्णस्पर्शनामोदयादौष्ण्यं, रूपं च लोहितनामोदयात्। विहायोगतिश्चंक्रमणं, नारकादीनां यदुदयाद् विहायोगतिनाम, तद्द्विविधं प्रशस्ताप्रशस्तभेदात्, तत्र प्रशस्तं हंसगजवृषभादीनाम्, अप्रशस्तं तूष्ट्रादीनाम्। त्रसनाम-यदुदयाच्चलना स्पन्दनं च भवति। स्थावरनाम-यदुदयादस्पन्दो भवति। वादरं-स्थूलं यदुदयात् एकेन्द्रियकं शरीरं भवति। सूक्ष्मनाम-यदुदयादतीन्द्रियं शरीरं

भवति । पर्याप्तनाम-यदुदयादिन्द्रियादिनिष्पत्तिर्भवति । तद्विपरीतमपर्याप्तकं, प्रत्येकशरीरनाम-यदुदयादेको जीवः खल्वेकमेव शरीरं निवर्त्तयति । साधारणनाम-यदुदयाद् वहवो जीवाः खलु एकमेव शरीरं निवर्त्तयति । स्थिरनाम यदुदयाच्छरीरावयवस्थैर्यं शिरोऽस्थिदन्तानां भवति । अस्थिरनाम यदुदयादवयवानामेव मृदुता भवति कर्णजिह्वादीनां । शुभनाम यदुदयाच्छरीरावयवानां शुभता, यथा शिरसः, शिरसा स्पृष्टस्तुष्यति, पादादिरशुभस्तेन स्पृष्टो रुष्यति । सुभगनाम यदुदयात् कमनीयता । तद्विपरीतं दुर्भगनाम । सुस्वरनाम यदुदयात् सौस्वर्यं भवति, श्रोतॄणां श्रुत्वा यत्र प्रीतिरुत्पद्यते । तद्विपरीतं दुःस्वरनाम । आदेयनाम यदुदयात् यच्चेष्टते भाषते वा तत् सर्वं लोकः प्रमाणीकरोति । तद्विपरीतमनादेयं । यशःकीर्तिनाम यदुदयात् कीर्त्यते-संशब्द्यते गुणवानिति । तद्विपरीतमयशःकीर्त्तिनाम । निर्म्माणनाम यदुदयात् सर्वजीवानां जातौ अंगोपांगविशिष्टता भवति । तीर्थंकरनाम यदुदयात् सदेवमनुजासुरस्य लोकस्य पूज्यो भवति । गोत्रमुच्चैर्गोत्रं यदुदयादज्ञानी विरूपो निर्धनोऽपि सत्कुलमात्रादेव पूज्यते । नीचैर्गोत्रं-ज्ञानादिसम्पन्नोऽपि यदुदयान्निन्द्यते । दानान्तरायं-सति दातव्ये प्रतिग्राहके च दानफलं च विजानन् यदुदयात् नोत्सहते दातुं तद् दानान्तरायं । यत् सर्वकालं ददद‌पि अन्यस्य याचयतो नोत्सहते दातुं तत्तस्य लाभान्तरायिकोदयः । सकृत् भुज्यते इति भोगः-आहारमाल्यादिः, सति विभवे प्रतिविशिष्टं यदुदयान्न भुंक्ते तद्भोगान्तरायिकं । पुनः पुनः भुज्यत इत्युपभोगो-वस्त्रालंकारादि, यदुदयान्नोपभुंक्ते तदुपभोगान्तरायं । वीर्यं शक्तिः चेष्टा. निरुजो वयस्थाश्चाल्पवला यदुदयाद् भवन्ति तद् वीर्यान्तरायमिति । इदानीं मूलोत्तरप्रकृतीनामुत्कृष्टजघन्यस्थितिबन्धपरिज्ञानार्थं पृच्छति—'णाणावरणिज्जस्स णं भंते ! कम्मस्स केवइय' मित्यादि, प्रश्नः, निर्वचनं 'तीसं सागरोवमकोडीओ', इयता सिद्धे इदमपृष्टस्य व्याकरणं-'तिन्नि य वाससहस्साइं अवाहा, अवाहूणिया कम्मठिती कम्मनिसेगो' इति, किमर्थं ? उच्यते, स्थितिद्वैविध्यप्रदर्शयता वन्धकाले आत्मा अविशिष्टमेव कर्म्मपुद्गलोपादानं कृत्वा उत्तरकालं ज्ञानावरणीयादिकर्म्मणां स्वस्वावाधाकालं मुक्त्वा ज्ञानावरणीयादिप्रकृतिविभागतया अनाभोगिकेन वीर्येण उदयसहितं तद्दलीकं निषिंञ्चति, अतो द्विविधा स्थितिः कर्म्मत्वापादनमात्ररूपा

अनुभवमात्ररूपा च, यतः स्थितिरवस्थानं तेन भावेनाप्रच्यवनं, तत्र कर्मत्वापादानरूपामधिकृत्य तीसं सागरोवमकोडाकोडीओ, वर्षसहस्रत्रयोना उदयसहिता इति, जम्हा अग्गायणीयपुव्वे कम्मपगडीपाहुडे बन्धविहाणे ठितिबन्धाहिगारे "चत्तारि अणुयोगदाराणि, तं जहा-ठितिबंधठाणपरूवणा णिसेगपरूवणा अबाहाकंडपरूवणा अप्पाबहुयंति," तत उत्कृष्टमबाधाकंडकं उत्कृष्टं निषेककालं चेत्येतदप्युभयमप्युपदर्शितं भवति । इदानीमक्षरार्थो विवरिज्जति-'तिण्णि वाससहस्साइं अबाह'त्ति, एतदुक्तं भवति-बंधावलियाओ आरब्भ जाव तिन्नि वाससहस्साइं ताव कम्मं न बाधति नोदयं यातीत्यर्थः, ततो अणंतरसमये निसिंचति कम्मदलिकं, णिसेगो नाम णाणा-वरणिज्जादिकर्म्मपुद्गलरचनानुभवार्थं, तं च पढमसमए बहुगं णिसिंचति, वितियसमए विसेसहीणं, ततिये विसेसहीणंति; एवं जाव उक्कोसठितियं कम्मदलियं .ताव विसेसहीणं णिसिंचति, तथाचोक्तं-कम्मपगडीसंगहणीए-"मोत्तूण सगमबाहं पढमाए ठितीए बहुतरं दव्वं । एत्तो विसेसहीणं जावुक्कोसंति सव्वसिं ॥ १ ॥" अबाधा-अन्तरं, कस्य? कर्म्मण उदयस्य? ता एव अबाहूणिया बाधृ लोडने बाधयति बाधा कर्म्मण उदय इत्यर्थः, एतदुक्तं भवति उदयसहिया या स्थितिः सा अबाधाकालेण ऊणिया यथा कृता स्थितिः संबाध्यते, कर्म्मनिषेकश्च अबाधाकालेनैवोनः, दसण्हं सागरोवमकोडाकोडीणं वाससहस्सं अबाधा, एवं तेरासियकरणेणं सव्वकमाणं जा जस्स ठिती ता तस्स अबाहा उवउज्झिउण भाणियव्वा, सव्वजहण्णा अंतोमुहुत्तं अबाधा, जत्थ जत्थ सागरोवम सत्त भागा दोण्णि तिण्णि चत्तारि सत्त वा तत्थ इमा करणगाहा—"वग्गुकोस्सठितीणं मिच्छत्तुक्को-स्सएण जं लद्धं । सेसाणं तु जहण्णो पल्लासंखिज्जगेणूणे ॥ १ ॥" एतदुक्त भवति-वग्गुक्कस्सठितीणं आवरणदुगवेदणिज्जअंतराईयाणं मूलपगडीणं तीसं सागरोवमकोडाकोडीओ, तहा मिच्छत्तस्स सत्तरि, कसायवेयणिज्जस्स चत्तालीसं, नोकसायवेयणिज्जस्स वीसं, णामगोयाणं वीसं, एसा वग्गुक्कस्सठिती, एयाए वग्गुक्कस्सठितीए मिच्छत्तस्स उक्कोसियाए ठितीए सत्तरिसागरोवमकोडाकोडी-परिमाणाए तीसाए सत्तरीए चत्तालीसाए वीसाए य कोडाकोडीणं भागो हरिज्जति, तत्थ भागलद्धं तिण्णि सत्तभागा, सत्त सत्त-भागा, दोण्णि सत्तभागा, एते पलिओवमस्स असंखिज्जइभागेण ऊणगा जहण्णिया ठिती, जेसिं कम्माणं अंतोमुहुत्तं जहण्णिया

ठिती. जेसिं कम्माणं अंतोमुहुत्तं जहण्णिया ठिती णत्थि एगिंदियाणं एते चेव सत्तभागा पडिपुण्णा उक्कोसठितीव से जहण्णा
पलिओवमअसंखभागूणा, एते चेव सत्तभागा बेइंदियठितीबंधे पणुवीसाए गुणिज्जंति, तेइंदियठितिबंधे पण्णासाए गुणि-
ज्जंति, चउरिंदियठितीबन्धे सतेण गुणिज्जंति, असण्णिपंचिंदियठितीबन्धे सहस्सेण गुणिज्जंति पडिपुण्णा उक्कोसिया
ठितिया, पल्लअसंखियभागूणा जहण्णिया ठिती, सेसं कण्ठ्यं, नवरमत्र पूज्या व्याचक्षते–"अबाहा अबाहूणियत्ति अबा-
हाकालेणं बाधाकाले ऊणे कम्मठितीए"त्ति, एतदुक्तं भवति–कर्म्मनिषेक उदयसहितः, ततश्च त्रिंशत्सागरोपमकोटिकोट्यः परा
स्थितिरित्याद्यपि न विरुध्यते, यत एतावानेव कर्म्मनिषेकः खलु उदयसहित इति, जत्थ य दरिसणावरणिज्जादौ जहण्णठिती-
कालो वि बहु भणितो सो किल विसेसविसओ दट्ठवा, तत्तियकालोदयो य पुरिसकारेण परिहविज्जतित्ति भावनीयं, अतो न सा
देवे सुवणादिक्किरियत्ति, सामण्णेण पुण्णोदयो अत्थि चेव, जहा देसकालियादिविण्णाणखतोवसमतो मोसे, तत् सर्वमपि सेसेण
अज्जाणओत्ति वित्ति, वतिरेगा भावणा, 'एगिंदियाणं सम्मत्तवेयणिज्जस्स ण किंचि' बन्धन्ति तथाविधपरिणामाभावात्, आह–जदि
एवं कहं अणंतरभवे केइ सिज्झंति ? भण्णति, सिज्झमाणभवे वेयइत्ता चेव सिज्झंतित्ति न विरोधो, तथा च सम्मत्तवेयणिज्जस्स
जहण्णिया अंतोमुहुत्तिया चेव अबाधा भणियत्ति, कोहमाणमायालोभसंजलणाए य दोमासा इत्यत्रापि वत्ति(बन्ध)काल एव
विशिष्टोदयस्त्वन्यथैव, ततश्च पक्षं या स्थितिः प्रतिपादिता संज्वलनानां प्रदेशान्तरे सा न विरुध्यत इति, जत्थ आउस्स
जहण्णट्ठितीबंधसामिणिद्देसे आलावओ–'जे जीवे असंखिप्पद्धापविट्ठे' इति, जीवा सोवक्कमाउया णिरुवक्कमाउया य, तत्थ देव-
नारगा य छम्मासावसेसाउया परभवियाउयं बन्धंति, एवं तिरियमणुआवि असंखेज्जवासाउया जे पुण तिरियमणुआ संखिज्ज-
वासाउया निरुवक्कमा ते नियमा तिभागावसेसाउया परभवियाउयं बन्धंति, जे सोवक्कमाउया ते सिय तिभागसेसाउया जाव
'असंखिप्पद्धापविट्ठे'ण सक्कति संखिविउ तिभागादिणा । सव्वनिरुद्धे से आउए सेसत्ति, 'सव्वनिरुद्धे'त्ति आयुर्बन्धनिर्वर्त्तनमात्र एव
कालः न परतोऽस्ति जीवनकाल इत्यर्थः, 'सेसे'त्ति उपभुक्तशेषं, 'सव्वमहंतीए आउयबन्धद्धाए'त्ति, सव्वमहतो आउयबंधकालो,

जो जीवो अट्ठहिं आगरिसेहिं आउयं णिवत्तेति 'तीसे आउयबन्धद्धाए चरिमकालसमयंसि सव्वजहण्णियंसि त्ति, चरिमसमयकालगहणेण न परमणिरुद्धो समओ घिप्पति, किंतु एगागरिसस्सगहणकालो, जतो वक्कंतीए भणियं-'जीवे णं भंते! ठितिणामनिहत्ताउयं कतिहिं आगरिसेहिं पगरेइ? गोयमा! जहण्णेणं एक्केणं उक्कोसेणं अट्ठहिं आगरिसेहिं' उक्कोसिया ठितीत्ति वत्तिज्जतित्ति, तेणं सव्वत्थोवा जीवा अट्ठागरिसणिवत्तगा, सेसा सत्तहिं आरब्भ संखिज्जगुणा जाव एगागरिसणिवत्तगा संखिज्जगुणत्ति, ते य जहण्णठितिया तावता कालेण 'जहण्णियमि'ति ठिती संबज्झती, 'अपज्जत्तापज्जत्तियं णिवत्तेइ'त्ति, लद्धीए अपज्जत्तपज्जत्तओ सरीरिंदियपज्जत्तीणिवत्तणाजोग्गां ठितिं बन्धति'त्ति भणियं होति, जदि पुण सरीरिंदियपज्जत्तीए अपज्जत्तओ कालं करिज्जा तो दव्विंदियपज्जत्तीए अपज्जत्तयस्स एगिंदियादिववएसो ण पावति, ण य परभवियाउयं बन्धति, जेण ओरालियादीणं तिण्हं सरीराणं काययोगे वट्टमाणो, अण्णहा न होति ज्ञानावरणीयं, नारक उत्कृष्टस्थितिं पर्याप्तिगतः साकारोपयुक्तः, जागरे-जाग्रत् नारकाणामपि कियानपि निद्रानुभवो भवत्येव, शेषं कण्ठ्यं, यावत् 'कम्मभूमगपलिभागी वा,' तत्थ गब्भिणियाऽवहिता कम्मभूमिजातो जातिस्मरणादिना भावलिङ्गं पडिवज्जति, अण्णे अवहारेण कम्मभूमित्थं भण्णति, शेषं सूत्रसिद्धं यावत् पदान्त इति।

प्रज्ञापनाप्रदेशव्याख्यायां त्रयोविंशतितमपदव्याख्या समाप्तेति.

साम्प्रतं चतुर्विंशतितममारभ्यते, अस्य चायमभिसम्बन्धः-इहानन्तरपदे कर्म्मबन्धादिपरिणामविशेषश्चिन्तितः, वक्ष्यमाणेष्वपि चतुर्षु स एव विशेषतः क्वचित् कचित् चिन्त्यत इति, तत्र कर्म्मबन्धपदादिसूत्रं-'कति णं भंते!' इत्यादि, उपन्यासश्चास्य विशेषाभिधानार्थोऽदुष्ट एव, एवं शेषेष्वपि द्रष्टव्यं। तत्र सत्तविहबन्धए आउयवज्जं, अट्ठविहबन्धए सहाउणा, छव्विहबन्धए मोहाउयवज्जं सुहुमसंपराये, उक्तं च-"सत्तविहबन्धया होंति पाणिणो आउवज्जियाणं तु । तह सुहुमसंपराया छव्विहबन्धा

विणिदिट्ठा ॥ १ ॥ मोहाउयवज्जाणं पगडीणं ते उ बन्धया भणिया । उवसंतखीणमोहा केवलिणो एगविहबन्धा ॥ २ ॥" शेषं प्रकटार्थं यावत् वेदनीयचिन्तायां-एगविहबंधगा हवंति से य उवसंतकसायाइपत्ति। भणियं च-"उवसंतखीणमोहा केवलिणो एगविहबन्धा। ते पुण दुसमयठितीयस्स बन्धया ण पुण संपरायस्स ॥ १ ॥" इत्यादि, तत्थवि सायावेदणिज्जस्स, शेषमुत्तानार्थं यावत् पदसमाप्तेरिति ॥ चतुर्विंशतितमपदव्याख्या समाप्ता ॥

वेतपदे-जत्थ 'सत्तविहवेदए वा अट्ठविहवेदए वा चउव्विहवेदए वा' सत्तविहन्नेयओ सुहुमसंपराइओ उवसमगो वा खवगो वा, मोहणिज्जस्स उदओ तंमि वोच्छिज्जति तेण सत्त, अट्ठ सव्वाओ वेदंतस्स, चउव्विहवेदो(दगो) सजोगी केवली सातं वेपमाणो चत्तारि वेदणिज्जाउयणामगोयाणि चउ ॥ वेदपदं (समत्तं)। पञ्चविंशतितमपदव्याख्या समाप्ता ॥

वेदबन्धपदे-'जीवे णाणावरणिज्जं वेदेमाणे सत्तविहबन्धए' आउयवज्जाओ, अट्ठ संपुण्णाओ, 'छव्विहबन्धए' सेढिदुगपडिवण्णो सुहुमसंपरायो मोहाउयाणं अवन्धगोत्ति, 'एगविहबन्धए' खीणकसाओ सातावेदणिज्जस्स, शेषं उपयुज्य भंगाः कार्याः ॥ वेदबन्धपदं (समत्तं)। षड्विंशतितमपदव्याख्या समाप्ता ॥

वेदवेदपदे-'जीवे णाणावरणिज्जं वेदेमाणे सत्तविहवेदए,' सेढिदुगपडिवण्णो तस्स मोहस्स उदओ णत्थि तेण सत्त, संपुण्णाओ अट्ठ ॥ वेदवेदपदं (समत्तं) ॥

प्रज्ञापनाप्रदेशव्याख्यायां सप्तविंशतितमपदव्याख्या समाप्तेति ॥

साम्प्रतमष्टाविंशतितममारभ्यते, अस्य चायमभिसम्बन्धः-इहानन्तरपदे नारकादिगतिसमापन्नानां प्राणिनां कर्म्मवेदना-परिणाम उक्तः, इह तु परिणामविशेष एव आहारपरिणाम इत्यतः स एव निरूप्यते, इह चार्थसंग्रहगाथाः-"सचित्ताहारट्ठी

केवइ किं वावि सव्वओ चेव । कतिभागं सव्वे खलु परिणामे चेव बोद्धव्वे ॥ १ ॥ एगिंदियसरीरादी लोमाहारे तहेव मणभक्खी । एतेसिं तु पदाणं विभावणा होति कायव्वा ॥ २ ॥" 'नेरइयाणं भंते !' इत्यादि प्रकटार्थं यावत् 'आभोगणिव्वत्तिए य अणाभोगणिव्वत्तिए य, तत्र आभोगनमाभोगः उवयोगोऽभिसंधिरित्यर्थः, विपरीतस्त्वनाभोगः, तत्राभोगनिर्वर्त्तित आहारयामीतीच्छापूर्वं निर्मितः, अनाभोगनिर्वर्त्तितस्त्वाहारयामीति विशिष्टेच्छामन्तरेणापि प्रावृट्काले प्रचुरतरमूत्राद्यभिव्यक्त्यशीतपुद्गलाद्याहारवत्, तत्थ णं जे से अणाभोगनिवत्तिए से णं सततंत्ति तीव्रक्षुद्वेदनीयकर्म्मोदयादोजाहारादिना प्रकारेण 'अणुसमयं' समए समए । 'अविरहिए'त्ति चुक्कखलितन्यायादिविरहितः । अथवा प्रदीर्घकालोपभोग्याहारस्य सकृद्ग्रहणेऽप्यनुसमयं भवत्येव, अतः सातत्यग्रहणप्रतिपादनार्थमविरहित इत्याह 'आहारट्ठे समुप्पज्जति' आहारार्थः आहारप्रयोजनं द्रव्यभावयुक्तं प्रयोजकफलरूपमित्यर्थः, समुप्पज्जति भवतीत्यर्थः । 'तत्थ णं जे से आभोगनिव्वत्तिए से णं असंखिज्जसमइए अंतोमुहुत्तिए आहारट्ठे समुप्पज्जति', किमुक्तं भवति ? आहारयामीत्यभिलाषमात्राहारस्य द्रव्यपरिणामजनिततीव्रतरदुःखजननपुरस्सरमन्तर्मुहूर्त्तात् इति, शेषं प्रकटार्थं यावत् 'अण्णतरठितियाइ'ति जघन्यमध्यमोत्तम (स्थितिकानि) स्थितिरिति च–आहारयोग्यस्कन्धपरिणामत्वेनावस्थानं, 'ठाणमग्गणं पडुच्च'त्ति तिष्ठत्यस्मिन्निति स्थानं–सामान्यं [याव] एकवर्णं द्विवर्णमित्यादि, विधानं पुनर्विशेषो नीलादि । 'पुट्ठाणि'त्ति आत्मप्रदेशसंस्पर्शनमात्रं, तत् पुनरात्मप्रदेशावगाहक्षेत्राद् वहिरपि भवति । 'अवगाढानी'ति-आत्मप्रदेशैः सहैकक्षेत्रावगाढानीत्यर्थः । 'अनन्तरावगाढानी'ति आत्मप्रदेशानन्तरस्थानि, नैकादिव्यवहितानि । आद्यपीति, आभोगनिर्वर्त्तितस्य आहारस्यान्तर्मौहूर्त्तिकस्य आदिमध्यावसानेषु सर्वत्राहारयन्ति 'सविसए'ति स एव स्पृष्टावगाढानन्तरावगढाख्यः तस्मिन् स्वविषये आहरयंति । अणुबादरत्वं अपेक्षया तेषामाहारयोग्यानां स्कन्धानां प्रदेशवृद्ध्या वर्द्धितानामुभयमाहारयंति । आनुपूर्वी, यथासन्नं नातिक्रम्य, उर्ध्वमधस्तिर्यक् चेति, दिसि 'नियमा छद्दिसि'त्ति 'ओसण्णकारणं पडुच्च'त्ति वाहुल्यकारणं प्रतीत्य अशुभभाव एव तत् कारणमिति, तथापि प्रायो मिथ्यादृष्टयः कृष्णादीनि आहारयंति, न तु भविष्यत्तीर्थंकरादयः । तेसिं पोराण

वण्णादिगुणे विपरिणामादीणि एगट्ठियाणि विनाशार्थं प्रतिपादितानि। 'सव्वप्पणयाए'त्ति सर्वात्मप्रदेशैः, शेषं प्रकटार्थं यावत् 'णेरइयाणं भंते! जे पोग्गले आहारत्ताए गेण्हंति, तेसिं पोग्गलाणं सेयं' एष्यत्काले ग्रहणकालोत्तरकालमित्यर्थः, 'कतिभागमाहारयंती'त्यादिप्रश्ने, उत्तरं-गोयमा! असंखिज्जइभागमाहारयंतीति, अत्र केचिद् व्याचक्षते-गवादिप्रथमबृहद्ग्रासग्रहण इवान्ये पतन्ति। अन्ये त्वाचक्षते-ऋजुसूत्रनयदर्शनात् स्वशरीरतया परिणतानामसंख्येयभागमाहारयंति। अन्ये पुनरित्थमभिदधति असंखिज्जइभागमाहारेंतित्ति, शेषास्तु कीट्टीभूय मनुष्याभ्यवहृताहारवन्मलीभवंति, न शरीरत्वेन परिणमन्तीत्यर्थः। 'अणंतभागं आसाएंति गृहीतानां च पश्चादनन्तभागमास्वादयन्ति, वितियप्रश्नसूत्रनिर्वचने तु सर्वं आहारयन्तीत्यत्र विशिष्टग्रहणगृहीता आहारपरिणामयोग्या एव गृह्यन्ते, उज्झितशेषा इत्यर्थः, अन्यथा पूर्वापरविरोधाद्, उक्तं च-"जह (जं) जह सुत्ते भणियं तहेव तं जइ वियालणा णत्थि। किं कालियाणुयोगो दिट्ठो दिट्ठिप्पहाणेहि ॥ १ ॥" 'कीसत्ताए'त्ति केन प्रकारेण किं रूपतयेत्यर्थः। अणिट्ठादीणि एगट्ठियाणि। 'अभिज्झित्ताए'त्ति अभिध्या-अभिलाषः, अतृप्तत्वात् पुनः पुनरप्यभिलाषत्वेन इत्यर्थः अश्रुतेनेति चान्ये, 'अहत्ताए'त्ति गुरुपरिणामतया, 'णो उड्डत्ताए'त्ति णो लघुपरिणामतया, शेषं प्रकटार्थं यावदसुरकुमाराधिकारान्तः, णवरं चउत्थभत्तस्स दशवर्षसहस्रायुषां तु सागरोपमायुषां वर्षसहस्रात्, अभ्यधिके अभ्यधिकं, एवं सर्वत्र देवानां पल्योपमासंख्येयभागायुषां तदधिकायुषां च दिवसपृथक्त्वमवसेयमिति। पृथिवीकायचिंतायां णिव्वाघाएणं णियमा छद्दिसिं णिव्वाघातो लोगमज्झे, वाघातो लोगंते वि ठियस्स भावात्। प्राकृते च शेषं प्रकटार्थं यावत् 'फासिंदियवेमातत्ताए'त्ति विषमा मात्रा विमात्रा इष्टानिष्टनानाभेदतया, न तु यथा नारकाणामशुभतया सुराणां शुभतया चेति, शेषं निगदसिद्धं यावल्लोमाहारपक्खेवाहारे यत्ति, तत्र लोमाहारः खल्वोघतो वर्षादिषु यः पुद्गलप्रवेशो मूत्रादिगम्य इति, प्रक्षेपाहारस्तु कावलिकः, तत्र प्रक्षेपाहारे बहून्यस्पृष्टानि अन्तर्बहिश्च द्रव्याणि विध्वस्यन्ते स्थौल्यसौक्ष्म्याभ्यां, शेषं सुगमं यावत् पञ्चेन्द्रियतिर्यगधिकारे-उक्कोसेण छट्ठभत्तस्सत्ति, देवकुरुउत्तरकुरुसु। मणुस्साधिकारे-अट्ठमभत्तस्सत्ति, तासु चेव, वेमाणियाहिकारे-'तेत्तीसाए वाससहस्साणं'त्ति अणुत्तरसुराणं, शेषं सुगमं यावत् 'पुव्वभावपण्णवणं पडुच्चे'त्यादि, तत्र पूर्वभाव-

प्रज्ञापना भूतपूर्वगतिरभिधीयते, 'पडुप्पण्णपण्णवणं पडुच्च नियमा पंचिंदियसरीराइं' तत्र प्रत्युत्पन्नयंति यदा परिणामयंति शरीरतया तदा तज्जीवावयवा एव भवन्तीत्यर्थः, शेषं सुगमं यावदुद्देशकपरिसमाप्तेः, नवरं अयमोजाहारादिविभागः "सरीरेणोजाहारो तयाय फासेण लोमआहारो। पक्खेवाहारो पुण कावलिओ होति नायव्वो ॥ १ ॥ ओयाहारा जीवा सव्वेऽपज्जत्तया मुणेयव्वा। पज्जत्तगा य लोमे पक्खेवे होंति भइयव्वा ॥ २ ॥ एगिंदियदेवाणं णेरइयाणं च णत्थि पक्खेवो। सेसाणं जीवाणं संसारत्थाण पक्खेवो ॥ ३ ॥ लोमाहारा एगिंदिया उ नेरइय सुरगणा चेव। सेसाणं आहारो लोमपक्खेवओ चेव ॥ ३ ॥ ओयाहारा मणभक्खिणो य सव्वेवि सुरगणा होंति। सेसा हवंति जीवा लोमाहारे मुणेयव्वा ॥ ४ ॥" देवाणं पज्जत्तापज्जत्ताणं अणाभोगणिव्वत्तिओ ओयाहारो, पज्जत्ताणं पुण आभोगणिव्वत्तिओ मणोभक्खणोत्ति, सेसाणं लोमाहारो अणाभोगनिव्वत्तिओ, णेरइयाणं ओयाहारोत्ति, अलमतिप्रसङ्गेन ॥ इदानीं द्वितीयोद्देशकः, तस्य चामी खल्वर्थाधिकाराः—"आहारभविय सण्णी लेसा दिट्ठी य संजय कसाए। णाणे जोगुवयोगे वेदे य सरीरपज्जत्ती ॥ १ ॥" 'जीवे णं भंते!' इत्यादिप्रश्नसूत्रस्य निर्वचनं 'सिय आहारए सिय अणाहारए'त्ति कहं? एत्थ विग्गहसमुग्घाय सेलेसिए सिद्धे य अणाहारए सेसावत्थासु आहारएत्ति कट्टु, उक्तं च—"विग्गहगतिमावण्णा केवलिणो समोहता अजोगी य। सिद्धा य अणाहारा सेसा आहारगा जीवा ॥ १ ॥" 'जीवा आहारगावि अणाहारगावि', जेण सुहुमनिगोदाणं असंखिज्जइभागो सदाकालं विग्गहे वट्टति, तेण अणाहारगेसु वि बहुवयणं, कहं? जे णेरइया सव्वेवि ताव होज्जा आहारगा, उपपातविरहभावात्। 'अहवा आहारगा य अणाहारग'त्ति, एगवयणं, कहं? जेण निरयगतीए बारस मुहुत्ता उक्कोसओ उववायविरहकालो भणितो, उववायविग्गहे य कदावि एक्को चेव हवेज्जा अतो एगवयणंति। अणाहारगा पुण जेण विग्गहे कताइ दो तिन्नि संखेज्जा असंखिज्जा वा होज्जत्ति। जोइसियवेमाणिया असण्णित्ति न पुच्छिज्जंति, जेण तेसु असन्निदेवत्तं णत्थि, भवसिद्धिओ—भव्यः, अभवसिद्धिओ—अभव्यः, उभयप्रतिषेधवर्त्यपि सिद्ध एव, संज्ञी अनाहारक एव विग्रहगतः, संज्ञ्यायुष्कवेदनाच्च संज्ञ्येव लभ्यते, असंज्ञी द्वीन्द्रियादिः, बहुवयणपुच्छाए आहारगावि अणाहारगावि कहं? सामान्येनासंज्ञिग्रहणात् तंमि चानाहारकाणामपि भेदबहुत्वात्, उभय-

प्रतिषेधवर्त्ती भवस्थकेवली समुद्घाताद्यवस्थासु भावनीयः। संजते जीवे य मणुस्से य तियभंगो, सव्वेवि ताव होज्जा आहारगा, अहवा आहारगा य अणाहारगे य, एग केवलिसमोहए सेलेसिगते य भवति, एते चेव बहुगा। संजतासंजता तिसुवि ठाणेसु एगत्तेण वि पुहत्तेण वि आहारगा चेव भवंति, भवान्तरगतौ केवलिसमुद्घाताद्यवस्थासु च देशविरतिपरिणामाभावात्। कोहकसायादीसु नवरं देवेसु छ भंगत्ति, एत्थ माणादिविसुद्धदए कोहो न विक्खिज्जति, एवं सेसेसु वि। 'ओहिणाणी पञ्चिंदियतिरिक्खजोणिया आहारगा नो आहारग'त्ति अत्र गुरवो व्याचक्षते–नाप्रतिपतितावधिस्तिर्यक्ष्वेवोत्पद्यते (देवो) मनुष्यो वेति। एवं विभंगचिन्तायामपि भावनीयं, आह–उक्तमेवावधिदर्शनस्थितिनिरूपणायां दो छावट्ठीओ ठितित्ति, तत्थ नेरइयो अपरिवडियविभंगो गच्छति तिरिएसुत्ति वक्खाणितं कहं? भण्णति–एगायरियमएण सो नियमा अविग्गहेणेव गच्छतित्ति नो अणाहारए भवतित्ति दरिसियं, अन्नहा चिय तत्थ वक्खाणियं चेव। मणपज्जवणाणी आहारगा चेव, अपरिवडिए मरणाभावात्, शेषं सुगमं, यावत् 'ओरालियसरीरी जीवमणुस्सेसु तियभंगो' समोहतेतर सजोगिकेवलिणो पडुच्च। सगलपज्जत्तीसुत्ति एए चेव घेप्पंति, आहारपज्जत्तीए अपज्जत्तए पढमे समए चेव आहारेति, तेण इक्कसमइओ चेव आहारपज्जत्तीकालो, जेण बितियादिसमएसु सव्वत्थ आहारओ, सरीरपज्जत्तीए अपज्जत्तए सिय आहारए सिय अणाहारएत्ति, विग्गहे अणाहारए विग्गहे चेव सरीरपज्जत्तीए अपज्जत्तओ अणाहारओ, ततो पच्छा उववायखित्तं पत्तो जाव सरीरपज्जत्तिं ण जणेति ताव आहारओ चेव लब्भति, एवं इंदियआणापाणुभासमणपज्जत्तीए सिय आहारए सिय अणाहारए, सव्वत्थ विग्गहे चेव अणाहारए लब्भति, ततो उववायखित्तं पत्तो सव्वपज्जत्तीणं अपज्जत्तओ आहारओ चेव भवति, 'उवरिल्लासु चउसु अपज्जत्तीसु नेरइयदेवमणूसेसु छ भंगा,' आहारगा य आहारगा अणाहारए य अणाहारगा आहारए य अणाहारए य, चउभंगो य कथं? यस्मात् चउसु अपज्जत्तगा कयाइ ण होइ वि जे य अत्थि देवा ते आहारादिपज्जत्ती पज्जत्तगत्ति नाधियंते ततश्च ते यदा भवन्ति तदा सर्वे आहारका वा अनाहारका वा, विग्रहेऽपि ते ताभिः पर्याप्तिभिरपर्याप्ता एव, चतुर्भङ्गकेषु सुगमः, 'अवसेसाणं' विगलिंदियाणं 'जीवेगिंदियवज्जो तिय-

भंगो' 'भासामणपज्जत्तएसु जीवेसु पंचिंदियतिरिक्खजोणीएसु य तियभंगो,' एत्थ जीवा वि त एते चेव जेण सम्मुच्छिमा आहारगा अणाहारंते य अणाहारए य, 'नेरइयदेवमणुएसु छ भंगा' विवक्षिते काले चरमपर्याप्त्यपर्याप्तकाभावात्, ततश्च भावनाऽत्र प्राग्वद् यदा भवन्ति तदा सर्वे आहारका वा अथवा आहारकाश्च अनाहारकाश्च, शेषं सूत्रसिद्धं यावत्। अत्र अधिकृतार्थभावनार्थमेवैता गाथाः प्रतिपादिताः, तद्यथा–"सिद्धेगेंदियसहिया, जेहिं तु जीवा अभंगयं तत्थ। सिद्धेगेंदियवज्जेहि होति जीवेहि तियभंगो ॥ १ ॥ असण्णीसु य णेरइयदेवमणुएसु होंति छब्भंगा। पुढविदगतरुगणेसु य छब्भंगा तेउलेसाए ॥ २ ॥" जेण तेसु भवणवतिवाणमंतरजोइसियविमाणसोहम्मीसाणया देवा उववज्जंति तेण तेउलेसा लब्भति, "कोहे माणे माया, छब्भंगा सुरगणेसु सव्वेसुं। माणे माया लोभे, नेरइएहिंपि छब्भंगा ॥ ३ ॥ आभिणिबोहियणाणे सुयणाणे खलु तहेव संमत्ते। छब्भंगा खलु नियमा, बियतियचउरिंदिएसु भवे ॥ ४ ॥ उवरिल्लं अपज्जत्तीसु, चउसु नेरइयदेवमणुएसु। छब्भंगा खलु नियमा, वज्जा पढमा अपज्जत्ती ॥ ५ ॥ सण्णी विसुद्धलेस्सा, संजय हेट्ठिल्लतिसु य णाणेसु। थीपुरिसाण य वेदेवि छब्भंग अवेयतिभंगो ॥ ६ ॥ सम्मामिच्छामणवति मणणाणे बालपंडिय विउव्वी। आहारसरीरम्मि उ, णियमा आहारया होंति ॥ ७ ॥ ओहिंमि विभंगंमिवि, नियमा आहारया उ नायव्वा। पंचिंदिया तिरिच्छा, मणुया पुण होंति विब्भंगे ॥ ८ ॥ ओरालसरीरम्मि, पज्जत्तीणं च पंचसु तहेव। तियभंगो जीवमणुएसु, होंति आहारया सेसा ॥ ९ ॥ नो भवऽभविय अलेसा, अज्जोगिणो तहय होंति असरीरा। पढमाए पज्जत्तीए, ते तु नियमा अणाहारा ॥ १० ॥ सण्णासण्णविउत्ता, अवेद अकसाइणो य केवलिणो। तियभंगं एकवयणे, सिद्धा णाहारया होंति ॥ ११ ॥"

प्रज्ञापनाप्रदेशव्याख्यायामष्टाविंशतितमपदव्याख्या समाप्ता ॥

साम्प्रतमेकोनत्रिंशत्तममारभ्यते, अस्य चायमभिसम्बन्धः–इहानन्तरपदे गतिपरिणामविशेष एवाहारपरिणाम उक्तः, इह तु ज्ञानपरिणामविशेषा उपयोगाः प्रतिपाद्या इति। इह च 'कतिविहे णं भंते उवयोगे' इत्यादि सूत्रं, तत्र 'युज समाधौ' वित्यस्य

उपयोजनमुपयोगः, उपयुज्यतेऽनेनास्मिन् वेत्युपयोगः। आयोगः सद्भावः परिणाम इत्यनर्थान्तरं। स द्विविधः-साकारोऽनाकारश्च, सह आकारेण साकारः, आकारो भेदः पर्याय इत्यनर्थान्तरं, एतदुक्तं भवति-सचे ते अचेतने वा वस्तुनि उपयुज्यमान आत्मा सपर्यायमेव वस्तु यदा परिच्छिनत्ति, स साकारोपयोग उच्यते, अन्तर्मुहूर्त्तकालं। ारोपयोगस्तु वस्तुनः सामान्यमात्रावबोधात्मकः स्कन्धावारोपयोगवत्, असावप्यन्तर्मुहूर्त्तमेव, अनाकारोपयोगकालात् साक ालः संख्येयगुणः, तयोश्च भेदाः कण्ठ्याः।

प्रज्ञापनाप्रदेशव्याख्यायामेकोनत्रिंशत्तम समाप्तं ॥

साम्प्रतं त्रिंशत्तममारभ्यते, अस्य चायमभिसम्बन्धः-इहानन्तरपदे विशेष उपयोगः प्रतिपादितः, इहापि ज्ञानपरिणामविशेष एव पश्यत्ता चिन्त्यते इति। इह चेदमादिसूत्रं-'कतिवि दं, तत्र 'दृशिरूत्प्रेक्षणे' अस्य वर्त्तमानकालाभिधायिनो 'लटः' शत्रादेशे कृते 'दृशेः पश्ये'ति च पश्यादेशे कृ सैव प्राकृते पासणता। अत्र च पासणयाशब्दः साकारानाकारबोधाभिधायकः उपयोगशब्दवत्। तथा च प्रश्नोत्तरे णं भंते! उवओगे पन्नत्ते?, गोयमा! दुविहे पण्णत्ते, तं जहा-सागारोवओगे य अणागारोवओगे य' एवं पासणयावि णागारभेदा। आह-तुल्ये साकाराऽनाकारभेदत्वे कोऽनयोः प्रतिविशेषः? उच्यते-साकारोपयोगोऽष्टभेद उक्तः, साकारपा छव्विहा। अथ किमिति मतिज्ञानमत्यज्ञानयोर्नोक्ता? उच्यते-यस्मादुक्तम्-"उत्पन्नाविनष्टार्थग्राहकं साम्प्रतकालविषयं ालं, श्रुतज्ञानं तु त्रिकालविषयमुत्पन्नविनष्टानुत्पन्नार्थग्राहकमिति (तत्त्वार्थभाष्यं पृ. १०)", अतो यत्र त्रैकालिकोऽवबोधोऽस्ति तत्र पासणया भवति, यत्र पुनर्वर्तमानकालस्त्रैकालिकश्च बोधः स उपयोग इत्ययं विशेषः, तथा चोक्तं-"पुव्वभणियं तु जं भण्णती पुणो तत्थ कारणं अत्थि। पडिसेहोऽणुण्णा कारणविसेसोवलंभो वा ॥ १ ॥" इह चायं विशेष उक्तः, इतरथा हि उपयोगेनैव गतार्थत्वात् किमिति पासणयाप्रश्नेनेति। 'दृशिरुत्प्रेक्षणे' इति च धात्वर्थः प्रेक्षणं-प्रकर्षेण ईक्षणं प्रेक्षणं, तच्च प्रदीर्घकाले सति भवति, नैकक्षणवर्त्तिनीति। तहा अणागारपासणया चक्खुदंसणस्स भणिता, अचक्खुदंसणस्स पडिसिद्धा, कीस? उच्यते-जम्हा भणियं इंदियपदे "उवओगद्धाअप्पाबहुत्ते सव्वत्थोवा चर्विखदियस्स अपज्जत्तिया

उक्कोसा य उवओगद्धा, ततो सोइंदियघाणिंदियजिब्भिंदियफासिंदियाणं जहक्कमं विसेसाहिया" भणिता, अतश्चक्षुषा प्रेक्षणमस्ति, न शेषाणामिति, चक्षुर्दर्शनवर्ज्यमचक्षुर्दर्शनं, शेषेन्द्रियाणां मनसश्च यत्सामान्यग्रहणं तदचक्षुर्दर्शनं, ततः किमिति नोक्तं मनोऽधिकृत्य अचक्षुर्दर्शनपासणया ? उच्यते, यस्मात् यो मनोद्रव्योपादानसमयात् प्रभृत्यर्थावबोधः स एवार्थावग्रहेहापायकाले प्रतिसमयमेव भवति, तत्र योऽर्थावग्रहकाले सामान्यावबोधः सोऽचक्षुर्दर्शनाख्येनानाकारोपयोगेन गृहीतः, यस्त्वपायधारणाकाले स साकारोपयोगेन श्रुताख्येन गृहीत इति, अत उपयोगस्यैव पर्यायशब्दः पासणता इति। गुरवस्तु व्याचक्षते–"साकारपासणता श्रुतज्ञानादिषु अवबोधविशेषः, अणागारपासणता साक्षात्करणमात्रं," चक्षुषा यथाऽक्षराणि पश्यतः संविदुपजायते तत्राक्षरसाक्षात्कारश्चक्षुषा पश्यत्ता, तद्भेदाः कण्ठ्याः। जाव 'केवली णं भंते ! रयणप्पभ'मित्यादि, तत्र 'आगारेहिं'ति आकारभेदाः, यथा रत्नप्रभा त्रिकाण्डा खरपंकाब्बहुलकाण्डाख्या, खरकाण्डमपि षोडशभेदं रत्नवज्रवैडूर्यादिभेदं। 'हेतूहिं'ति कारणेहिं, यथा केन कारणेन रत्नप्रभेति ? उच्यते, यस्मादस्या रत्नमयं प्रथमं काण्डमिति। 'उपमाहिं'ति, 'मा माने,' उपमानमुपमा, उपमीयत इति वा उपमा, यथा रत्नप्रभायाः, रत्नादीनि काण्डानि वर्णादिविभागेन कीदृशानि ? पद्मरागेन्द्रनीलादिसदृशानीति। 'दिट्ठंतेहिं'ति स्वगतभेदानुगमनेन शर्कराप्रभादिभेदव्यतिरेकेण च, यथा घटोऽन्वयव्यतिरेकवान् तथा रत्नप्रभाऽपीति। 'वण्णेहिं'ति, शुक्लादिवर्णविभागेन, तेषामेव चोत्कर्षापकर्षसंख्येयासंख्येयानन्तगुणविभागेन, तथैव गन्धरसस्पर्शविभागेन। 'संठाणेहिं'ति, यानि तस्यां भवननारकादीनां संस्थानानि, यथोक्तं "ते णं भवणा वट्टा अंतो चउरंसा अहे पोक्खरकण्णियासंठाणसंठिया" इति। तथा "ते णं णरया अंतो वट्टा बाहिं चउरंसा अहे खुरप्पसंठाणसंठिता" इति। 'पमाणेहिं'ति, जह "असीउत्तरजोयण(सय)सहस्सबाहल्ला रज्जुप्पमाणमित्ता आयामविक्खंभेणं"ति। 'पडोयारेहिं'ति, यस्तस्याः परिवारो घनोदधिघनवलयादिः, शेषं कण्ठ्यं।

प्रज्ञापनाप्रदेशव्याख्यायां त्रिंशत्तमपदव्याख्या समाप्ता ॥

साम्प्रतमेकत्रिंशत्तमपदव्याख्या समारभ्यते, अस्य चायमभिसम्बन्धः–इहानन्तरपदे ज्ञानपरिणामविशेषः प्रतिपादितः, इह तु परिणामसाम्याद्गतिपरिणामविशेष एव संज्ञापरिणामः प्रतिपाद्यत इति। इह चैवमादिसूत्रम्–'जीवा णं भंते सण्णी'त्यादि, तत्र संज्ञीति संज्ञायते अनया पूर्वोपलब्धो भूतभविष्यद्वर्त्तमानोऽर्थः स शब्दादिरिति संज्ञा, सा च मनोवृत्तिः, असौ यस्यास्ति स संज्ञी, समनस्क इत्यर्थः। तद्विपरीतस्तु असंज्ञी, केवलं वर्त्तमान एवार्थे शब्दादौ शब्दादिसंज्ञानं अमनस्क इत्यर्थः, उभयप्रतिषेधितः केवली सिद्धो वेति। केवलिनि मनोवृत्तेरभावात् सिद्धे च शरीरमनसोरभावात् प्रतिषेधितः, शेषं कण्ठ्यं॥

प्रज्ञापनाप्रदेशव्याख्यायामेकत्रिंशत्तमपदव्याख्या समाप्ता॥

साम्प्रतं द्वात्रिंशत्तममारभ्यते, अस्य चायमभिसम्बन्धः–इहानन्तरपदे संज्ञापरिणामः प्रतिपादितः, इह तु चारित्रपरिणामविशेषः संयमः प्रतिपाद्यते। इह चेदमादिसूत्रं 'जीवाण'मित्यादि, तत्र हिंसादिनिवृत्तः संयतः, तद्विपरीतस्तु असंयतः, हिंसादीनां देशनिवृत्तः संयतासंयत इति, त्रितयप्रतिषेधितः सिद्धः, यस्मात् संयतादिपर्याया योगाश्रयाः तस्मात् योगाभावात् सिद्धः त्रितयप्रतिषेधित इति॥

प्रज्ञापनाप्रदेशव्याख्यायां द्वात्रिंशत्तमपदव्याख्या समाप्ता॥

साम्प्रतं त्रयस्त्रिंशत्तममारभ्यते, अस्य चायमभिसम्बन्धः–इहानन्तरपदे चारित्रपरिणामविशेषः संयमः प्रतिपादितः, इह तु ज्ञानपरिणामविशेषः खल्ववधिः प्रतिपाद्यते, इह चेयमवधिद्वारगाथा–"भेदविसयसंठाणे अब्भिंतरबाहिरे य देसोही। ओहिस्स वड्ढिहाणी पडिवाती चेव अपडिवाती॥ १॥" जत्थ उवरिमगेवेज्जाणं जहण्णेण अंगुलस्स असंखिज्जइभागो, तत्र यः संयतमनुष्यः समुत्पन्नजघन्यक्षेत्रावधिज्ञानी अविच्युतावधिर्ग्रैवेयकेषूत्पद्यते, तस्योपपातक्षेत्रप्राप्तस्य पारभविकोऽवधिरंगुलस्यासंख्येयभागविषयः, तद्भवजस्तु सूत्राभिहित इति। शेषं कण्ठ्यं॥

प्रज्ञापनाप्रदेशव्याख्यायां त्रयस्त्रिंशत्तमपदव्याख्या समाप्ता॥

साम्प्रतं चतुस्त्रिंशत्तममारभ्यते अस्य चायमभिसम्बन्धः—इहानन्तरपदे ज्ञानपरिणामविशेषोऽवधिः प्रतिपादितः, इह परिणामसाम्याद् वेदपरिणामविशेषः प्रवीचारः प्रतिपाद्यत इति । इह चेदमादिसूत्रम्—'नेरइयाणं भंते' इत्यादि, तत्र 'अनन्तराहारा' इति उपपातक्षेत्रप्राप्तिसमय एव आहारयन्तीत्यर्थः, 'ततो निव्वत्तणया' इति ततः शरीरनिर्वृत्तिः । 'ततो परियादिणया' इति, ततः पर्यादानं अङ्गप्रत्यङ्गैः समन्तात् पुद्गलादानमित्यर्थः, 'ततो परिणामणता' इति, ततोऽपि तस्य उपात्तस्य परिणतिरिन्द्रियादिविभागेन 'ततो परियारणता' इति ततः शब्दादिविषयोपभोग इत्यर्थः । 'ततो पच्छा विउव्वणा' ततो विक्रिया नानारूपा इत्यर्थः । हंता ? तदेवं । "पुव्वं विउव्वणा खलु पच्छा पडियारणा सुरगणाणं । सेसाणं पुव्व पडियारणाउ पच्छा विउव्वणया ॥ १ ॥" णेरइया जे पुग्गले आहारत्ताए गिण्हंति ते ण जाणंति न पासंति आहारेन्ति, कहं ? ण जाणंति ओहिणाणेणं, (न) पासंति चक्खुणा, लोमाहारत्वात् तेषां । असुरकुमारा अपि अवधेरविषयत्वात् मनोभक्षित्वे सत्यपि न जानन्त्यवधिना, चक्षुषापि अविषयत्वान्न पश्यन्ति । पृथिवीकायिका न जानन्त्यनाभोगनिर्वृत्तत्वादेव, न च पश्यन्त्यपि, चक्षुरिन्द्रियाभावात् । द्वीन्द्रियत्रीन्द्रिया मत्यज्ञानेन (न) जानन्ति, चक्षुरिन्द्रियाभावान्न पश्यन्ति । चतुरिन्द्रियाः प्रक्षेपाहारं प्रति मत्यज्ञानेन न जानन्ति, चक्षुरिन्द्रियाच्च पश्यन्ति, मक्षिकादयो गुडादि । पंचेन्द्रियतिरश्चां मनुष्याणां च लोमाहारप्रक्षेपाहारौ प्रतीत्य चतुर्भङ्गोऽपि अवध्यादिज्ञानसहितानां मनुष्याणां तिरश्चां वा अवधिज्ञानिनामिति । वेमाणिया मायिमिच्छादिट्ठी उववण्णया जाव उवरिमगेवेज्जा । यद्यपि आरातीयेषु कल्पेषु सम्यग्दृष्टयो देवाः सन्ति तथापि तेषां मनोभक्ष्याहारयोग्यस्कन्धत्वादवधेरविषयत्वं । अमायिसम्मदिट्ठिउववन्नया अनुत्तरसुरा एव गृह्णन्ते, ते जानन्ति पश्यन्त्याहारयन्ति च विशुद्धत्वादवधेरिन्द्रियविषयस्य च विशुद्धत्वात् पश्यन्त्यपीति । 'से जहानामए सीया पोग्गला सीतं पप्प सीतं चेव अतिवतित्ताण चिट्ठंति', सीतीभवन्तीत्यर्थः एवं उसिणा वि उण्णीभवन्ति । एवमेवेत्यादि, से इच्छामणे खिप्पामेव अवेति शीतीभवति तृप्तिः संजायते अभिलाषनिवृत्तिर्भवतीत्यर्थः । रूपप्रवीचारादौ शुक्रपुद्गलपरिणामो अप्सरसां शक्त्यपेक्षया प्रतिपाद्यत इति । गुरवो व्यावर्णयंति—विचित्रपरिणामतस्तु यदि कथंचिदचिन्त्यशक्तित्वादन्यथापि सम्पर्क-

जसुखजनकत्वेन परिणमंति तथाप्यविरोध एव लक्ष्यत इति, शेषं कण्ठ्यम्।

प्रज्ञापनाप्रदेशव्याख्यायां चतुस्त्रिंशत्तमपदव्याख्या समाप्ता।

साम्प्रतं पञ्चत्रिंशत्तममारभ्यते, अस्य चायमभिसम्बन्धः–इहानन्तरपदे वेदपरिणामविशेषः प्रवीचारः प्रतिपादितः, इह तु गतिपरिणामविशेषो वेदना प्रतिपाद्यते। तत्रेदं सूत्रं–'कतिविहा णं भंते! वेयणे'त्यादि, तत्र द्रव्यादिवेदना चतुर्विधा, तत्र पुद्गलद्रव्यसम्बन्धाद् द्रव्यवेदना, नरकाद्युपपातक्षेत्रसम्बन्धात् क्षेत्रवेदना, नारककालसम्बन्धात् कालवेदना, वेदनीयकर्मोदयाद्भाववेदना, सातासातसुखदुःखयोरयं विशेषः–सातासाते क्रमेणोदयप्राप्तवेदनीयकर्मपुद्गलानुभावः, सुखदुःखे परेणोदीर्यमाणवेदनानुभवः। तथा चोक्तम्–"परस्परोदीरितदुःखाः संक्लिष्टासुरोदीरितदुःखाश्चे"ति, एवं सर्वजीवानां परेणोदीर्यमाणा सुखदुःखा, 'परेण वा उदीर्यमाणस्ये'ति वचनात्। अब्भुवगमिया–स्वयमभ्युपगम्य, यथा साधवः केशलुञ्चनातापनादिभिर्वेदयंति। औपक्रमिकी तु–स्वयमुदीर्णस्य उदीरणाकरणेन वा उदयमुपनीतस्यानुभावो वेद्यस्य। निदा–चित्तवती, तद्विपरीता अनिदा। शेषं कण्ठ्यम्।

प्रज्ञापनाप्रदेशव्याख्यायां पञ्चत्रिंशत्तमपदव्याख्या समाप्ता।





अधुना षट्त्रिंशत्तममारभ्यते, अस्य चायमभिसम्बन्धः–इहान्तरपदे गतिपरणामविशेषो वेदना प्रतिपादिता, इहापि तु तद्विशेष एव समुद्घातश्चिन्त्यत इति। तत्रेदं सूत्रं–'कइ णं भंते! समुग्घाया पण्णत्ता? तत्र "हन हिंसागत्योः" हननं घातः समित्येकीभावे उत्–प्राबल्ये, एकीभावेन प्राबल्येन च घातः समुद्घातः, केन सहैकीभावगमनं?, उच्यते–यदा आत्मा वेदनादिसमुद्घातगतस्तदा वेदनाद्यनुभवज्ञानपरिणतो भवति, नान्यज्ञानपरिणत इति, प्राबल्येन घातः कथं? यस्माद्वेदनादिसमुद्घातपरिणतो बहून् [कर्मांशयान् मारणंतिसमुद्घातपरिणतो बहून्] वेदनीयादिकर्मप्रदेशान् कालान्तरानुभावयोग्यानुदीरणाकरणेनाकृष्य उदये

प्रक्षिप्यानुभूय निर्जरयति, आत्मप्रदेशैः सह संश्लिष्टान् सातयतीत्यर्थः, उक्तं च–"पुव्वकयकम्मस(सा)डणं तु निज्जरा" इति, स च वेदनादिभेदेन सप्तधोक्तः, 'वेदनासमुद्घात' इत्यादि; तत्र वेदनासमुद्घातः असद्वेद्यकर्म्माश्रयः, कषायसमुद्घातः कषायाख्यचारित्रमोहनीयकर्म्माश्रयः, मारणंतियसमुद्घातः अन्तर्मुहुर्त्तशेषायुष्ककर्म्माश्रयः, वैकुर्विकतैजसाहारकसमुद्घाताः शरीरनामकर्म्माश्रयाः, केवलिसमुद्घातस्तु सदसद्वेद्यशुभाशुभनामोच्चनीचैर्गोत्रकर्म्माश्रय इति। तत्र वेदनासमुद्घातसमुद्धत आत्मा वेदनीयकर्म्मपुद्गलशातं करोति, कषायसमुद्घातसमुद्धतः कषायपुद्गलशातं, मारणंतियमुद्घातसमुद्धत आयुष्ककर्म्मपुद्गलघातं, वैकुर्विकसमुद्घातसमुद्धतस्तु जीवप्रदेशान् शरीराद् बहिः निष्काश्य शरीरविष्कम्भबाहल्यमात्रमायामतश्च संख्येयानि योजनानि दंडं निसृजति, निसृज्य च यथास्थूलान् वैक्रियशरीरनामकर्म्मपुद्गलान् प्राग्बद्धान् सातयति, यथोक्तं–"वेउव्वियसमुग्घाएणं समोहणति, समोहणित्ता संखिज्जाइं जोयणाइं दंडं निसिरति, निसिरित्ता अहाबायरे पोग्गले परिसाडेति"त्ति। एवं तैजसाहारकसमुद्घातावपि व्याख्येयौ। केवलिसमुद्घातेन समुद्धतः केवली वेदनीयादिकर्म्मपुद्गलान् सातयति। शेषं कण्ठयं, यावत्, 'एगमेगस्स णं भंते! नेरइयस्स केवइया वेयणासमुग्घाया अतीता? इत्यादि, पुरेक्खडा, शेषं कण्ठयं, यावत् जहन्नेणं १–२–३ इत्यादि, प्रायः क्षीणायुषोऽनन्तरभवसिद्ध्यमानस्यैकादिसंभव इति। आहारकसमुग्घाता उक्कोसेणं तिन्नि, तदुवरि नियमा णरगं न गच्छति जस्स चत्तारि हवंति। शेषं सुगमं। यावन्मनुष्येषु केवलिसमुद्घातचिन्तायां–उक्कोसेणं सतपुहुत्ताओ, तत्रैककाल एवोत्कृष्टपदे एतावन्तः केवलिनः समुद्घातमासादयंति। एगमेगस्स णं भंते! नेरइयस्स नेरइयत्ताए इत्यादि, केवइया पुरेक्खडा? कस्सइ अत्थि, कस्सइ नत्थि, तत्र आसन्नमृत्युवेदनासमुद्घातमप्राप्यात्यन्तिकमरणेन नरकादुद्वृत्य सेत्स्यति तस्य नास्ति, एकादिसंभवोऽपि अन्त्य तद्भवभाजामेव, अन्यथा यदि पुनरुत्पद्यते ततो जघन्यस्थितेरपि संख्येया एव भवंति, वक्ष्यति च–असुरकुमारस्य नारकेषु पुरस्कृतास्तु जघन्यपदेऽपि संख्येया इति, तच्चेदं सूत्रं–'असुरकुमारस्स नेरयिएसु पुरेक्खडा वेदणासमुग्घाता जस्स अत्थि सिय संखिज्जा' इत्यादि। नरकेषु जघन्यस्थितिषु उत्पन्नस्य नियमतः संख्येया एव वेदना समुद्घाता

भवंति, वेदनासमुद्घातप्रचुरत्वान्नारकाणामिति। 'नेरइयस्स असुरकुमारेसु कसायसमुग्घाया पुरेक्खडा जस्सत्थि सिय संखिज्जा' जइण्णठितियाण वि णियमेण ओहतो संखिज्जभावो, जेण बहवो लोभसमुग्घाता एतेसिं भवंति, जोइसिएसु असंखिज्जा, जम्हा तेसिं जहण्णायुगापि असंखिज्जा, पलिओवमस्स अट्ठभागोत्ति। शेषं सुगमं यावत् अल्पबहुत्वचिंतायां जीवपदे-'सव्वत्थोवा जीवा आहारगसमुग्घाएणं समोहता संखिज्जगुणा', एत्थ जइवि आहारगाण सहस्सपुहुत्तमेगदा भणितं तहावि तत्थ जुगवं समोहता थोवा, सत्तया पुनर्बहुत्वेऽप्यविरोध एवेति भावनीयं। तेयासमुग्घाएण समोहता असंखिज्जगुणा, कहं ? [तेण] पंचिंदियतिरिक्खमणुस्साणं देवाणं [देव] तेयासमुग्घाओ अत्थि। वेउव्वियसमुग्घाएण समोहता असंखिज्जगुणा, कहं ? वाउकाइए पडुच्च, जेण महादंडए भणियं-"बादरा वाउकाइया पज्जत्तया सव्वदेवेहिंतो खहचरथलचरजलचरपंचिंदियतिरिक्खजोणिएहिंतोवि असंखिज्जगुणा"। मारणांतियसमुग्घाएणं समोहता अणंतगुणा, निओदजीवे पडुच्च, जेण निओदाणं असंखिज्जइभागो सदा कालं विग्गहे वट्टति। कसायसमुग्घाएणं समोहता असंखिज्जगुणा, णिओयजीवे पडुच्च। जे [भवत्था] वेदनासमुग्घाएण समोहता ते विसेसाहिया, ते चेव पडुच्च। असमोहता विसेसाहिया, ते पडुच्च जे वेदणाकसायमारणंतियसमुग्घाएणं असमोहता, शेषं सुगमं। यावल्लोभकसायसमुग्घाएणं णेरइएसु एगुत्तरियाए नेयव्वा, जम्हा नेरइयाणं लोभसमुग्घाया थोवा चेव भवंति, तेसिमिट्ठदव्वसंजोगाभावातो एकादिसंभवो। 'जीवे णं भंते! वेदणासमुग्घाएणं समोहते [त्याह] केवइए खेत्ते अफुण्णत्ति-स्पृष्टं, फुडेत्ति-भृतं। 'केवइयकालस्स अप्फुन्ने' कियता कालेन, अथवा कियतः 'एगसमएण वा १-२-३। [कति] 'विग्गहेणं'ति, तद्देहमात्रं क्षेत्रं आत्मविश्लिष्टपुद्गलैर्भृतमित्यर्थः, कर्णादिदेशे च स्वबुद्धया भावनीयं। 'केवइयकालस्स णिच्छुभति'त्ति, कियतो वेदनाकालस्य सम्बन्धिनो विक्षपति केवइयं कालं वेदणाजननयोग्यानित्यर्थः। 'ते णं भंते! जीवा ताओ' समोहतजीवाओ कति किरिया? गोयमा! सिय तियकिरिया इत्यादि, निर्वचनभावना-जम्हा तेवि तं कदापि उद्दवेंति परितावेंति वा। 'चउसमएण वा,' एगिंदियाणं णालीए बाहिमुप्पज्जत्ताणं। एगदिसिं विदिसिं वा सिया, देवाण सुद्धा होज्जा अण्णहा वा। णेरइयस्स णं भंते! संखिज्जाइं जोयणाइं एगदिसिं दंडे हवति, जइवि

सरीरं धणुसहस्सप्पमाणमुक्कोसं तह वि सो सरीराओ अब्भहिओ चेव भवति । शेषं सुगमं । 'एगं महं' सविलेवणगंधसमुग्गत'मित्यादि, गंधसमुग्गतं अवदालेतित्ति–उग्घा (ष्पा)डेतित्ति, इणामेवत्ति [एहिणंति] एवमेवेत्यर्थः, ' तिहिं अच्छराणिवातेहिं '–चप्पडियाहिं, गंधसमुग्गएण गहिएण दुतं दुतं हिंडंतस्स गंधपोग्गलेहिं दीवे भरिज्जतित्ति, एस एत्थ भावत्थो । शेषं सुगमं । यावत् ' विसमं समंकरेती'त्यादि, चउण्हं केवलिकम्माणं सव्वबहुपदेसतरं दढबंधणतरं च वेदनीयं विसमं तं आउगेण समं करेति, ' बंधणेहिं 'ति–पदेसेहिं, ' ठितिए'ति–वेदणकालेणंति । शेषं सुगमं । यावत् कतिसमएणं भंते ! आउज्जीकरणे पण्णत्ते ' आउज्जीकरणं 'ति, आवर्जनमुपयोगः, व्यापारविशेषः, करणं क्रिया, वेद्यायुषः समरचनप्रयत्नकरणमित्यर्थः । शेषं सूत्रसिद्धं । यावत् ' ततो पच्छा ' मणजोगंपि जुंजती'त्यादि, स हि भगवान् भवधारणीयकर्मसु वेदनीयनामगोत्रेषु आयुषस्समधिकेष्वचिन्त्यमाहात्म्यसमुद्घातसमीकृतेष्वन्तर्मुहूर्तभाविपरमपदः एतस्मिन् काले अनुत्तरोपपातिकादिना च देवेन मनसा पृष्टः मनःपुद्गलान् गृहीत्वा वाक्पुद्गलान् गृहीत्वा कायचेष्टायुक्त्रियोगी भवति । अधुना चैषां योगानां मनोवाक्काययोगक्रमेणैव निरोधं करोति, ततः यस्मात् सयोगी सिध्यत्येव, यद्वन्मन्त्रेण विषं शरीरादेवं मनोयोगं [ततो विकरणधिया] असंख्येयैः समयैः मनसः सर्वं निरोधं करोति, एवं द्वीन्द्रियप्रथमपर्याप्तकवाग्योगमात्रवाग्योगं ततः परं असंख्येयैः समयैः सर्वं वाग्योगनिरोधं करोति, ततः सूक्ष्मपनकस्य प्रथमसमयोत्पन्नस्य यावान् काययोगस्तावद्ध्रष्ट्वा ततोऽधस्तादसंख्येयैः समयैरुच्छ्वासादिसर्वकायं निरोधं कृत्वा देहत्रिभागं च मुक्त्वाऽयोगिकेवली भवति, ह्रस्वपंचाक्षरोच्चारणकालं, यावता कालेन ' क ख ग घ ङ ' उच्चार्यन्ते । अत्र च काययोगनिरोधारम्भात् प्रभृति ध्यायत्यसौ सूक्ष्मक्रियाऽप्रतिपातिध्यानं, सर्वनिरोधं कृत्वा शैलेशीकाले व्युच्छिन्नक्रियमप्रतिपातिध्यानं कायिकं, कुम्भकारप्रयुक्तचक्रभ्रमणव्यापारोपरमेऽपि चक्रभ्रमणानुवृत्तिवत् । शैलेशीशब्दस्य व्युत्पत्तिः–शिलाभिर्निर्वृत्तः शिलानामयं वेति अण् शैलः–पर्वतः, शैलानामीशः–अधिपतिः शैलेशः–मेरुः, शैलेशस्येयं स्थिरता शैलेशी, स्थिरतासामान्यात् परमशुक्लध्याने वर्त्तमानः शैलेशीवानभेदोपचारादुच्यते स एव शैलेशी । तेषु च शैलेशीसमयेषु ' पुव्वरइयं च णं कम्मं 'ति आउज्जी [जीवा न भेदोपचार] काले चेव गुणसेढीं करेति, गुणप्पहाणा सेढीर,

आउकम्मसमयमित्तकालं गुणसेढिं रएति, पढमसमए वेदणीयादिकम्मपदेसे थोवे रएति, बितियादिसमएसु असंखिज्जगुणे २ रएति, आउकम्मस्स य विवज्जएण ति। स्थापना चेयं।

'तीसे सेलेसिमद्धाए असंखिज्जाहिं गुणसेढीहिं'ति, तासिमसंखिज्जत्तणं एगनिमिसणसमएणं चउण्हं वेदिज्जा, चउण्हं संप्पायत्तणतो सेढीत्ताओ य असंखिज्जा, समयाण समत्ति भावनीयं। असंखिज्जे कम्मखंधे खवयंते२-अणुभावेणं, 'वेदणिज्जाउयनामगोत्ते, इच्चेते चत्तारि कम्मंसे 'जुगवं'ति समं खवेति, खवेत्ता ओरालियतेयाकम्मगाइं सव्वाहिं विप्पजहणाहिं विप्पजहति-सव्वपगारेण वज्जति-सर्वैः प्रकारैः परित्यजतीत्यर्थः, न यथा देशत्यागेन प्राक् त्यक्तवानिति। 'विप्पजहित्ता उज्जुसेढिपडिवण्णे' इत्यादि, ऋजुश्रेणिप्रतिपन्नः कुम्भकारप्रयुक्तचक्रभ्रमणव्यापारोपरमेऽपि चक्रभ्रमणानुवृत्तिन्यायेन अस्पृशद्गत्या प्राग्भावितया, एकसमयेनाविग्रहेण, जीवस्वाभाव्यादूर्ध्वं गत्वा, साकारोपयुक्तः, कांचनोपलवदग्निना सततमुपयोगेन कर्ममलाद्विप्रमुक्तः सन्, सिध्यति-निष्ठितार्थो भवति। 'ते णं तत्थ' त्ति ते तत्र, 'सिद्धा भवंति', किं भूताः? 'असरीरा' औदारिकादिशरीररहिताः, जीवघनाः तच्छुषिरापूरणात्, ॥१५७॥

दर्शनज्ञानोपयुक्ता जीवस्वाभाव्यात्, निष्ठितार्थाः कृतकृत्यत्वात्, नीरजसो वध्यमानकर्म्माभावात्, निरेजनाः कम्पक्रियानिमित्तविरहात् वितिमिराः कर्म्मतिमिरवासनाविरहात्, विशुद्धास्त्रिविधसम्यग्दर्शनादिमार्गतोऽत्यन्तशुभत्वात्, शाश्वतं शश्वद्भावेन, अनागतद्धं कालमिति समयपरिभाषा तिष्ठन्ति । 'णिच्छिण्णसव्वदुक्खा' गाहा, निगदसिद्धा । शेषं सूत्रसिद्धं । नवरमियं भावना ॥ दग्धे बीजे यथाऽत्यन्तं, प्रादुर्भवति नाङ्कुरः । कर्म्मबीजे तथा दग्धे, न रोहति भवाङ्कुरः ॥ १ ॥ ग्रन्थाग्रम् ४७०० ॥

भवविरहसूरिकृत—

प्रज्ञापनाप्रदेशव्याख्यायां षट्त्रिंशत्तमपदव्याख्या समाप्ता ॥

प्रज्ञापनोपाङ्गप्रदेशव्याख्या समाप्ता